THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY
OU_184381
UNIVERSAL
LIBRARY

OUP—390—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294.1 Accession No. G 3651
VAIK

Author

Title कृष्णयजुर्वेदीयतैत्तिरीयसंहि
Vol. 7. 1948

This book should be returned on or before the date last marked below.

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४२ ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ।

(तत्र पञ्चमकाण्डरूपः सप्तमो भागः (७) ।

एतत्पुस्तकं

वे० शा० सं० काशीनाथशास्त्री आगाशे इत्येतैः संशोधितम् ।

तच्च

रावबहादूर इत्युपपदधारिभिः
गंगाधर बापूराव काळे

जे. पी. इत्येतैः

पुण्याख्यपत्तने

श्रीमत् 'महादेव चिमणाजी आपटे'

इत्यभिधेयमहाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८७० ।

खिस्ताब्दाः १९४९ ।

द्वितीयेयमङ्कनावृत्तिः ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यं पादोनरूपकचतुष्टयम् (३-१२) ।

(अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमोऽष्टकः) ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

हरिः ॐ ।

*सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवाव रुन्धे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दांसि देवेभ्योऽपाक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीतमधारयन्पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दांस्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति यं कामयेत (१) पापीयान्त्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनमप गृह्णाति पापीयान्भवति यं कामयेत वसीयान्त्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान्भवत्यथो यज्ञस्यैवैषाऽभिक्रान्तिरेति वा एष यज्ञमुखादृद्ध्या योऽग्नेर्देवताया एत्यष्टावेतानि सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रः(२)

*एतदाद्यनुवाकदशकं पूर्वमेव चतुर्थकाण्डप्रथमप्रपाठकसंहिताव्याख्यानेन सह व्याख्यातत्वादत्र पुनर्न व्याख्यातं भाष्यकृता । एतदनुवाकदशकस्थविषयाणां संक्षेपेण प्रदर्शनमेकादशानुक्रमाद्यारम्भे भाष्यकृतैव कृतमस्ति तत्तत्र द्रष्टव्यम् ।

(सावित्राहुत्यभ्रिस्वीकारयोरभिधानम्)

अभ्रिस्तेनैव यज्ञमुखादृध्या अग्नेर्देवताया ऐ-
त्यष्टौ सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रं यज्ञमुखं
यज्ञमुखे वि यातयाति यदि कामयेत छन्दाꣳ-
सि यज्ञयशसेनार्पयेयमित्यृचमन्तमां कुर्याच्छ-
न्दाꣳस्येव यज्ञयशसेनार्पयति यदि कामयेत
यजमानं यज्ञयशसेनार्पयेयमिति यजुरन्तमं
कुर्याद्यजमानमेव यज्ञयशसेनार्पयत्यृचा स्तोमꣳ
समर्धयेति (३) आह समृध्यै चतुर्भिर-
भ्रिमा दत्ते चत्वारि छन्दाꣳसि छन्दोभिरेव
देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्या
अग्निर्देवेभ्यो निलायत स वेणुं प्राविशत्स
एतामूतिमनु समचरद्वेणोः सुषिरꣳ सुषिराऽ-
भ्रिर्भवति सयोनित्वाय स यत्रयत्रावसत्तत्कृ-
ष्णमभवत्कल्माषी भवति रूपसमृध्या उभ-
यतःक्ष्णूर्भवतीतश्चामुतश्चार्कस्यावरुध्यै व्याम-
मात्री भवत्येतावद्वै पुरुषे वीर्यं वीर्यसंमिताऽ-
परिमिता भवत्यपरिमितस्यावरुध्यै यो वन-
स्पतीनां फलग्रहिः स एषां वीर्यावान्फलग्र-
हिर्वेणुर्वैणवी भवति वीर्यस्यावरुध्यै (४) ॥

(कामयेत गायत्र्योऽर्धयेति च सप्तविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(मृत्खननगमनपूर्वकमश्वेन भूम्याक्रमणम्)

(अथ पञ्चमाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः) ।

व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमा दत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्तं वाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवास्यैतन्महिमानं व्याचष्टे युञ्जाथां रासभं युवमिति गर्दभमसत्येव गर्दभं प्रति ष्ठापयति तस्मादश्वाद्गर्दभोऽसत्तरो योगेयोगे तवस्तरमित्याह (१) योगेयोग एवैनं युङ्क्ते वाजेवाजे हवामह इत्याहान्नं वै वाजोऽन्नमेवाव रुन्धे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुन्धेऽग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत्प्राजापत्योऽश्वोऽश्वेन संभरत्यनुवित्त्यै पापवस्यसं वा एतत्क्रियते यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान् (२) ह्यश्वाद्गर्दभोऽश्वं पूर्वं नयन्ति पापवस्यसस्य व्यावृत्त्यै तस्माच्छ्रेयाꣳसं पापीयान्पश्चादन्वेति बहुर्वै भवतो भ्रातृव्यो भवतीव खलु वा एष योऽग्निं चिनुते वज्र्यश्वः प्रतूर्वन्नेह्यवक्रामन्नशस्तीरित्याह वज्रेणैव पाप्मानं भ्रातृव्यमव क्रामति रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव (३) पशुभिर्यज्ञ्यात्मने कर्म कुरुते पूष्णा सयुजा सहेत्याह पूषा वा अध्वनाꣳ संनेता समष्ट्यै

(मृत्खननगमनपूर्वकमश्वेन भूम्याक्रमणम्)

पुरीषायतनो वा एष यदग्निराङ्गिरसो वा एत-
मग्रे देवतानाꣳ समभरन्पृथिव्याः सधःस्थादग्निं
पुरीष्यमङ्गिरस्वदच्छेहीत्याह सायतनमेवैनं
देवताभिः सं भरत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम
इत्याह येन (४) संगच्छते वाजमेवास्य
वृङ्क्ते प्रजापतये प्रतिप्रोच्याग्निः संभृत्य इत्या-
हुरियं वै प्रजापतिस्तस्या एतच्छ्रोत्रं यद्वल्मी-
कोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम इति वल्मी-
कवपामुप तिष्ठते साक्षादेव प्रजापतये प्रति-
प्रोच्याग्निꣳ सं भरत्यग्निं पुरीष्यमङ्गिरस्वद्भ-
राम इत्याह येन संगच्छते वाजमेवास्य वृङ्-
क्तेऽन्वग्निरुषसामग्रम् (५) अख्यदित्याहा-
नुख्यात्या आगत्य वाज्यध्वन आक्रम्य वाजि-
न्पृथिवीमित्याहेच्छत्येवैनं पूर्वया विन्दत्युत्त-
रया द्वाभ्यामा क्रमयति प्रतिष्ठित्या अनुरू-
पाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते
द्यौस्ते पृष्ठं पृथिवी सधःस्थमित्याहैभ्यो वा
एतं लोकेभ्यः प्रजापतिः समैरयद्रूपमेवास्यैत-
न्महिमानं व्याचष्टे वज्री वा एष यदश्वो दद्भि-
रन्यतोदद्भ्यो भूयाल्लोँमभिरुभयादद्भ्यो यं द्वि-
ष्यात्तमधस्पदं ध्यायेद्वज्रेणैवैनꣳ स्तृणुते (६) ॥

(आह पापीयान्रुद्रादेव येनाग्रं वज्री वै सप्तदश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अश्वाक्रमणपूर्वकभूसंस्काराभिधानम्)

(अथ पञ्चमाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः)।

उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्तेऽप उप सृजति यत्र वा आप उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून्यज्ञो यज्ञं यजमानो यजमानं प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः (१) स्याद्रक्षांꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षांꣳसि घ्नन्ति जिघर्म्यग्निं मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति प्रतिक्ष्यन्तं भुवनानि विश्वेत्याह सर्वꣳ ह्येष प्रत्यङ्क्षेति पृथुं तिरश्चा वयसा बृहन्तमित्याहाल्पो ह्येष जातो महान् (२) भवति व्यचिष्ठमन्नꣳ रभसं विदानमित्याहान्नमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदाऽऽ त्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत्पुरुषो मनसाऽभिगच्छति तद्वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवास्मिन्दधात्यपचितिमान्भवति य एवम् (३) वेद मनसा त्वै तामाप्तुमर्हति यामध्वर्युरनग्नावाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षांꣳसि जिघांꣳ-

(मन्त्रः खननपूर्वकं चर्मपत्रयोः संभरणम्)

सन्त्येतर्हि खलु वा एतद्यज्ञमुखं यर्ह्येनदाहुति-रश्नुते परि लिखति रक्षसामपहत्यै तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाग्निस्त-स्माद्रक्षाꣳस्यप हन्ति (४) गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति त्रिष्टुभा परि लिखतीन्द्रियं वै त्रिष्टुगि-न्द्रियेणैवैनं परि गृह्णात्यनुष्टुभा परि लिखत्य-नुष्टुप् सर्वाणि छन्दाꣳसि परिभूः पर्याप्त्यै मध्य-तोऽनुष्टुभा वाग्वा अनुष्टुप्तस्मान्मध्यतो वाचा वदामो गायत्रिया प्रथमया परि लिखत्यथा-नुष्टुभाऽथ त्रिष्टुभा तेजो वै गायत्री यज्ञोऽनुष्टु-गिन्द्रियं त्रिष्टुप्तेजसा चैवेन्द्रियेण चोभयतो यज्ञं परि गृह्णाति (५) ॥

(अन्धोऽध्वर्युर्महान्भवति य एवꣳहन्ति त्रिष्टुभा तेजो वै गायत्री त्रयोदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर्जातः प्रजाः शुचाऽऽर्पयत्तं देवा अर्ध-र्चेनाशमयञ्छिवं प्रजाभ्योऽहिꣳसन्तमित्याह

(मृदः खननपूर्वकं चर्मपत्रयोः संभरणम्)

प्रजाभ्य एवैन्ँ शमयति द्वाभ्यां खनति प्रति
ष्ठित्या अपां पृष्ठमसीति पुष्करपर्णमा (१)
हरत्यपां वा एतत्पृष्ठं यत्पुष्करपर्णँ रूपेणै-
वैनदा हरति पुष्करपर्णेन सं भरति योनिर्वा
अग्नेः पुष्करपर्णँ सयोनिमेवाग्निँ सं भरति
कृष्णाजिनेन सं भरति यज्ञो वै कृष्णाजिनं
यज्ञेनैव यज्ञँ सं भरति यद्ग्राम्याणां पशूनां
चर्मणा संभरेद्ग्राम्यान्पशूञ्छुचाऽर्पयेत्कृष्णा-
जिनेन सं भरत्यारण्यानेव पशून् (२) शुचाऽ-
र्पयति तस्मात्समावत्पशूनां प्रजायमानानामा-
रण्याः पशवः कनीयाँसः शुचा ह्यृता लोमतः
सं भरत्यतो ह्यस्य मेध्यं कृष्णाजिनं च पुष्क-
रपर्णं च सँ स्तृणातीयं वै कृष्णाजिनमसौ
पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णात्यग्नि-
र्देवेभ्यो निलायत तमथर्वाऽन्वपश्यदथर्वा
त्वा प्रथमो निरमन्थदग्न इति (३) आह य
एवैनमन्वपश्यत्तेनैवैनँ सं भरति त्वामग्ने
पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमवि-
न्दत्तमु त्वा दध्यङ्ङृषिरित्याह दध्यङ्वा आथ-
र्वणस्तेजस्व्यासीत्तेज एवास्मिन्दधाति तमु त्वा
पाथ्यो वृषेत्याह पूर्वमेवोदितमुत्तरेणाभि गृणा-
ति (४) चतसृभिः सं भरति चत्वारि छन्दाँ-
सि छन्दोभिरेव गायत्रीभिर्ब्राह्मणस्य गायत्रो

(संभृतमृदो यज्ञभूमौ समाहरणम्)

हि ब्राह्मणस्त्रिष्टुगर्भो राजन्यस्य त्रैष्टुभो हि राजन्यो यं कामयेत वसीयान्त्स्यादित्युभयीभिस्तस्य सं भरेत्तेजश्चैवास्मा इन्द्रियं च समीची दधात्यष्टाभिः सं भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तꣳ सं भरति सीद होतरित्याह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्त्सꣳ सीदस्वेति वयाꣳसि जनिष्वा हि जेन्यो अग्रे अह्नामित्याह देवमनुष्यानेवास्मै सꣳसन्नान्प्र जनयति (५) ॥

(एव पशूनिति गृणाति होतरिति सप्तविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः) ।

क्रूरमिव वा अस्या एतत्करोति यत्खनत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्यै शुचꣳ शमयति सं ते वायुर्मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणꣳ सं दधाति सं ते वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते तस्मै च देवि वषडस्तु (१) तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्मात्सर्वानृतून्वर्षति यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट्करोति

(संभृतमृदो यज्ञभूमौ समाहरणम्)

नास्य यातयामा वषट्कारो भवति न यज्ञꣳ
रक्षाꣳसि घ्नन्ति सुजातो ज्योतिषा सहेत्यनु-
ष्टुभोप नह्यत्यनुष्टुप् (२) सर्वाणि छन्दाꣳसि
छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययै-
वैनं तनुवा परि दधाति वेदुको वासो भवति
य एवं वेद वारुणो वा अग्निरुपनद्ध उदु तिष्ठ
स्वध्वरोर्ध्व ऊ षु ण ऊतय इति सावित्रीभ्यामु-
त्तिष्ठति सवितृप्रसूत एवास्योर्ध्वां वरुणमेनिमु-
त्सृजति द्वाभ्यां प्रतिष्ठित्यै स जातो गर्भो
असि (३) रोदस्योरित्याहेमे वै रोदसी
तयोरेष गर्भो यदग्निस्तस्मादेवमाहाग्ने चारु-
र्विभृत ओषधीष्वित्याह यदा ह्येतं विभरन्त्यथ
चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्गा
इत्याहौषधयो वा अस्य मातरस्ताभ्य एवैनं
प्र च्यावयति स्थिरो भव वीडवङ्ग इति गर्दभ
आ सादयति (४) सं नह्यत्येवैनमेतया स्थेम्ने
गर्दभेन सं भरति तस्माद्गर्दभः पशूनां
भारभारितमो गर्दभेन सं भरति तस्माद्गर्दभोऽ-
प्यनालेशेऽत्यन्यान्पशून्मेद्यत्यन्नꣳ ह्येनेना-
र्कꣳ संभरन्ति गर्दभेन सं भरति तस्माद्गर्दभो
द्विरेताः सन्कनिष्ठं पशूनां प्र जायतेऽग्निर्ह्यस्य
योनिं निर्दहति प्रजासु वा एष एतर्ह्यारूढः
(५) स ईश्वरः प्रजाः शुचा प्रदहः शिवो

(संभृतमृदो यज्ञभूमौ समाहरणम्)

भव प्रजाभ्य इत्याह प्रजाभ्य एवैनꣳ शमयति
मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि
प्रजा मा द्यावापृथिवी अभि शूशुचो माऽन्त-
रिक्षं मा वनस्पतीनित्याहैभ्य एवैनं लोकेभ्यः
शमयति प्रैतु वाजी कनिक्रददित्याह वाजी
ह्येष नानदद्रासभः पत्वेति (६) आह रासभ
इति ह्येतमृषयोऽवदन्भरन्नग्निं पुरीष्यमित्याहा-
ग्निꣳ ह्येष भरति मा पाद्यायुषः पुरेत्याहाऽऽयु-
रेवास्मिन्दधाति तस्माद्गर्दभः सर्वमायुरेति त-
स्माद्गर्दभे पुराऽऽयुषः प्रमीते बिभ्यति वृषाऽ-
ग्निं वृषणं भरन्नित्याह वृषा ह्येष वृषाऽग्निरपां
गर्भम् (७) समुद्रियमित्याहापाꣳ ह्येष गर्भो
यदग्निरग्न आ याहि वीतय इति वा इमौ
लोकौ व्यैतामग्न आ याहि वीतय इति यदा-
हानयोर्लोकयोर्वीत्यै प्रच्युतो वा एष आयत-
नादगतः प्रतिष्ठाꣳ स एतर्ह्यध्वर्युं च यजमानं च
ध्यायत्यृतꣳ सत्यमित्याहेयं वा ऋतमसौ (८)
सत्यमनयोरेवैनं प्रति ष्ठापयति नाऽऽर्तिमार्छ-
त्यध्वर्युर्न यजमानो वरुणो वा एष यजमानम-
भ्येति यदग्निरुपनद्ध ओषधयः प्रति गृह्णीता-
ग्निमेतमित्याह शान्त्यै व्यस्यन्विश्वा अमतीर-
रातीरित्याह रक्षसामपहत्यै निषीदन्नो अप
दुर्मतिꣳ हनदित्याह प्रतिष्ठित्या ओषधयः
प्रति मोदध्वम् (९) एनमित्याहौषधयो वा

(उखानिर्माणम्)

अग्नेर्भागधेयं ताभिरेवैन॑ समर्धयति पुष्पा-
वतीः सुपिप्पला इत्याह तस्मादोषधयः फलं
गृह्णन्त्ययं नो गर्भ ऋत्वियः प्रत्न॑ सधःस्थमाऽ-
सददित्याह याभ्य एवैनं प्रच्यावयति तास्वे-
वैनं प्रति ष्ठापयति द्वाभ्यामुपावहरति प्रति-
ष्ठित्यै (१०) ॥

(अस्त्वनुष्टुबसि सादयत्यारूढः पत्वेति गर्भमग्नौ
मोदध्वं द्विचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः) ।

वारुणो वा अग्निरुपनद्धो वि पाजसेति वि
स्रं॑सयति सवितृप्रसूत एवास्य विषूचीं वरुण-
मेनिं वि सृजत्यप उप सृजत्यापो वै शान्ताः
शान्ताभिरेवास्य शुचं॑ शमयति तिसृभिरुप
सृजति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्य शुचं॑
शमयति मित्रः सं॑सृज्य पृथिवीमित्याह मित्रो
वै शिवो देवानां तेनैव (१) एनं॑ सं॑
सृजति शान्त्यै यद्ग्राम्याणां पात्राणां कपालैः
सं॑सृजेद्ग्राम्याणि पात्राणि शुचाऽर्पयेदर्मक-
पालैः सं॑ सृजत्येतानि वा अनुपजीवनीयानि
तान्येव शुचाऽर्पयति शर्कराभिः सं॑ सृजति
धृत्या अथो शंत्वायाजलोमैः सं॑ सृजत्येषा
वा अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तनुवा

(उखानिर्माणम्)

सꣳ सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः सम् (२) सृजति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सꣳ सृजति रुद्राः संभृत्य पृथिवीमित्याहैता वा एतं देवता अग्रे समभरन्ताभिरेवैनꣳ संभरति मखस्य शिरोऽसीत्याह यज्ञो वै मखस्तस्यैतच्छिरो यदुखा तस्मादेवमाह यज्ञस्य पदे स्थ इत्याह यज्ञस्य ह्येते (३) पदे अथो प्रतिष्ठित्यै प्रान्याभिर्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनत्वाय त्र्युद्धिं करोति त्रय इमे लोका एषां लोकानामाप्त्यै छन्दोभिः करोति वीर्यं वै छन्दाꣳसि वीर्येणैवैनां करोति यजुषा बिलं करोति व्यावृत्त्या इयतीं करोति प्रजापतिना यज्ञमुखेन संमितां द्विस्तनां करोति द्यावापृथिव्योर्दोहाय चतुस्तनां करोति पशूनां दोहायाष्टास्तनां करोति छन्दसां दोहाय नवाश्रिमभिचरतः कुर्यात्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै कृत्वाय सा महीमुखामिति नि दधाति देवतास्वेवैनां प्रति ष्ठापयति (४) ॥

(तेनैव लोमभिः समेते अभिचरत एकविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(उखासंस्कारः)

(अथ पञ्चमाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः) ।

सप्तभिर्धूपयति सप्त वै शीर्षण्याः प्राणाः शिर एतद्यज्ञस्य यदुखा शीर्षन्नेव यज्ञस्य प्राणान्दधाति तस्मात्सप्त शीर्षन्प्राणा अश्वशकेन धूपयति प्राजापत्यो वा अश्वः सयोनित्वायादितिस्त्वेत्याहेयं वा अदितिरदित्यैवादित्यां खनत्यस्या अक्रूरंकाराय न हि स्वः स्वꣳ हिनस्ति देवानां त्वा पत्नीरित्याह देवानाम् (१) वा एतां पत्नयोऽग्रेऽकुर्वन्ताभिरेवैनां दधाति धिषणास्त्वेत्याह विद्या वै धिषणा विद्याभिरेवैनामभीन्धे ग्नास्त्वेत्याह छन्दाꣳसि वै ग्नाश्छन्दोभिरेवैनाꣳ श्रपयति वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो होत्राभिरेवैनां पचति जनयस्त्वेत्याह देवानां वै पत्नीः (२) जनयस्ताभिरेवैनां पचति षड्भिः पचति षड्वा ऋतव ऋतुभिरेवैनां पचति द्विः पचन्त्वित्याह तस्माद्द्विः संवत्सरस्य सस्यं पच्यते वारुण्युखाऽभीद्धा मैत्रियोपैति शान्त्यै देवस्त्वा सवितोद्वपत्वित्याह सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्वपत्यपद्यमाना पृथिव्याशा दिश आ पृण (३) इत्याह तस्मादग्निः सर्वा दिशोऽनु वि भात्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्या असुर्यं पात्रमना-

(वह्निपशवः)

च्छृणणमाच्छृणत्ति देवत्राऽर्करजक्षीरेणाऽऽच्छृ-
णत्ति परमं वा एतत्पयो यदजक्षीरं परमेणै-
वैनां पयसाऽऽच्छृणत्ति यजुषा व्यावृत्त्यै
छन्दोभिरा च्छृणत्ति छन्दोभिर्वा एषा क्रियते
छन्दोभिरेव छन्दाꣳस्या च्छृणत्ति (४)॥

(आह देवानां वै पत्नीः पृणेषा षट् च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः)।

एकविꣳशत्या माषैः पुरुषशीर्षमच्छैत्य-
मेध्या वै माषा अमेध्यं पुरुषशीर्षममेध्यैरेवा-
स्यामेध्यं निरवदाय मेध्यं कृत्वाऽऽहरत्येकावि ꣳ-
शतिर्भवन्त्येकविꣳशो वै पुरुषः पुरुषस्याऽऽप्त्यै
व्यृद्धं वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्षꣳ सप्तधा
वितृण्णां वल्मीकवपां प्रति नि दधाति सप्त
वै शीर्षण्याः प्राणाः प्राणैरेवैनत्समर्धयति मे-
ध्यत्वाय यावन्तः (१) वै मृत्युबन्धवस्तेषां
यम आधिपत्यं परियाय यमगाथाभिः परि
गायति यमादेवैनद्वृङ्क्ते तिसृभिः परि गायति
त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते
तस्माद्गायते न देयं गाथा हि तद्वृङ्क्तेऽग्निभ्यः
पशूना लभते कामा वा अग्नयः कामानेवाव

रुन्धे यत्पशून्नालभेतानवरुद्धा अस्य (२) पशवः स्युर्यत्पर्यग्निकृतानुत्सृजेद्यज्ञवेशसं कुर्याद्यात्सँ स्थापयेद्यातयामानि शीर्षाणि स्युर्यत्पशूनालभते तेनैव पशूनव रुन्धे यत्पर्यग्निकृतानुत्सृजति शीर्ष्णामयातयामत्वाय प्राजापत्येन सँ स्थापयति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रति ष्ठापयति प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एता आप्रीरपश्यत्ताभिर्वै स मुखतः (३) आत्मानमाऽप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापतिर्यज्ञमेवैताभिर्मुखत आ प्रीणात्यपरिमितछन्दसो भवन्त्यपरिमितः प्रजापतिः प्रजापतेराप्त्या ऊनातिरिक्ता मिथुनाः प्रजात्यै लोमशं वै नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाव रुन्धे सर्वाणि वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्यै क्रियन्ते तस्मादेता अग्नेश्चित्यस्य (४) भवन्त्येकविँशतिँ सामिधेनीरन्वाह रुग्वा एकविँशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविँशश्चतुर्विँशतिमन्वाह चतुर्विँशतिरर्धमासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे पराचीरन्वाह पराङिव हि सुवर्गो लोकः समास्त्वाऽग्न ऋतवो वर्धयन्त्वित्याह

(उख्यस्य जननम्)

समाभिरेवाग्निं वर्धयति (५) ऋतुभिः संवत्सरं विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह तस्मादग्निः सर्वा दिशोऽनु वि भाति प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवास्मादप नुदत्युद्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादप हन्त्यगन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति न संवत्सरस्तिष्ठति नास्य श्रीस्तिष्ठति यस्यैताः क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुख्यात्यै (६) ।

(यावन्तोऽस्य मुखतश्चितयस्य वर्धयत्यादित्योऽष्टविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठके नवमोऽनुवाकः) ।

षड्भिर्दीक्षयति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयति सप्तभिर्दीक्षयति सप्त छन्दांसि छन्दोभिरेवैनं दीक्षयति विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमैकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः (१)

(उख्यस्य जननम्)

प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजा-
पतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै यदर्चिषि
प्रवृञ्ज्याद्भूतमव रुन्धीत यदङ्गारेषु भविष्यद-
ङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुन्धे भवि-
ष्यद्धि भूयो भूताद्द्वाभ्यां प्र वृणक्ति द्विपाद्य-
जमानः प्रतिष्ठित्यै ब्रह्मणा वा एषा यजुषा
संभृता यदुखा सा यद्भिद्येताऽऽर्तिमार्च्छेत् (२)
यजमानो हन्येतास्य यज्ञो मित्रैतामुखां तपे-
त्याह ब्रह्म वै मित्रो ब्रह्मन्नेवैनां प्रति ष्ठापयति
नाऽऽर्तिमार्च्छति यजमानो नास्य यज्ञो हन्यते
यदि भिद्येत तैरेव कपालैः सꣳ सृजेत्सैव ततः
प्रायश्चित्तिर्यो गतश्रीः स्यान्मथित्वा तस्याव
दध्याद्भूतो वा एष स स्वाम् (३) देवता-
मुपैति यो भूतिकामः स्याद्य उखायै संभवेत्स
एव तस्य स्यादतो ह्येष संभवत्येष वै स्वयंभू-
र्नाम भवत्येव यं कामयेत भ्रातृव्यमस्मै जन-
येयमित्यन्यतस्तस्याऽऽहृत्याव दध्यात्साक्षादे-
वास्मै भ्रातृव्यं जनयत्यम्बरीषादन्नकामस्याव
दध्यादम्बरीषे वा अन्नं भ्रियते सयोन्येवान्नम्
(४) अव रुन्धे मुञ्जानव दधात्यूर्ग्वै मुञ्जा
ऊर्जमेवास्मा अपि दधात्यग्निर्देवेभ्यो निलायत
स क्रुमुकं प्राविशत्क्रुमुकमव दधाति यदेवास्य
तत्र न्यक्तं तदेवाव रुन्ध आज्येन सं यौत्येतद्वा

(उख्यधारणम्)

अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा (५) वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुप तिष्ठते त्रय इमे लोका एष्वेव लोकेष्वाविदं गच्छत्यथो प्राणानेवाऽऽत्मन्धत्ते (६) ॥

(प्रजापतिर्ऋच्छेत्स्वामेवास्नं तेजसा चतुस्त्रिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठके दशमोऽनुवाकः) ।

न ह स्म वै पुराऽग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्षिरस्वदयद्यदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदौदुम्बरीमा दधात्यूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपि दधाति प्रजापतिरग्निमसृजत तꣳ सृष्टꣳ रक्षाꣳसि (१) अजिघाꣳसन्त्स एतद्राक्षोघ्नमपश्यत्तेन वै स रक्षाꣳस्यपाहत यद्राक्षोघ्नं भवत्यग्नेरेव तेन जाताद्रक्षाꣳस्यप हन्त्याश्वत्थीमा दधात्यश्वत्थो वै वनस्पतीनाꣳ सपत्नसाहो विजित्यै वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीमयीमा

(उख्यधारणम्)

दधाति शान्त्यै सꣳशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरी (२) वाचयति ब्रह्मणैव क्षत्रꣳ सꣳ श्यति क्षत्रेण ब्रह्म तस्माद्ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं तस्माद्राजन्यो ब्राह्मणवानत्यन्यꣳ राजन्यं मृत्युर्वा एष यदग्निरमृतꣳ हिरण्यꣳ रुक्ममन्तरं प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्त एकविꣳशतिनिर्बाधो भवत्येकविꣳशतिर्वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्यः (३) एकविꣳश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति निर्बाधैर्वै देवा असुरान्निर्बाधेऽकुर्वत तान्निर्बाधानां निर्बाधत्वं निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते सावित्रिया प्रति मुञ्चते प्रसूत्यै नक्तोषासेत्युत्तरयाऽहोरात्राभ्यामेवैनमुद्यच्छते देवा अग्निं धारयन्द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य (४) प्राणैर्दाधाराऽऽसीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति षड्डुद्यामꣳ शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैनमुद्यच्छते यद्द्वादशोद्यामꣳ संवत्सरेणैव मौञ्जं भवत्यूर्ग्वै मुञ्जा

(अश्वमेधसंबन्धिप्रयाजयाज्याभिधानम्)

ऊर्जैवैनꣳ समर्धयति सुपर्णोऽसि गरुत्मानित्य-
वेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टे दिवं
गच्छ सुवः पतेत्याह सुवर्गमेवैनं लोकं गम-
यति (५) ।

(रक्षाꣳस्यौदुम्बरी आदित्य उद्यत्य सं चतुर्विꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः) ।

समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधु-
मत्पिन्वमानः । वाजी वहन्वाजिनं जातवेदो
देवानां वक्षि प्रियमा सधःस्थम् । घृतेनाञ्जन्सं
पथो देवयानान्प्रजानन्वाज्यप्येतु देवान् । अनु
त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यज-
मानाय धेहि । ईड्यश्चासि वन्द्यश्च वाजिन्ना-
शुश्चासि मेध्यश्च सप्ते । अग्निष्ट्वा (१) देवैर्व-
सुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ।
स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं
पृथिव्याम् । देवेभिर्युक्तमदितिः सजोषाः
स्योनं कृण्वाना सुविते दधातु । एता उ वः
सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा
उदातैः । ऋष्वाः सतीः कवषः शुम्भमाना
द्वारो देवीः सुप्रायणा भवन्तु । अन्तरा मित्राव-

(अश्वमेधसंबन्धिप्रयाजयाज्याभिधानम्)

रुणा चरन्ती मुखं यज्ञानामभि संविदाने। उषासा वाम् (२) सुहिरण्ये सुशिल्पे ऋतस्य योना-विह सादयामि । प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा । अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता । आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत् । इडोप-हूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त । त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः (३) त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः । अश्वो घृतेन त्मन्या समक्त उप देवाꣳ ऋतुशः पाथ एतु । वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् । प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने । स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः (४) ॥

(अग्निष्टुर्वा वामश्वो द्विचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

सावित्राणि व्यृद्धमुत्क्राम देवस्य खनति क्रूरं वारुणः सप्तभिरेकविꣳशत्या षड्भिर्न ह स्म समिद्धो अञ्जन्नेकादश ॥ ११ ॥

(अश्वमेधसंबन्धिप्रयाजयाज्याभिधानम्)

सावित्राण्युल्कामि क्रूरं वारुणः पशवः स्युर्न ह स्म नव-

पञ्चाशत् ॥ ५९ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके

प्रथमः प्रपाठकः ॥ १ ॥

अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये

पञ्चमः काण्डः ।

(तत्र प्रथमप्रपाठके प्रथमाद्येकादशान्ता अनुवाकाः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
चतुर्थकाण्डे चित्यर्थमन्त्राः सर्वत्र वर्णिताः ।
ब्राह्मणं पञ्चमे काण्डे तत्र सप्त प्रपाठकाः ॥
मन्त्रव्याख्या चतुर्थादौ शिष्टसौपानुवाक्यगम् ।
एकादशानुवाकाः स्युराद्येऽर्थास्त्वेवमीरिताः ॥
सावित्राहुतिरग्नेश्च स्वीकारः प्रथमे भवेत् ।
द्वितीये मृत्खनं गच्छन्नश्वेनाऽऽक्रमयेद्ध्रुवम् ॥
तृतीये तूत्क्रमव्याश्वं भूसंस्कारो जलादिभिः ।
चतुर्थे तु मृदं खात्वा संभरेच्चर्मपत्रयोः ॥
पञ्चमे संभृतामेतां यज्ञभूमौ समाहरेत् ।
षष्ठे तूखां निर्मिमीत सप्तमे संस्करोति ताम् ॥
अष्टमे पशवो वह्नेरुख्यस्य नवमे जनिः ।
उख्यं दधीत दशमे स्यादन्त्यश्चाऽऽश्वमेधिकः ॥
अभ्येतुमनुवाकोऽत्र प्रोक्त उत्कृष्यतां ततः ।
समिद्ध इत्येवमाद्या अश्वस्याऽऽप्रिय ईरिताः ॥
आप्रियः स्युः प्रयाजानां याज्या एकादशात्र ताः ।
अश्वमेधाख्यकाण्डे ता विनियुक्ताः स्फुटं श्रुतम् ॥

(अश्वमेधसंबन्धिप्रयाजयाज्याभिधानम्)

एवं हि श्रूयते—" समिद्धो अञ्जन्कृदरं मतीनामित्यश्वस्याऽऽप्रियो भवन्ति सरूपत्वाय " इति । तत्र प्रथमामृचमाह—

समिद्धो अञ्जन्निति । हे जातवेदोऽग्ने वाजिनमश्वं वहन्वह देवान्प्रापये-त्यर्थः । कीदृशोऽग्निः, समिद्धः सम्यक्प्रदीप्तः। वाज्यन्नवानन्नसंपादक इत्यर्थः । किं कुर्वन्, मतीनां कृदरमञ्जन् । कृदरशब्दो धान्यानामावापनं कुसूलादिकमा-चष्टे । मतीनामभिज्ञानां कृदरं कुसूलस्थानीयं त्वक्स्वरूपमञ्जन्प्रकाशयन् । मधु-मन्मधुरं घृतं पिन्वमानः पिबन् । तथा देवार्थं सर्वाणि हवींषि वहन् । कीदृशं वाजिनं, देवानां प्रियं प्रीतिहेतुम् । आसधःस्थं सर्वतः पश्वन्तरैः सह स्थितम् । अत एवाश्वमेधकाण्डे समाम्नास्यते—" आग्नेयं कृष्णग्रीवं पुरस्ताल्ललाटे " इत्यादि । अथ द्वितीयामृचमाह—

घृतेनाञ्जन्निति । अयं वाजी देवानप्येतु प्राप्नोतु । किं कुर्वन्, घृतेन स्वस्योपरिभूतेनाऽऽज्येन देवयानान्पथो देवलोकस्थितान्मार्गान्समञ्जन्सम्यग्व्यक्ती-कुर्वन् । प्रजानंस्तेन घृतलाञ्छनेन मार्गो यथा ज्ञायते तथा कुर्वन् । हे सप्तेऽश्व प्रदिशः प्रकृष्टाः सर्वा दिशस्त्वा त्वामनुसृत्य सचन्तां, सर्वतोऽस्यो भवन्तु देवप्राप्तावानुकूल्यमेव कुर्वन्तु । त्वं चास्मै यजमानाय स्वधां स्वधा-कारोपलक्षितमन्नं धेहि संपादय । अथ तृतीयामृचमाह—**ईड्यश्चासीति** ।

हे वाजिन्नश्व त्वमस्माभिरीड्यश्च स्तोतव्यश्च वन्द्यश्च नमस्कार्यश्चासि । हे सप्तेऽश्वाऽऽशुश्च शीघ्रगामी च मेध्यश्च यागयोग्यश्चासि । जातवेदा अग्निस्त्वा त्वां वहतु देवान्प्रापयतु । कीदृशोऽग्निः, वसुभिर्जगन्निवासहेतुभिर्देवैः सजोषाः समानप्रीतिः । कीदृशं त्वां, प्रीतं प्रीतिविषयं वह्निं वोढारम् ।

अथ चतुर्थीमृचमाह—

स्तीर्णं बर्हिरिति । अदितिर्भूमिर्देवी सुविते शोभनप्राप्तियोग्ये स्थाने दधा-त्वश्वं स्थापयतु । कीदृश्यदितिः, बर्हिर्जुषाणा दर्भं पूर्णं सेवमाना । कीदृशं बर्हिः, स्तीर्णं संज्ञपनायाश्वं शाययितुमास्तीर्णं, सुष्टरीम सुष्ठु स्तरणयोग्यं, पृथि-व्यां भूमावुरु बहुलं यथा भवति तथा, पृथ्वतिविस्तृतं यथा भवति तथा प्रथ-मानं प्रसारितम् । तथेयमदितिर्देवेभिः सर्वैर्देवैः सजोषाः समानप्रीतिः । तथा युक्तं योग्यं स्योनं सुखकरं स्थानं कृण्वाना कुर्वती । अथ पञ्चमीमृचमाह—

एता उ व इति । एता अपि द्वारो देवीर्द्वाराख्या देव्यः सुप्रायणा भवन्तु

(अश्वमेधसंबन्धिप्रयाजयाज्याभिधानम्)

शुद्धस्याश्वस्य प्रापिका भवन्तु । कीदृश्यो देव्यः, वो युष्माकमृत्विग्यजमानानां सुभगाः सौभाग्यप्रदा विश्वरूपा बहुविधरूपयुक्ता अतिरातानि सततगमनसाधनानि वाहनानि तैः पक्षोभिः पक्षस्थानीयैर्गतैर्विशेषेणोच्छ्रयमाणा ऊर्ध्वं गच्छन्त्य ऋष्वाः सर्वैर्गमनागमनयोग्याः सत्यः कवषः कवाटैः शुम्भमानाः शोभमानाः । द्वाराभिमानिन्यो हि देव्यः कपाटसमीपे वर्तमानाः शोभन्ते ।

अथ षष्ठीमृचमाह——

अन्तरा मित्रावरुणेति । हे उषासोषःशब्दोपलक्षिते अहोरात्रे देवते त्वां युवामृतस्य योनौ यज्ञस्य कारण इहाश्वे सादयामि स्थापयामि । कीदृश्यावहोरात्रदेवते, मित्रावरुणरूपे । अत एवान्यत्राऽऽम्नातम्—"मैत्रं वा अहः । वारुणी रात्रिः" इति । अन्तरा चरन्ती ब्रह्माण्डस्य मध्ये वर्तमाने यज्ञानां मुखमभि संविदाने यज्ञप्रारम्भमभिलक्ष्य परस्परमैकमत्ययुक्ते सुहिरण्ये शोभनहिरण्यवत्सूर्यचन्द्रप्रकाशयुक्ते सुशिल्पे सर्वव्यवहारहेतुत्वेन शोभनैः शिल्पैरुपेते ।

अथ सप्तमीमृचमाह——

प्रथमा वामिति । हे दंपती यजमानपत्न्यौ वां युवयोरर्थे होतारा देवानां मध्ये यौ होतारौ तावुभावपिमयं प्रीणयामि । कीदृशौ, प्रथमा प्रथमौ मुख्यौ, सरथिना समान एको रथः सरथस्तद्वन्तौ, सुवर्णा शोभनवर्णोपेतौ, देवौ दीप्यमानौ, विश्वा भुवनानि सर्वांल्लोकान्पश्यन्तौ, वां चोदना मिमाना युवयोर्विहितानि कर्माणि प्रमितवन्तौ, प्रदिशा प्रकृष्टासु दिक्षु ज्योतिर्दिशन्ता स्वकीयं प्रकाशं प्रसारयन्तौ । अथाष्टमीमृचमाह——

आदित्यैर्न इति । भारती भारत्याख्या देव्यादित्यैः सह नोऽस्मदीयं यज्ञं वष्टु कामयताम् । सरस्वती सरस्वत्याख्या देवी रुद्रैः सह नोऽस्मानाविक्षतु । इडाख्या देवी वसुभिः सह सजोषाः समानप्रीतिरुपहूताऽनुज्ञाता सत्यस्मानवतु । देवीर्हे देव्यः सर्वं नोऽस्मदीयं यज्ञममृतेषु मरणरहितेषु देवेषु धत्त स्थापयत ।

अथ नवमीमृचमाह——त्वष्टा वीरमिति ।

त्वष्टा त्वष्टृनामको देवो देवकामं देवान्कामयमानं वीरं कर्मसु शूरं पुत्रं जजानोत्पादयामास । स त्वष्टुः प्रकाशादर्वा गमनकुशल आशुः शीघ्रगाम्यश्वो जायते । किं बहुना, त्वष्टेदं विश्वं भुवनं सर्वमपि लोकं जजान जनयामास । हे होतर्बहोर्बहुलस्य जगतः कर्तारं त्वष्टारमिहास्मिन्कर्मणि यक्षि यज ।

(आसन्यां वह्निस्थापनं वात्सप्रेणोपस्थानं च)

अथ दशमीमृचमाह—

अश्वो घृतेनेति। अयमश्वस्त्मन्याऽऽत्मना स्वयमेव घृतेन सक्तो घृताक्त इव रुचिकरः सन्पाथो देवानामन्नं भूत्वर्तुशस्तत्तदृतुकाले देवानृतु प्राप्नोतु। वनस्पतिरेतन्नामको देवो देवलोकं प्रजानन्प्रकर्षेणावगच्छन्नग्निना सह स्वदितानि हव्या स्वादुभूतानि हवींषि वक्षद्वहतु देवान्प्रापयतु। अथैकादशीमृचमाह—

प्रजापतेरिति। हेऽग्ने त्वं प्रजापतेर्जगदीश्वरस्य तपसा पर्यालोचनेन वावृधानो वर्धमानस्त्वं जात उत्पन्नः सद्यस्तदानीमेव यज्ञं दधिषे धारयासि। स्वाहाकृतेन स्वाहाकारसमर्पितेन हविषा सह पुरोगा अग्रतो गच्छन्याहि देवान्प्राप्नुहि। साध्या अस्माभिः साधनीयाः पूजनीया देवा इदमस्माभिः समर्पितं हविरदन्तु भक्षयन्तु। अत्र विनियोगसंग्रहः—

सामिद्ध इत्याप्रियः स्युरश्वस्यैकादशोदिताः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे प्रथमप्रपाठके प्रथमाद्येकादशान्ता अनुवाकाः ॥ १—११ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे प्रथमः प्रपाठकः ॥ १ ॥

(अथ पञ्चमाष्टके द्वितीयः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

*विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकान॑-

---

*एतदाद्यनुवाकदशकं चतुर्थकाण्डगतद्वितीयप्रपाठकतृतीयप्रपाठकस्थानुवाकत्रयस्य व्याख्यानेन सह व्याख्यातत्वादत्र पुनर्न व्याख्यातं भाष्यकृता। अतस्तद्व्याख्यानं तत्रैव द्रष्टव्यम्। एतदनुवाकदशकविषयाणां संक्षेपेण प्रदर्शनमेकादशानुवाकभाष्यारम्भे भट्टभास्करेण कृतमस्ति तदपि तत्र द्रष्टव्यम्।

(आसन्द्यां वह्निस्थापनं वात्सप्रेणोपस्थानं च)

नपजय्यमभ्यंजयन्यद्विष्णुक्रमान्क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशश्छन्दोभिरेवमाँल्लोकान्यथापूर्वमभि जयति प्रजापतिरग्निमसृजत सोऽस्मात्सृष्टः (१) पराङैत्तमेतयाऽन्वदक्रन्ददिति तया वै सोऽग्नेः प्रियं धामावारुन्ध यदेतामन्वाहाग्नेरेवैतया प्रियं धामाव रुन्ध ईश्वरो वा एष पराङ्प्रदघो यो विष्णुक्रमान्क्रमते चतसृभिरा वर्तते चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रियामेवास्य तनुवमभि (२) पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते शुनःशेपमाजीगर्तिं वरुणोऽगृह्णात्स एतां वारुणीमपश्यत्तया वै स आत्मानं वरुणपाशादमुञ्चद्वरुणो वा एतं गृह्णाति य उखां प्रतिमुञ्चत उदुत्तमं वरुण पाशमस्मदित्याहाऽऽत्मानमेवैतया (३) वरुणपाशान्मुञ्चत्या त्वाऽहार्षमित्याहाऽऽ ह्येनꣳ हरति ध्रुवस्तिष्ठाविचाचलिरित्याह प्रतिष्ठित्यै विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैनꣳ समर्धयत्यस्मिन्राष्ट्रमधि श्रयेत्याह राष्ट्रमेवास्मिन्ध्रु-

(आसन्द्यां वह्निस्थापनं वात्सप्रेणोपस्थानं च)

वर्मकर्यं कामयेत राष्ट्रꣳ स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवति (४) अग्ने बृहन्नुषसा-मूर्ध्वो अस्थादित्याहाग्रमेवैनꣳ समानानां क-रोति निर्जग्मिवान्तमस इत्याह तम एवास्मा-दप हन्ति ज्योतिषाऽगादित्याह ज्योतिरेवा-स्मिन्दधाति चतसृभिः सादयति चत्वारि छन्दाꣳसि छन्दोभिरेवातिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैनꣳ समा-नानां करोति सद्वती (५) भवति सत्त्व-मेवैनं गमयति वात्सप्रेणोप तिष्ठत एतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामावारुन्धाग्नेरे-वैतेन प्रियं धामाव रुन्ध एकादशं भवत्येकधैव यजमाने वीर्यं दधाति स्तोमेन वै देवा अस्मि-ल्लोँक आर्ध्नुवञ्छन्दोभिरमुष्मिन्त्स्तोमस्येव खलु वा एतद्रूपं यद्वात्सप्रं यद्वात्सप्रेणोपतिष्ठते (६) इममेव तेन लोकमभि जयति यद्विष्णुक्रमा-न्क्रमतेऽमुमेव तैर्लोकमभि जयति पूर्वेद्युः प्र क्रामत्युत्तरेद्युरुप तिष्ठते तस्माद्योगेऽन्यासां प्रजानां मनः क्षेमेऽन्यासां तस्माद्यायावरः क्षेम्यस्येशे तस्माद्यायावरः क्षेम्यमध्यवस्यति मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै (७) ॥

(सृष्टोऽग्न्यन्तयो भवति सद्वत्युपतिष्ठते द्विचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(उख्याग्निनयनम्)

(अथ पञ्चमाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः) ।

अन्नपतेऽन्नस्य नो देहीत्याहाग्निर्वा अन्नपतिः स एवास्मा अन्नं प्रयच्छत्यनमीवस्य शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याहाऽऽशिषमेवैतामा शास्त उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः (१) प्राणैरेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैन९ँ समर्धयति चतसृभिरा सादयति चत्वारि छन्दा९ँसि छन्दोभिरेवातिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैन९ँ समानानां करोति सद्वती भवति सत्त्वमेवैनं गमयति प्रेदग्ने ज्योतिष्मान् (२) याहीत्याह ज्योतिरेवास्मिन्दधाति तनुवा वा एष हिनस्ति य९ँ हिनस्ति मा हि९ँसीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैन९ँ शमयति रक्षा९ँसि वा एतद्य-ज्ञ९ँ सचन्ते यदन उत्सर्जत्यक्रन्ददित्यन्वाह रक्षसामपहत्या अनसा वहन्त्यपचितिमेवास्मिन्दधाति तस्मादनस्वी च रथी चातिथीनामपचिततमौ (३) अपचितिमान्भवति य एवं वेद समिधाऽग्निं दुवस्यतेति घृतानुषिक्तामवसिते समिधमा दधाति यथाऽतिथय आगताय

(गार्हपत्यचयनम्)

सर्पिर्वदातिथ्यं क्रियते ताहगेव तद्गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्योऽप्सु भस्म प्र वेशयत्यप्सुयोनिर्वा अग्निः स्वामेवैनं योनिं गमयति तिसृभिः प्र वेशयति त्रिवृद्धि (४) अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति परा वा एषोऽग्निं वपति योऽप्सु भस्म प्रवेशयति ज्योतिष्मतीभ्यामव दधाति ज्योतिरेवास्मिन्दधाति द्वाभ्यां प्रतिष्ठित्यै परा वा एष प्रजां पशून्वपति योऽप्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति प्रजामेव पशूनात्मन्धत्ते पुनस्त्वाऽऽदित्याः (५) रुद्रा वसवः समिन्धतामित्याहैता वा एतं देवता अग्रे समैन्धत ताभिरेवैनꣳ समिन्धे बोधा स बोधीत्युप तिष्ठते बोधयत्येवैनं तस्मात्सुप्त्वा प्रजाः प्र बुध्यन्ते यथास्थानमुप तिष्ठते तस्माद्यथास्थानं पशवः पुनरेत्योप तिष्ठन्ते (६)॥

(वै विश्वे देवा ज्योतिष्मानपचितमो त्रिवृद्धा आदित्या द्विचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः)।

यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं देवयजनमस्या अनिर्या-

(गार्हपत्यचयनम्)

त्यग्निं चिनुते यमायैनꣳ स चिनुतेऽपेतेत्यध्य-
वसाययति यममेव देवयजनमस्यै नियाच्याऽऽ-
त्मनेऽग्निं चिनुत इष्वग्रेण वा अस्या अनामृ-
तमिच्छन्तो नाविन्दन्ते देवा एतद्यजुरपश्य-
न्नपेतेति यदेतेनाध्यवसाययति (१) अनामृत
एवाग्निं चिनुत उद्धन्ति यदेवास्या अमेध्यं
तदप हन्त्यपोऽवोक्षति शान्त्यै सिकता नि
वपत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव
वैश्वानरमव रुन्ध ऊषान्नि वपति पुष्टिर्वा एषा
प्रजननं यदूषाः पुष्ट्यामेव प्रजननेऽग्निं चिनु-
तेऽथो संज्ञान एव संज्ञानꣳ ह्येतत् (२)
पशूनां यदूषा द्यावापृथिवी सहाऽऽस्तां ते
वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति
यदमुष्या यज्ञियमासीत्तदस्यामदधात्त ऊषा
अभवन्यदस्या यज्ञियमासीत्तदमुष्यामदधात्त-
ददश्चन्द्रमसि कृष्णमूषान्निवपन्नदो ध्यायेद्द्या-
वापृथिव्योरेव यज्ञियेऽग्निं चिनुतेऽयꣳ सो
अग्निरिति विश्वामित्रस्य (३) सूक्तं भवत्ये-
तेन वै विश्वामित्रोऽग्नेः प्रियं धामावारुन्धाग्ने-
रेवैतेन प्रियं धामाव रुन्धे छन्दोभिर्वै देवाः
सुवर्गं लोकमायन्च(श्च)तस्रः प्राचीरुप दधाति
चत्वारि छन्दाꣳसि छन्दोभिरेव तद्यजमानः
सुवर्गं लोकमेति तेषाꣳ सुवर्गं लोकं यतां
दिशः समम्लीयन्त ते द्वे पुरस्तात्समीची

(गार्हपत्यचयनम्)

उपादधत द्वे (४) पश्चात्समीची ताभिर्वै ते दिशोऽदृश्हन्यद्द्वे पुरस्तात्समीची उपदधाति द्वे पश्चात्समीची दिशां विधृत्या अथो पशवो वै छन्दाꣳसि पशूनेवास्मै समीचो दधात्यष्टा-वुप दधात्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावा-नेवाग्निस्तं चिनुतेऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्री सुवर्गं लोकमञ्जसा वेद सुवर्गस्य लो-कस्य (५) प्रज्ञात्यै त्रयोदश लोकंपृणा उप-दधात्येकविꣳशतिः सं पद्यन्ते प्रतिष्ठा वा एक-विꣳशः प्रतिष्ठा गार्हपत्य एकविꣳशस्यैव प्रतिष्ठां गार्हपत्यमनु प्रति तिष्ठति प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद पञ्चचितीकं चिन्वीत प्रथमं चिन्वानः पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे त्रिचि-तीकं चिन्वीत द्वितीयं चिन्वानस्त्रय इमे लोका एष्वेव लोकेषु (६) प्रति तिष्ठत्येकचि-तीकं चिन्वीत तृतीयं चिन्वान एकधा वै सुवर्गो लोक एकवृतैव सुवर्गं लोकमेति पुरी-षेणाभ्यूहति तस्मान्माꣳसेनास्थि छन्नं न दुश्चर्मा भवति य एवं वेद पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशा-क्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति (७) ॥

(अध्यवसाययति सैतद्विधाभिरस्यादधत द्वे लोकस्य लोकेषु सप्तचत्वारिꣳशच्च) ।

(उख्याग्निसंवपनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

वि वा एतौ द्विषाते यश्च पुराऽग्निर्यश्चो-
खायाꣳ समितामिति चतसृभिः सं नि वपति
चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः
प्रिया तनूः प्रिययैवैनौ तनुवा सꣳ शास्ति
समितमित्याह तस्माद्ब्रह्मणा क्षत्रꣳ समेति य-
त्संन्यूप्य विहरति तस्माद्ब्रह्मणा क्षत्रं व्येत्यृ-
तुभिः (१) वा एतं दीक्षयन्ति स ऋतुभिरेव
विमुच्यो मातेव पुत्रं पृथिवी पुरीष्यमित्याहर्-
तुभिरेवैनं दीक्षयित्वर्तुभिर्वि मुञ्चति वैश्वानर्या
शिक्यमा दत्ते स्वदयत्येवैनं नैर्ऋतीः कृष्णास्ति-
स्रस्तुषपक्का भवन्ति निर्ऋत्यै वा एतद्भागधेयं
यत्तुषा निर्ऋत्यै रूपं कृष्णꣳ रूपेणैव निर्ऋ-
तिं निरवदयत इमां दिशं यन्त्येषा (२) वै
निर्ऋत्यै दिक्स्वायामेव दिशि निर्ऋतिं निर-
वदयते स्वकृत इरिण उप दधाति प्रदरे वैतद्वै
निर्ऋत्या आयतनꣳ स्व एवाऽऽयतने निर्ऋतिं
निरवदयते शिक्यमभ्युप दधाति नैर्ऋतो वै
पाशः साक्षादेवैनं निर्ऋतिपाशान्मुञ्चति तिस्र
उप दधाति त्रेधाविहितो वै पुरुषो यावानेव
पुरुषस्तस्मान्निर्ऋतिमव यजते पराचीरुप (३)

(क्षेत्रकर्षणम्)

दधाति पराचीरेवास्मान्निर्ऋतिं प्र णुदतेऽप्रतीक्षमा यन्ति निर्ऋत्या अन्तर्हित्यै मार्जयित्वोप तिष्ठन्ते मेध्यत्वाय गार्हपत्यमुप तिष्ठन्ते निर्ऋतिलोक एव चरित्वा पूता देवलोकमुपावर्तन्त एकयोप तिष्ठन्त एकधैव यजमाने वीर्यं दधाति निवेशनः संगमनो वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनं पशुभिः समर्धयन्ति (४) ॥

(ऋतुभिरेषा पराचीरुपाष्टाचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः) ।

पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितो यज्ञपरुषैवैनं वि मिमीते यावान्पुरुष ऊर्ध्वबाहुस्तावान्भवत्येतावद्वै पुरुषे वीर्यं वीर्येणैवैनं वि मिमीते पक्षी भवति न ह्यपक्षः पतितुमर्हत्यरत्निना पक्षौ द्राघीयाꣳसौ भवतस्तस्मात्पक्षप्रवयाꣳसि वयाꣳसि व्याममात्रौ पक्षौ च पुच्छं च भवत्येतावद्वै पुरुषे वीर्यम् (१) वीर्यसंमितो वेणुना वि मिमीत आग्नेयो वै वेणुः सयोनित्वाय यजुषा युनक्ति यजुषा कृषति व्यावृत्त्यै षड्गवेन कृषति षड्वा ऋतव ऋतुभिरेवैनं कृषति यद्द्वादशगवेन

(क्षेत्रकर्षणम्)

संवत्सरेणैवेयं वा अग्नेरतिदाहादबिभेत्सैतद्द्वि-
गुणमपश्यत्कृष्टं चाकृष्टं च ततो वा इमां नात्यं-
दहत्कृष्टं चाकृष्टं च (२) भवत्यस्या अन-
तिदाहाय द्विगुणं त्वा अग्निमुद्यन्तुमर्हतीत्याहु-
ष्कृष्टं चाकृष्टं च भवत्यग्नेरुद्यत्या एतावन्तो
वै पशवो द्विपादश्च चतुष्पादश्च तान्यत्प्राच
उत्सृजेद्रुद्रायापि दध्याद्यद्दक्षिणा पितृभ्यो नि
धुवेद्यत्प्रतीचो रक्षांसि हन्युरुदीच उत्सृजत्येषा
वै देवमनुष्याणां शान्ता दिक् (३) तामेवै-
नाननूत्सृजत्यथो स्वस्तिम । दिशमुत्सृजत्यसौ
वा आदित्यः प्राणः प्राणमेवैनाननूत्सृजति
दक्षिणा पर्यावर्तन्ते स्वमेव वीर्यमनु पर्यावर्तन्ते
तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो
आदित्यस्यैवाऽऽवृतमनु पर्यावर्तन्ते तस्मात्प-
राञ्चः पशवो वि तिष्ठन्ते प्रत्यञ्च आ वर्तन्ते
तिस्रस्तिस्रः सीताः (४) कृषति त्रिवृतमेव
यज्ञमुखे वि यातयत्योषधीर्वपति ब्रह्मणाऽन्नमव
रुन्धेऽर्केऽर्कश्चीयते चतुर्दशभिर्वपति सप्त ग्राम्या
ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्या
अन्नस्यान्नस्य वपत्यन्नस्यान्नस्यावरुद्ध्यै कृष्टे
वपति कृष्टे ह्योषधयः प्रतितिष्ठन्त्यनुसीतं वपति
प्रजात्यै द्वादशसु सीतासु वपति द्वादश मासाः
संवत्सरः संवत्सरेणैवास्मा अन्नं पचति यदग्नि-
चित् (५) अनवरुद्धस्याश्नीयादवरुद्धेन

(क्षेत्रे सिकतादिवापः)

र्व्यृध्येत ये वनस्पतीनां फलग्रहयस्तानिध्मेऽपि प्रोक्षेदनवरुद्धस्यावरुद्ध्यै दिग्भ्यो लोष्टान्त्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येऽग्निं चिनुते यं द्विष्याद्यत्र स स्यात्तस्यै दिशो लोष्टमा हरेदिषमूर्जमहमित आ दद इतीषमेवोर्जं तस्यै दिशोऽवरुन्धे क्षोधुको भवति यस्तस्यां दिशि भवत्युत्तरवेदिमुप वपत्युत्तरवेद्या॰ ह्यग्निश्चीयतेऽथो पशवो वा उत्तरवेदिः पशूनेवाव रुन्धेऽथो यज्ञपरुषोऽनन्तरित्यै (६)॥

(च भवत्येतावद्वै पुरुषे वीर्यं यत्कृष्टं चाकृष्टं च दिक्षीरो अग्निचिदेव पञ्चविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः)।

अग्ने तव श्रवो वय इति सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य सूक्तं सूक्तेनैव वैश्वानरमव रुन्धे षड्भिर्नि वपति षड्वा ऋतवः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे समुद्रं वै नामैतच्छन्दः समुद्रमनु प्रजाः प्र जायन्ते यदेतेन सिकता नि वपति प्रजानां प्रजननायेन्द्रः (1) वृत्राय वज्रं प्राहरत्स त्रेधा व्यभवत्स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयं येऽन्तःशरा अशीर्यन्त ताः शर्करा अभवन्

च्छर्कराणाꣳ शर्करत्वं वज्रो वै शर्कराः पशुरग्नि-
र्यच्छर्कराभिरग्निं परिमिनोति वज्रेणैवास्मै
पशून्परि गृह्णाति तस्माद्वज्रेण पशवः परिगृही-
तास्तस्मात्स्थेयानस्थेयसो नोप हरते त्रिस-
प्ताभिः पशुकामस्य (२) परि मिनुयात्सप्त
वै शीर्षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै
पशूनव रुन्धे त्रिणवाभिर्भ्रातृव्यवतस्त्रिवृतमेव
वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्या
अपरिमिताभिः परि मिनुयादपरिमितस्याव-
रुद्ध्यै यं कामयेतापशुः स्यादित्यपरिमित्य
तस्य शर्कराः सिकता व्यूहेदपरिगृहीत एवास्य
विषूचीनꣳ रेतः परा सिञ्चत्यपशुरेव भवति
(३) यं कामयेत पशुमान्स्यादिति परिमित्य
तस्य शर्कराः सिकता व्यूहेत्परिगृहीत एवास्मै
समीचीनꣳ रेतः सिञ्चति पशुमानेव भवति
सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्द-
धाति गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्म-
णस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः शंयुं
बार्हस्पत्यं मेधो नान्वविन्दत्सोऽग्निं प्राविशत्
(४) सोऽग्नेः कृष्णो रूपं कृत्वोदायत सोऽश्वं
प्राविशत्सोऽश्वस्यावान्तरशफोऽभवद्यदश्वमाक्रम-
यति य एव मेधोऽश्वं प्राविशत्तमेवाव रुन्धे
प्रजापतिनाऽग्निश्चेतव्य इत्याहुः प्राजापत्योऽश्वो

(रुक्माद्युपधानम्)

यदश्वमाक्रमयति प्रजापतिनैवाग्निं चिनुते पुष्क-रपर्णमुप दधाति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निं चिनुतेऽपां पृष्ठमसीत्युप दधा-त्यपां वा एतत्पृष्ठं यत्पुष्करपर्णꣳ रूपेणैवैनदुप दधाति (५) ॥

(इन्द्रः पशुकामस्य भवत्याविंशतिस्सयोनिं विंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः) ।

ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्म-मुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत्प्रजा यजमानः सृजते ब्रह्म जज्ञानमि-त्याह तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद ब्रह्मवादिनो वदन्ति न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्य इति यत्पृथिव्यां चिन्वीत पृथिवीꣳ शुचाऽर्पयेन्नौषधयो न वन-स्पतयः (१) प्र जायेरन्यदन्तरिक्षे चिन्वीता-न्तरिक्षꣳ शुचाऽर्पयेन्न वयाꣳसि प्र जायेरन्य-द्दिवि चिन्वीत दिवꣳ शुचाऽर्पयेन्न पर्जन्यो वर्षे-द्रुक्ममुप दधात्यमृतं वै हिरण्यममृत एवाग्निं चिनुते प्रजात्यै हिरण्मयं पुरुषमुप दधाति यजमानलोकस्य विधृत्यै यदिष्टकाया आतृ-

(स्रुगुपधानम्)

ण्णमनूपदध्यात्पशूनां च यजमानस्य च प्राणमपि दध्याद्दक्षिणतः (२) प्राञ्चमुप दधाति दाधारं यजमानलोकं न पशूनां च यजमानस्य च प्राणमपि दधात्यथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुत्सृष्ट्यै द्रप्सश्चस्कन्देत्यभि मृशति होत्रास्वेवैनं प्रति ष्ठापयति स्रुचावुप दधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दध्नः पूर्णामौदुम्बरीमियं वै कार्ष्मर्यमय्यसावौदुम्बरीमे एवोप धत्ते (३) तूष्णीमुप दधाति न हीमे यजुषाऽऽप्तुमर्हति दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुम्बरीं तस्मादस्या असावुत्तराऽऽज्यस्य पूर्णां कार्ष्मर्यमयीं वज्रो वा आज्यं वज्रः कार्ष्मर्यो वज्रेणैव यज्ञस्य दक्षिणतो रक्षांस्यप हन्ति दध्नः पूर्णामौदुम्बरीं पशवो वै दध्यूर्गुदुम्बरः पशुष्वेवोर्जं दधाति पूर्णे उप दधाति पूर्णे एवैनम् (४) अमुष्मिंल्लोक उप तिष्ठेते विराज्यग्निश्चेतव्य इत्याहुः स्रुग्वै विराड्यत्स्रुचावुपदधाति विराज्येवाग्निं चिनुते यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञं रक्षांसि जिघांसन्ति यज्ञमुखं रुक्मो यद्रुक्मं व्याघारयति यज्ञमुखादेव रक्षांस्यप हन्ति पञ्चभिर्व्याघारयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्माद्रक्षांस्यप हन्त्यक्ष्णया

(स्वयमातृण्णास्थापनम्)

र्व्याघारयति तस्माद्दक्षिणया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै (५) ॥

(वनस्पतयो दक्षिणतो धत्त एनं तस्माद्दक्षिणया पञ्च च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः)।

स्वयमातृण्णामुप दधातीयं वै स्वयमातृण्णेमामेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते प्रथमेष्टकोपधीयमाना पशूनां च यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या अग्नावग्निश्चेतव्य इत्याहुरेष वै (१) अग्निर्वैश्वानरो यद्ब्राह्मणस्तस्मै प्रथमामिष्टकां यजुष्कृतां प्र यच्छेत्तां ब्राह्मणश्चोपदध्यातामग्नावेव तदग्निं चिनुत ईश्वरो वा एष आर्तिमार्तोर्योऽविद्वानिष्टकामुपदधाति त्रीन्वरान्दद्यात्त्रयो वै प्राणाः प्राणानां स्तृत्यै द्वावेव देयौ द्वौ हि प्राणावेक एव देय एको हि प्राणः पशुः (२) वा एष यदग्निर्न खलु वै पशव आयवसे रमन्ते दूर्वेष्टकामुप दधाति पशूनां धृत्यै द्वाभ्यां प्रतिष्ठित्यै काण्डात्काण्डात्प्ररोहन्तीत्याह काण्डेनकाण्डेन ह्येषा प्रति-

तिष्ठन्देवा नो दूर्वे प्रतनु सहस्रेण शतेन
चेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै
देवलक्ष्मं वै त्र्यालिखिता तामुत्तरलक्ष्माणं
देवा उपादधताधरलक्ष्माणमसुरा यम् (३)
कामयेत वसीयान्त्स्यादित्युत्तरलक्ष्माणं तस्योप
दध्याद्वसीयानेव भवति यं कामयेत
पापीयान्त्स्यादित्यधरलक्ष्माणं तस्योप दध्या-
दसुरयोनिमेवैनमनु परा भावयति पापी-
यान्भवति त्र्यालिखिता भवतीमे वै लोका-
स्त्र्यालिखितेभ्य एव लोकेभ्यो भ्रातृव्यमन्त-
रेत्याङ्गिरसः सुवर्गं लोकं यतः पुरोडाशः कूर्मो
भूत्वाऽनु प्रासर्पत् (४) यत्कूर्ममुपदधाति
यथा क्षेत्रविदञ्जसा नयत्येवमेवैनं कूर्मः सुवर्गं
लोकमञ्जसा नयति मेधो वा एष पशूनां
यत्कूर्मो यत्कूर्ममुपदधाति स्वमेव मेधं पश्य-
न्तः पशव उपतिष्ठन्ते श्मशानं वा एतत्क्रियते
यन्मृतानां पशूनां शीर्षाण्युपधीयन्ते यज्जी-
वन्तं कूर्ममुपदधाति तेनाश्मशानचिदास्तव्यो
वा एष पशु (५) कूर्मो मधु वाता ऋतायत इति
दध्ना मधुमिश्रेणाभ्यनक्ति स्वदयत्येवैनं ग्राम्यं
वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रे-
णाभ्यनक्त्युभयस्यावरुद्ध्यै मही द्यौः पृथिवी
च न इत्याहाऽऽभ्यामेवैनमुभयतः परि
गृह्णाति प्राञ्चमुप दधाति सुवर्गस्य लोकस्य

(उलूखलादिस्थापनम्)

समष्ट्यै पुरस्तात्प्रत्यञ्चमुप दधाति तस्मात् (६) पुरस्तात्प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते यो वा अपनाभिमग्निं चिनुते यजमानस्य नाभिमनु प्र विशति स एनमीश्वरो हिꣳसि-तोरुलूखलमुप दधात्येषा वा अग्नेर्नाभिः सनाभिमेवाग्निं चिनुतेऽहिꣳसायै औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्जमेवाव रुन्धे मध्यत उप दधाति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुञ्जत इयद्भवति प्रजाप-तिना यज्ञमुखेन संमितमव हन्त्यन्नमेवाक-र्वैष्णव्यर्चोप दधाति विष्णुर्वै यज्ञो वैष्णवा वनस्पतयो यज्ञ एव यज्ञं प्रति ष्ठापयति (७) ॥

(एष वै पशुर्यमसर्पदेष यत्तस्मात्तस्मात्सप्तविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः) ।

एषां वा एतल्लोकानां ज्योतिः संभृतं यदु-खा यदुखामुपदधात्येभ्य एव लोकेभ्यो ज्यो-तिरव रुन्धे मध्यत उप दधाति मध्यत एवा-स्मै ज्योतिर्दधाति तस्मान्मध्यतो ज्योतिरु-पाऽऽस्महे सिकताभिः पूरयत्येतद्वा अग्नेर्वैश्वा-नरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे यं

(उखादिस्थापनम्)

कामयेत क्षोधुकः स्यादित्यूनां तस्योप (१) दध्यात्क्षोधुक एव भवति यं कामयेतानुपदस्य-दन्नमद्यादिति पूर्णां तस्योप दध्यादनुपदस्य-देवान्नमत्ति सहस्रं वै प्रति पुरुषः पशूनां यच्छति सहस्रमन्ये पशवो मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वायोखायामपि दधाति प्रतिष्ठामेवैनद्गमयति व्यृद्धं वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्षममृतं खलु वै प्राणाः (२) अमृतꣳ हिरण्यं प्राणेषु हिरण्यशल्कान्प्रत्यस्यति प्रतिष्ठामेवैनद्गमयित्वा प्राणैः समर्धयति दध्ना मधुमिश्रेण पूरयति मधव्योऽसानीति शृतातङ्क्येन मेध्यत्वाय ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेण पूरयत्युभयस्यावरुध्यै पशुशीर्षाण्युप दधाति पशवो वै पशुशीर्षाणि पशूनेवाव रुन्धे यं कामयेतापशुः स्यादिति (३) विषूचीनानि तस्योप दध्याद्विषूच एवास्मात्पशून्दधात्यपशुरेव भवति यं कामयेत पशुमान्स्स्यादिति समीचीनानि तस्योप दध्यात्समीच एवास्मै पशून्दधाति पशुमानेव भवति पुरस्तात्प्रतीचीनमश्वस्योप दधाति पश्चात्प्राचीनमृषभस्यापशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वानेवास्मै समीचो दधात्येतावन्तो वै पशवः (४) द्वि-

(प्रथमचितावपस्यायुपधानम्)

पाद॑श्च॒ चतु॑ष्पादश्च॒ तान्वा ए॒तद॒ग्नौ प्र द॑धाति॒ यत्प॑शुशी॒र्षाण्यु॑प॒दधा॑त्य॒मुमा॑र॒ण्यमनु॒ ते दि॑शा॒मीत्या॑ह ग्रा॒म्येभ्य॑ ए॒व प॒शुभ्य॑ आर॒ण्यान्प॒शूञ्छु॒चमनू॑त्सृजा॒ति तस्मा॑त्स॒मावत्प॑शू॒नां प्रजा॑यमानानामार॒ण्याः प॒शव॑ः कनी॑याꣳसः शु॒चा ह्यृ॒ताः स॒र्पशी॒र्षमु॒प द॒धाति॒ यैव स॒र्पे त्विषि॒स्तामे॒वाव॑ रुन्धे (५) यत्स॑मी॒चीनं॑ पशुशी॒र्षैरु॑प॒द॒ध्याद्ग्रा॒म्यान्प॒शून्दꣳशु॑काः स्यु॒र्यद्वि॑षू॒ची॒नमार॒ण्यान्यजु॑रे॒व व॑देद॒व तां त्विषि॑ꣳ रुन्धे॒ या स॒र्पे न ग्रा॒म्यान्प॒शून्हि॒नस्ति॒ नाऽऽर॒ण्याऩथो॒ ख॒लू॒प॒धेय॑मे॒व यदु॑प॒दधा॑ति॒ तेन॒ तां त्विषि॒मव॑ रुन्धे॒ या स॒र्पे यद्यजु॒र्वद॑ति॒ तेन॑ शा॒न्तम् (६) ॥

(ऊ॒र्मां तस्योप॑ प्रा॒णाः स्या॒दि॒ति॒ वै प॒शवो॑ रुन्धे॒ चतु॑श्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

प॒शुर्वा ए॒ष यद॒ग्निर्योनि॑ः खलु॒ वा ए॒षा प॒शोर्वि क्रि॑यते॒ यत्प्राची॑नमैष्ट॒काद्यजु॑ः क्रि॒यते॒ रेतो॑ऽप॒स्या॑ अप॒स्या॑ उप॑ दधाति॒ योना॑वे॒व रेतो॑ दधाति॒ पञ्चोप॑ दधाति॒ पाङ्क्ता॑ः प॒शव॑ः प॒शूने॒वास्मै॒ प्र ज॑नयति॒ पञ्च॑ दक्षि॒णतो॒ वज्रो॒ वा अ॑प॒स्या॑ वज्रे॑णै॒व य॒ज्ञस्य॑ दक्षिण॒तो रक्षाꣳ-

स्यर्प हन्ति पञ्च पश्चात् (१) प्राचीरुप दधाति पश्चाद्वै प्राचीनꣳ रेतो धीयते पश्चादे-वास्मै प्राचीनꣳ रेतो दधाति पञ्च पुरस्तात्प्र-तीचीरुप दधाति पञ्च पश्चात्प्राचीस्तस्मात्प्रा-चीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते पञ्चोत्तरतश्छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्त्स्वमायतनमभि पर्यूहत इयं वा अग्नेरतिदाहादबिभेत्सैताः (२) अपस्या अपश्यत्ता उपाधत्त ततो वा इमां नात्यदह-द्यदपस्या उपदधात्यस्या अनतिदाहायोवाच हेयमददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेददिति प्राणभृत उप दधाति रेतस्येव प्राणान्दधाति तस्माद्वदन्प्राणन्पश्य-ञ्छृण्वन्पशुर्जायतेऽयं पुरः (३) भुव इति पुरस्तादुप दधाति प्राणमेवैताभिर्दाधारायं द-क्षिणा विश्वकर्मेति दक्षिणतो मन एवैताभिर्दा-धारायं पश्चाद्विश्वव्यचा इति पश्चाच्चक्षुरेवैता-भिर्दाधारेदमुत्तरात्सुवरित्युत्तरतः श्रोत्रमेवैता-भिर्दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैता-भिर्दाधार दशदशोप दधाति सवीर्यत्वायाक्ष्ण-या (४) उप दधाति तस्मादक्ष्णया पशवोऽ-ङ्गानि प्र हरन्ति प्रतिष्ठित्यै याः प्राचीस्ताभि-र्वसिष्ठ आर्ध्नोद्या दक्षिणा ताभिर्भरद्वाजो याः प्रतीचीस्ताभिर्विश्वामित्रो या उदीचीस्ताभिर्ज-

(सूचीभिरसिपथक्लृप्तिः)

मद॒भिर्या ऊ॒र्ध्वास्ताभि॒र्वि॒श्वक॑र्मा॒ य ए॒वमे॒तासा॑-
मृद्धिं॒ वेद॒र्ध्नोत्ये॒व य आसा॑मे॒वं बन्धु॑तां॒ वेद॒
बन्धु॑मान्भवति॒ य आसा॑मे॒वं क्लृप्तिं॒ वेद॒ कल्प॑ते
(५) अस्मै॒ य आसा॑मे॒वमा॒यत॑नं॒ वेदा॒ऽऽय-
त॑नवान्भवति॒ य आसा॑मे॒वं प्र॑ति॒ष्ठां वेद॒ प्रत्ये॒व
ति॑ष्ठति प्राण॒भृत॑ उप॒धाय॑ सं॒यत॒ उप॑ दधाति
प्रा॒णाने॒वास्मि॑न्धि॒त्वा सं॒यद्भिः॒ सं य॑च्छति॒ तत्सं॒-
यतां॑ सं॒यत्त्वमथो॒ प्राण॑ ए॒वापा॒नं द॑धाति॒
तस्मा॑त्प्राणापा॒नौ सं च॑रतो॒ विषू॑ची॒रूपं॑ दधाति॒
तस्मा॒द्विष्व॑ञ्चौ प्राणापा॒नौ यद्वा अ॒ग्नेरसं॑यत॒म्
(६) अ॒सु॒व॒र्ग्य॑मस्य॒ तत्सु॑व॒र्ग्यो॑ऽग्निर्यत्सं॒यत॑
उप॒दधा॑ति॒ सम॒वैनं॑ यच्छति सुव॒र्ग्य॑मे॒वाक॑रृय-
वि॒र्वयः॑ कृ॒तम॒याना॒मित्या॑ह॒ वयो॑भिरे॒वाया॒नव॑
रु॒न्धेऽय॒र्वया॑ꣳसि स॒र्वतो॑ वा॒युम॑तीर्भवन्ति॒ तस्मा॑-
द॒यꣳ स॒र्वतः॑ पवते (७) ॥

(पञ्चा॒दे॒ताः पु॒रो॑ऽक्षणया॒ कल्प॑ते॒ऽसं॑यत॒ पञ्च॑त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः) ।

गा॒य॒त्री त्रि॒ष्टुब्जग॑त्यनु॒ष्टुक्प॒ङ्क्त्या स॒ह ।
बृ॒ह॒त्यु॑ष्णि॒हा क॒कुत्सू॒चीभिः॑ शिम्यन्तु त्वा ।
द्वि॒पदा॒ या चतु॑ष्पदा त्रि॒पदा॒ या च॒ षट्प॑दा ।
सछ॑न्दा॒ या च॒ विच्छ॑न्दाः सू॒चीभिः॑ शिम्यन्तु

(सूचीभिरसिपथवत्तिः)

त्वा । महानाम्नी रेवतयो विश्वा आशाः प्रसूवरीः । मेध्या विद्युतो वाचः सूचीभिः शिम्यन्तु त्वा । रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः । अश्वस्य वाजिनस्त्वचि सूचीभिः शिम्यन्तु त्वा नारीः (१) ते पत्नयो लोम वि चिन्वन्तु मनीषया । देवानां पत्नीर्दिशः सूचीभिः शिम्यन्तु त्वा । कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः (२) ॥

(नारीस्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमकाण्डे द्वितीयः प्रपाठकः) ।

(तत्र प्रथमाद्येकादशान्ता अनुवाकाः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
उख्याग्निः प्रथमे प्रोक्तो द्वितीये चित्युपक्रमः ।
द्वादशात्रानुवाकाः स्युरासन्द्यां वह्नयवस्थितिः ॥
वात्सप्रेणाभ्युपस्थानं प्रथमे समुदीरितम् ।
द्वितीये तूख्यनयनं गार्हपत्यं चिनोति हि ॥
तृतीये तु चतुर्थे तु उख्याग्निं तत्र संवपेत् ।
पञ्चमे कृषति क्षेत्रं षष्ठेऽत्र सिकतादिकम् ॥
वपेन्मुक्माद्युपादध्यात्सप्तमे चाष्टमे पुनः ।
स्थापयेत्स्वयमातृण्णामन्नादीन्नवमे तथा ॥

(सूचीभिरासिपथक्लृप्तिः)

अपरस्याश्च प्राणभूतस्तथाऽपानभूतश्चितौ ।
प्रथमायामुपादध्याद्दशमे तत्तमीरितम् ॥
एकादशद्वादशौ तु विज्ञेयावाश्वमेधिकौ ।
अश्वस्यासिपथाः कल्प्या गायत्रीत्यादिमन्त्रकैः ।
कस्त्वेत्यसिपथेऽश्वस्याऽऽच्छ्यत्त्वचं कुर्वतां द्वयम् ॥

कल्पः—"गायत्री त्रिष्टुबिति द्वाभ्यां सौवर्णीभिः सूचीभिर्महिष्यश्वस्यासिपथान्कल्पयति प्राक्क्रोडात्" इति ।

राज्ञः पत्न्यस्त्रिविधा उत्तमा मध्यमाऽधमा चेति । ताश्च महिषी वावाता परिवृक्तीत्येतन्नामधेयाः । ताश्च मृतस्याश्वस्यासिना छेदनाय तत्तत्स्थानेषु रेखाः सूचीभिः कुर्युः । तत्र महिष्याः प्रथमामृचमाह—

गायत्री त्रिष्टुबिति । गायत्र्यादिककुदन्तैः शब्दैरभिधेयाश्छन्दोदेवता हेऽश्व त्वां सौवर्णसूचीभिः शिम्यन्तु लिखन्तु । अथ द्वितीयामृचमाह—

द्विपदा येति । द्विपदादिरूपाणां मन्त्राणामभिमानिन्यस्तन्नामिका देवतास्त्वां सूचीभिः शिम्यन्तु लिखन्तु ।

कल्पः—" एवमुत्तराभ्यां राजतीभिर्वावाता प्रत्यक्क्रोडात्प्राङ्नाभेः " इति । यथा महिषी क्रोडात्प्राचीने मुखभागे लिखति एवं वावाता क्रोडनाभ्योर्मध्येऽनन्तरभाविना मन्त्रद्वयेन लिखेत् । तत्र प्रथममाह—

महानाम्नीति । महत्पौढं देवेष्वत्यन्तं प्रसिद्धं नाम यासां देवतानां ता महानाम्न्य एतन्नामधेयाः काश्चिद्देवताः । तथा रेवतयो धनवत्य एतन्नामिका देवताः । तथा प्रसुवरीः सर्वप्रसवहेतुभूता विश्वा आशाः सर्वा दिशो दिग्देवताः । तथा मेघेषु भवा मेघ्या विद्युदभिमानिन्यो देवताः । तथा वाचो गर्जनाभिमानिन्यो देवता हेऽश्व त्वां राजतीभिः सूचीभिः शिम्यन्तु लिखन्तु । अथ द्वितीयमाह—

रजता हरिणीरिति । रजता रौप्याः । हरिणीर्हिरण्मयाः । सीसा लोहमय्यः । युजो लेखनकर्मयोग्याः सूच्यः । अत एव वाजिनोऽन्नहेतोरश्वस्य त्वचि कर्मभिर्लेखनादिव्यापारैर्युज्यन्ते ताहशीभिः सूचीभिर्हेऽश्व त्वां लेखनकुशला

१ ख. °थे छित्त्वा त्वचमाकुर्व्यतो द्व° । २ क. घ. ङ. °र्व्यतो द्व° । ३ घ. ङ. च. कुत्सितसूची° ।

(विशसनाभिधानम्)

दैव्या अध्वर्यवस्त्वा छ्यन्तु वि च शासतु ।
गात्राणि पर्वशस्ते शिमाः कृण्वन्तु शिम्यन्तः ।
अर्धमासाः परूꣳषि ते मासाश्छ्यन्तु शिम्य-
न्तः । अहोरात्राणि मरुतो विलिष्टम् (१)
सूदयन्तु ते । पृथिवी तेऽन्तरिक्षेण वायुश्छिद्रं
भिषज्यतु । द्यौस्ते नक्षत्रैः सह रूपं कृणोतु
साधुया । शं ते परेभ्यो गात्रेभ्यः शमस्त्ववं-
रेभ्यः । शमस्थभ्यो मज्जभ्यः शमु ते तनुवे
भुवत् (२) ॥

(विलिष्टं त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

विष्णुमुखा अन्नपते यावती वै वि च पुरुषमात्रेणाग्ने तव श्रवो वयो ब्रह्म जज्ञानꣳ स्वयमातृण्णामेषां वै पशुर्गायत्री कस्त्वा द्वादश ॥ १२ ॥

विष्णुमुखा अग्नेचितिमान्वि वा इत्यविम्न तव श्रवः स्वयमातृण्णां विषूचीनानि गायत्री चतुःषष्टिः ॥ ६४ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
द्वितीयः प्रपाठकः ॥ २ ॥

(विशसनाभिधानम्)

दैव्या अध्वर्यवस्त्वा छ्यन्तु वि च शासतु।
गात्राणि पर्वशस्ते शिमाः कृण्वन्तु शिम्यन्तः।
अर्धमासाः परूंषि ते मासाश्छ्यन्तु शिम्य-
न्तः। अहोरात्राणि मरुतो विलिष्टम् (१)
सूदयन्तु ते। पृथिवी तेऽन्तरिक्षेण वायुश्छिद्रं
भिषज्यतु। द्यौस्ते नक्षत्रैः सह रूपं कृणोतु
साधुया। शं ते परेभ्यो गात्रेभ्यः शमस्त्ववं-
रेभ्यः। शमस्थभ्यो मज्जभ्यः शमु ते तनुवे
भुवत् (२)॥

(विलिष्टं विंशश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
द्वितीयप्रपाठके द्वादशोऽनुवाकः॥ १२॥

विष्णुमुखा अन्नपते यावती वै वि वै पुरुषमात्रेणाग्ने तव श्रवो वयो ब्रह्म
जज्ञानं स्वयमातृण्णामेषां वै पशुर्गायत्री कस्त्वा द्वादश॥ १२॥

विष्णुमुखा अग्नचितिमाग्ने वै पुरुषमात्रेणाग्ने तव श्रवः स्वयमातृण्णां
विषूचीनानि गायत्री चतुःषष्टिः॥ ६४॥

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
द्वितीयः प्रपाठकः॥ २॥

(विशसनाभिधानम्)

(अथ पञ्चमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः) ।

एकादशानुवाके सूचीभिरसिपथक्लृप्तिरभिहिता । अथ द्वादशे विशसनमुच्यते । कल्पः—"कस्त्वा छ्यति कस्त्वा विशास्तीत्यश्वस्य त्वचमाच्छ्यति" इति । तस्मिन्ननुवाके प्रथमामृचमाह—

कस्त्वा छ्यतीति । हेऽश्व त्वां कः प्रजापतिश्छ्यति छिनत्ति । छित्त्वा चानन्तरं कः प्रजापतिरेव त्वां विशास्ति त्वदवयवान्विभज्य स्थापयति । ततः कः प्रजापतिरेव ते गात्राण्यवयवाञ्छिम्यति सुरक्षितानि करोतीत्यर्थः । कविर्विद्वानर्थज्ञश्छेदनाद्यभिज्ञः क उ प्रजापतिरेव ते तव शमिता न त्वितरपशुवदन्यः कश्चिन्मनुष्यः । अथ द्वितीयामाह—

ऋतवस्त इति । ऋतवो वसन्तादयो देवाः शमितारो भूत्वर्तुधा तत्तदृतुकाले ते परुस्त्वदीयं पर्व विशासतु विविधं स्थापयन्तु । संवत्सरस्य धायसा धारणेन शिमीभिः शमनहेतुभिः क्रियाभिस्त्वा त्वां शिम्यन्तु शमयन्तु । ऋतुदेवा एव संवत्सरधारकाः सन्तस्तत्तत्कालोचितव्यापारैस्त्वां देवयोग्यं कुर्वन्त्वित्यर्थः । अथ तृतीयामाह—

दैव्या अध्वर्यव इति । देवेषु भवा दैव्या अध्वर्यवो धुप्रमुखयः । "घोरध्वर्युः" "अश्विनाऽध्वर्यू" "सत्यहविरध्वर्युः" इति श्रुतेः । तादृशाः सर्वे त्वां छ्यन्तु शस्त्रेण च्छिन्दन्तु । किंच विशासतु विविधं स्थापयन्तु । शिमाः शमनहेतवः सन्तस्ते गात्राणि त्वदीयानवयवान्पर्वशः तत्पर्वानुसारेण शिम्यन्तः शमयन्तो रक्षन्तः कृण्वन्तु तत्र तत्रोचितं व्यापारं कुर्वन्तु । अथ चतुर्थीमाह—

अर्धमासा इति । अर्धमासा मासाश्च देवतास्ते परूंषि शिम्यन्तः शमयन्तो रक्षन्तश्छ्यन्तु च्छिन्दन्तु । तथाऽहोरात्राणि तदभिमानिनी देवता मरुतश्च ते सर्वेऽपि विलिष्टं विनाशितमङ्गं सूदयन्तु स्वादु कुर्वन्तु । अथ पञ्चमीमाह—

पृथिवी इति । हेऽश्व ते छिद्रं त्वदीयं विनष्टमङ्गमन्तरिक्षेण सहिता पृथिवी भिषज्यतु समादधातु । वायुश्च भिषज्यतु । द्यौर्नक्षत्रैः सहिता वे रूपं त्वदीयं स्वरूपभूतमिदं हविः साधया साधु समीचीनं यथा भवति तथा कृणोतु करोतु । अथ षष्ठीमाह—

शं ते परेभ्य इति । हेऽश्व ते तव परेभ्यो गात्रेभ्य उत्कृष्टेभ्योऽवयवेभ्यः शं सुखमस्तु । तथाऽवरेभ्यो निकृष्टेभ्योऽवयवेभ्यः शमस्तु । तथाऽस्थभ्यस्त्वदी-

(द्वितीयचितिगताश्विन्यादीष्टकाचतुष्टयाभिधानम्)

येभ्योऽस्थिभ्यो मज्जभ्यश्च शमस्तु। तथा ते तनुवे शरीराय शमु सुखमेव भवतु।

अत्र विनियोगसंग्रहः—

कस्त्वेतिमन्त्रषट्केन ह्यश्वस्य त्वचमाच्छ्यति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः॥ १२॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे द्वितीयः प्रपाठकः॥ २॥

(अथ पञ्चमाष्टके तृतीयः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

*उत्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वै यज्ञस्य क्रियमाणस्यान्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोत्यृतव्या उप दधात्यृतूनां क्लृप्त्यै (१) पञ्चोप दधाति पञ्च

---

* एतदाद्येकादशानुवाकाश्चतुर्थकाण्डगततृतीयप्रपाठकस्थचतुर्थानुवाकमारभ्य तद्गतचतुर्थप्रपाठकस्थसप्तमानुवाकपर्यन्तेन मूलेन सह व्याख्याता इत्यत्र पुनर्भाष्यकृता न व्याख्याताः।

वा ऋतवो यावन्त एवर्तवस्तान्कल्पयति स-
मानप्रभृतयो भवन्ति समानोदर्कास्तस्मात्समा-
ना ऋतव एकेन पदेन व्यावर्तन्ते तस्माहृतवो
व्यावर्तन्ते प्राणभृत उप दधात्यृतुष्वेव प्राणा-
न्दधाति तस्मात्समानाः सन्त ऋतवो न
जीर्यन्त्यथो प्र जनयत्येवैनानेष वै वायुर्यत्प्राणो
यदृतव्या उपधाय प्राणभृतः (२) उपदधाति
तस्मात्सर्वानृतूननु वायुरा वरीवर्ति वृष्टिसनीरुप
दधाति वृष्टिमेवाव रुन्धे यदेकधोपदध्यादेक-
मृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात्सर्वानृतू-
न्वर्षति यत्प्राणभृत उपधाय वृष्टिसनीरुप-
दधाति तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते पशवो
वै वयस्या नानामनसः खलु वै पशवो नाना-
व्रतास्तेऽप एवाभि समनसः (३) यं काम-
येतापशुः स्यादिति वयस्यास्तस्योपधाया-
पस्या उप दध्यादसंज्ञानमेवास्मै पशुभिः करो-
त्यपशुरेव भवति यं कामयेत पशुमान्स्या-
दित्यपस्यास्तस्योपधाय वयस्या उप दध्यात्सं-
ज्ञानमेवास्मै पशुभिः करोति पशुमानेव भवति
चतस्रः पुरस्तादुप दधाति तस्माच्चत्वारि चक्षुषो
रूपाणि द्वे शुक्ले द्वे कृष्णे (४) मूर्धन्वतीर्भ-
वन्ति तस्मात्पुरस्तान्मूर्धा पञ्च दक्षिणायाꣳ
श्रोण्यामुप दधाति पञ्चोत्तरस्यां तस्मात्पश्चाद्व-

(स्वयमातृण्णाद्यभिधानम्)

वीयान्पुरस्तात्प्रवणः पशुर्वस्तो वय इति दक्षिणेऽꣳस उप॑ दधाति वृष्णिर्वय इत्युत्तरेऽꣳसावेव प्रति॑ दधाति व्याघ्रो वय इति दक्षिणे पक्ष उप॑ दधाति सिꣳहो वय इत्युत्तरे पक्षयोरेव वीर्यं॑ दधाति पुरु॑षो वय इति मध्ये तस्मात्पुरु॑षः पशूनामधि॑पतिः (५) ॥

(क्लृप्त्यां उपधार्यं प्राणभृतः समनसः कृष्णे पुरु॑षो वय इति पञ्च च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

इन्द्रा॑ग्नी अव्य॑थमानामिति॑ स्वयमातृण्णामुप॑ दधातीन्द्राग्निभ्यां वा इमौ लोकौ विधृ॑तावनयोर्लोकयोर्विधृ॑त्या अधृ॑तेव वा एषा यन्म॑ध्यमा चिति॑रन्तरि॑क्षमिव वा एषेन्द्रा॑ग्नी इत्या॑हेन्द्राग्नी वै देवाना॑मोजोभृतावोज॑सैवैना॑मन्तरि॑क्षे चिनुते धृत्यै स्वयमातृण्णामुप॑ दधात्यन्तरि॑क्षं वै स्वयमातृण्णाऽन्तरि॑क्षमेवोप॑ धत्तेऽश्वमुप॑ (१) घ्रापयति प्राणमेवास्यां॑ दधात्यथो॑ प्राजापत्यो वा अश्वः॑ प्रजाप॑तिनैवाग्निं चिनुते स्वयमातृण्णा भ॑वति प्राणानामुत्सृ॑ष्ट्या अथो॑ सुवर्गस्य॑ लोकस्यानु॑ख्यात्यै देवानां वै सुव॒र्गं लोकं यता॑ दिशः समव्लीयन्त त एता दिश्या॑ अपश्यन्ता उपा॑दधत ताभिर्वै

ते दिशोऽहृ॑हन्याद्दिश्या उपदधाति दिशां विधृत्यै दश प्राणभृतः पुरस्तादुप (२) दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद्धत्ते तस्मात्पुरस्तात्प्राणा ज्योतिष्मतीमुत्तमामुप दधाति तस्मात्प्राणानां वाग्ज्योतिरुत्तमा दशोप दधाति दशाक्षरा विराड्विराट्छन्दसां ज्योतिर्ज्योतिरेव पुरस्ताद्धत्ते तस्मात्पुरस्ताज्ज्योतिरुपाऽऽस्महे छन्दा॑ंसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः (३) पशव उच्यन्ते मा छन्द इति दक्षिणत उप दधाति तस्माद्दक्षिणावृतो मासाः पृथिवी छन्द इति पश्चात्प्रतिष्ठित्या अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति षट्त्रि॑ंशत्सं पद्यन्ते षट्त्रि॑ंशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनव रुन्धे बृहती छन्दसा॑ं स्वाराज्यं परीयाय यस्यैताः (४) उपधीयन्ते गच्छति स्वाराज्य॑ं सप्त वालखिल्याः पुरस्तादुप दधाति सप्त पश्चात्सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ प्राणाना॑ं सवीर्यत्वाय मूर्धाऽसि राडिति पुरस्तादुप दधाति यन्त्री राडिति पश्चात्प्राणानेवास्मै समीचो दधाति (५) ॥

(अश्मुप पुरस्तादुप बार्हता एताश्चतुस्त्रिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अक्ष्णयास्तोमीयादीनामभिधानम्)

(अथ पञ्चमाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः) ।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्ष्णयास्तोमीया अपश्यन्ता अन्यथाऽनूच्यान्यथोपादधत तदसुरा नान्ववायन्ततो देवा अभवन्पराऽसुरा यदक्ष्णयास्तोमीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्याशुस्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखं वै त्रिवृत् (१) यज्ञमुखमेव पुरस्ताद्वि यातयति व्योम सप्तदश इति दक्षिणतोऽन्नं वै व्योमान्न॑ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते धरुण एकविंश इति पश्चात्प्रतिष्ठा वा एकविंशः प्रतिष्ठित्यै भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्त ओजः पञ्चदश ओज एवोत्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्तात् (२) उप दधाति द्वौ त्रिवृतावभिपूर्वं यज्ञमुखे वि यातयत्यभिवर्तः सविंश इति दक्षिणतोऽन्नं वा अभिवर्तोऽन्न॑ सविंशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते वर्चो द्वाविंश इति पश्चाद्यद्विंशतिर्द्वे तेन विराजौ यद्द्वे प्रतिष्ठा तेन विराजोरेवाभिपूर्वमन्नाद्ये प्रति तिष्ठति तपो नवदश इत्युत्तरतस्तस्मात्सव्यः (३) हस्तयोस्तपस्वितरो योनिश्चतुर्विंश इति पुरस्तादुप

(अक्ष्णयास्तोमीयादीनामभिधानम्)

दधाति चतुर्विंशत्यक्षरा गायत्री गायत्री यज्ञमुखं यज्ञमुखमेव पुरस्ताद्वि यातयति गर्भाः पञ्चविंशश इति दक्षिणतोऽन्नं वै गर्भा अन्नं पञ्चविंशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत ओजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठति संभरणस्त्रयोविंशश इति (४) उत्तरतस्तस्मात्सव्यो हस्तयोः संभार्यतरः क्रतुरेकत्रिंशश इति पुरस्तादुप दधाति वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति ब्रध्नस्य विष्टपं चतुस्त्रिंशश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रिंशश इति पश्चात्प्रतिष्ठित्यै नाकः षट्त्रिंशश इत्युत्तरतः सुवर्गो वै लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै (५) ॥

(वै त्रिवृदिति पुरस्तात्सव्यस्त्रयोविंशश इति सुवर्गो वै पञ्च च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

अग्नेर्भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वा अग्निर्यज्ञमुखं दीक्षा यज्ञमुखं ब्रह्म यज्ञमुखं त्रिवृद्यज्ञमुखमेव पुरस्ताद्वि यातयति

नृचक्षसां भागोऽसीति दक्षिणतः शुश्रुवाँसो वै नृचक्षसोऽन्नं धाता जातायैवास्मा अन्नमपि दधाति तस्माज्जातोऽन्नमत्ति जनित्रँ स्पृतँ सप्तदशः स्तोम इत्याहान्नं वै जनित्रम् (१) अन्नँ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते मित्रस्य भागोऽसीति पश्चात्प्राणो वै मित्रोऽपानो वरुणः प्राणापानावेवास्मिन्दधाति दिवो वृष्टिर्वाताः स्पृता एकविँशः स्तोम इत्याह प्रतिष्ठा वा एकविँशः प्रतिष्ठित्या इन्द्रस्य भागोऽसीत्युत्तरत ओजो वा इन्द्र ओजो विष्णुरोजः क्षत्रमोजः पञ्चदशः (२) ओज एवोत्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति वसूनां भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वै वसवो यज्ञमुखँ रुद्रा यज्ञमुखं चतुर्विँशो यज्ञमुखमेव पुरस्ताद्वि यातयत्यादित्यानां भागोऽसीति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं गर्भा अन्नं पञ्चविँशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यतेऽदित्यै भागः (३) असीति पश्चात्प्रतिष्ठा वा अदितिः प्रतिष्ठा पूषा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै देवस्य सवितुर्भागोऽसीत्युत्तरतो ब्रह्म वै देवः सविता ब्रह्म बृहस्पतिर्ब्रह्म चतुष्टोमो ब्रह्मवर्चसमेवोत्तरतो धत्ते तस्मादुत्तरोऽर्धो ब्रह्मवर्चसितरः सावित्रवती भवति प्रसूत्यै तस्माद्-

(अक्ष्णयास्तोमीयादीनामभिधानम्)

ब्राह्मणानामुदीची सनिः प्रसूता यत्त्रिश्चतुष्टोम इति पुरस्तादुप दधाति यज्ञमुखं वै धर्त्रः (४) यज्ञमुखं चतुष्टोमो यज्ञमुखमेव पुरस्ताद्वि-यातयति यावानां भागोऽसीति दक्षिणतो मा-सा वै यावा अर्धमासा अयावास्तस्माद्दक्षिणा-वृतो मासा अन्नं वै यावा अन्नं प्रजा अन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत ऋभूणां भागोऽसीति पश्चात्प्रतिष्ठित्यै विवर्तोऽष्टाचत्वा-रिंश इत्युत्तरतोऽनयोर्लोकयोः सवीर्यत्वाय तस्मादिमौ लोकौ समावद्वीर्यौ (५) यस्य मुख्यवतीः पुरस्तादुपधीयन्ते मुख्य एव भव-त्याऽस्य मुख्यो जायते यस्यान्नवतीर्दक्षिणतोऽ-त्त्यन्नमाऽऽस्यान्नादो जायते यस्य प्रतिष्ठावतीः पश्चात्प्रत्येव तिष्ठति यस्यौजस्वतीरुत्तरत ओ-जस्व्येव भवत्याऽस्यौजस्वी जायतेऽर्को वा एष यदग्निस्तस्यैतदेव स्तोत्रमेतच्छस्त्रं यदेषा विधा (६) विधीयतेऽर्क एव तदर्क्यमनु वि धीयतेऽत्त्यन्नमाऽस्यान्नादो जायते यस्यैषा वि-धा विधीयते य उ चैनामेवं वेद सृष्टीरुप दधाति यथासृष्टमेवाव रुन्धे न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरप-श्यन्ता उपादधत ततो वा इदं व्यौच्छद्य-स्यैता उपधीयन्ते व्येवास्मा उच्छत्यथो तम एवाप हते (७) ।

(असपत्नविराडाख्येष्टकाभिधानम्)

(वै जनित्र पश्चाद्योऽदित्यै भागो वै धर्त्रः समावद्वीर्यौ विधा ततो वा इदं चतुर्दश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः) ।

अग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान्प्र णुदते सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतो ब्रह्मवर्चसं वै चतुश्चत्वारिꣳशो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः षोडशः स्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मात् (१) उत्तरतोभिप्रयायी जयति वज्रो वै चतुश्चत्वारिꣳशो वज्रः षोडशो यदेते इष्टके उपदधाति जाताꣳश्चैव जनिष्यमाणाꣳश्च भ्रातृव्यान्प्रणुद्य वज्रमनु प्र हरति स्तृत्यै पुरीषवतीं मध्य उप दधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य एवं वेदैता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते (२) नास्य सपत्नो भवति पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात्पशुमानुत्तमां वाचं वदति

(स्तोमभागाख्येष्टकाभिधानम्)

दशदशोप दधाति सवीर्यत्वायाक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यानि वै छन्दाꣳसि सुवर्ग्याण्यासन्तैर्देवाः सुवर्गं लोकमायन्तेनर्षयः (३) अश्राम्यन्ते तपोऽतप्यन्त तानि तपसाऽपश्यन्तेभ्य एता इष्टका निरमिमतेवश्छन्दो वरिवश्छन्द इति ता उपादधत ताभिर्वै ते सुवर्गं लोकमायन्यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति यज्ञेन वै प्रजापतिः प्रजा असृजत ता स्तोमभागैरेवासृजत यत् (४) स्तोमभागा उपदधाति प्रजा एव तद्यजमानः सृजते बृहस्पतिर्वा एतद्यज्ञस्य तेजः समभरद्यत्स्तोमभागा यत्स्तोमभागा उपदधाति सतेजसमेवाग्निं चिनुते बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामपश्यद्यत्स्तोमभागा यत्स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै सप्तसप्तोप दधाति सवीर्यत्वाय तिस्रो मध्ये प्रतिष्ठित्यै (५) ॥

(उत्तरतो धत्ते तस्मादुपधीयन्त ऋषयोऽसृजत यत्रिचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः) ।

रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्मंमन्वितिरिति दिवꣳ संधिरित्यन्तरिक्षं प्रतिधि-

(स्तोमभागाख्येष्टकाभिधानम्)

रिति पृथिवीं विष्टम्भ इति वृष्टिं प्रवेत्यहरनु-
वेति रात्रिमुशिगिति वसून्प्रकेत इति रुद्रान्त्सु-
दीतिरित्यादित्यानोज इति पितॄꣳस्तन्तुरिति
प्रजाः पृतनाषाडिति पशून्रेवदित्योषधीरभि-
जिदसि युक्तग्रावा (१) इन्द्राय त्वेन्द्रं जिन्वे-
त्येव दक्षिणतो वज्रं पर्यौहदभिजित्यै ताः
प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव
प्राणमदधाद्यन्तेत्यपानꣳ सꣳसर्प इति चक्षुर्व-
योधा इति श्रोत्रं ताः प्रजाः प्राणतीरपानतीः
पश्यन्तीः शृण्वतीर्न मिथुनी अभवन्तासु त्रि-
वृदसीत्येव मिथुनमदधात्ताः प्रजा मिथुनी (२)
भवन्तीर्न प्राजायन्त ताः सꣳरोहोऽसि नीरो-
होऽसीत्येव प्राजनयत्ताः प्रजाः प्रजाता न
प्रत्यतिष्ठन्ता वसुकोऽसि वेषश्रिरसि वस्यष्टि-
रसीत्येवैषु लोकेषु प्रत्यस्थापयद्यदाह वसुकोऽ-
सि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव प्रजाता
एषु लोकेषु प्रति ष्ठापयति सात्माऽन्तरिक्षꣳ
रोहति सप्राणोऽमुष्मिँल्लोके प्रति तिष्ठत्यव्य-
र्धुकः प्राणापानाभ्यां भवति य एवं वेद (३)॥

(युक्तग्रावा प्रजा मिथुन्यन्तरिक्षं द्वादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(नाकसदादिपञ्चविधेष्टकाभिधानम्)

(अथ पञ्चमाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः) ।

नाकसद्भिर्वै देवाः सुवर्गं लोकमायन्तन्नाकसदां नाकसत्त्वं यन्नाकसद उपदधाति नाकसद्भिरेव तद्यजमानः सुवर्गं लोकमेति सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते पृष्ठानां वा एतत्तेजः संभृतं यन्नाकसदो यन्नाकसदः (१) उपदधाति पृष्ठानामेव तेजोऽव रुन्धे पञ्चचोडा उप दधात्यप्सरस एवैनमेता भूता अमुष्मिँल्लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य यं द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्छत्युत्तरा नाकसद्भ्य उप दधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत् (२) पश्चात्प्राचीमुत्तमामुप दधाति तस्मात्पश्चात्प्राची पत्न्यन्वास्ते स्वयमातृण्णां च विकर्णीं चोत्तमे उप दधाति प्राणो वै स्वयमातृण्णाऽऽयुर्विकर्णी प्राणं चैवाऽऽयुश्च प्राणानामुत्तमौ धत्ते तस्मात्प्राणश्चाऽऽयुश्च प्राणानामुत्तमौ नान्यामुत्तरामिष्टकामुप दध्याद्यदन्यामुत्तरामिष्टकामुपदध्यात्पशूनाम् (३) च यजमानस्य च प्राणं चाऽऽयुश्चापि दध्यात्तस्मान्नान्योत्तरेष्टकोपधेया स्वयमातृण्णामुप दधात्यसौ वै स्वयमातृण्णाऽमूमेवोप धत्तेऽश्वमुप

(छन्दोभिधेष्टकाभिधानम्)

प्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या एषा वै देवानां विक्रान्तिर्यद्द्विकर्णी यद्द्विकर्णीमुपदधाति देवानामेव विक्रान्तिमनु वि क्रमत उत्तरत उप दधाति तस्मादुत्तरत उपचारोऽग्निर्वायुमती भवति समिद्ध्यै (४) ॥

(संभृतं यन्त्यांकसदो यन्त्यांकसदस्तस्मं शूनामेषा वै द्वाविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

छन्दांस्युप दधाति पशवो वै छन्दांसि पशूनेवाव रुन्धे छन्दांसि वै देवानां वामं पशवो वाममेव पशूनव रुन्ध एतां ह वै यज्ञसेनश्चैत्रियायणश्चितिं विदां चकार तया वै स पशूनवारुन्ध यदेतामुपदधाति पशूनेवाव रुन्धे गायत्रीः पुरस्तादुप दधाति तेजो वै गायत्री तेज एव (१) मुखतो धत्ते मूर्धन्वतीर्भवन्ति मूर्धानमेवैनं समानानां करोति त्रिष्टुभ उप दधातीन्द्रियं वै त्रिष्टुगिन्द्रियमेव मध्यतो धत्ते जगतीरुप दधाति जागता वै पशवः पशूनेवाव रुन्धेऽनुष्टुभ उप दधाति प्राणा वा अनुष्टुप्प्राणानामुत्सृष्ट्यै बृहती-

रुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाँस्युप दधाति विषुरूपा वै पशवः पशवः (२) छन्दाँसि विषुरूपानेव पशूनव रुन्धे विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैनामेवं वेदातिच्छन्दसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाँसि सर्वेभिरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसमुपदधाति वर्ष्मैवेनँ समानानां करोति द्विपदा उप दधाति द्विपाद्यजमानः प्रतिष्ठित्यै (३) ।

(तेज एव पशवः पशवो यजमान एकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके नवमोऽनुवाकः) ।

सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यत्सयुजो नोपदध्याद्देवता अस्याग्निं वृञ्जीरन्यत्सयुज उपदधात्यात्मनैवैनँ सयुजं चिनुते नाग्निना व्यृध्यतेऽथो यथा पुरुषः स्नावभिः संतत एवमेवैताभिरग्निः संततोऽग्निना वै देवाः सुवर्गं लोकमायन्ता अमूः कृत्तिका अभवन्यस्यैता उपधीयन्ते सुवर्गमेव (१) लोकमेति गच्छति प्रकाशं चित्रमेव भवति मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका-

(वृष्टिसन्यादीष्टकापञ्चकाभिधानम्)

देवपुरा देवपुरा एव प्र विशति नाऽऽर्तिमार्च्छ-
त्यग्निं चिक्यानो विश्वज्योतिष उप दधातीमा-
नेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो प्राणा-
नेवैता यजमानस्य दाधत्येता वै देवताः सुव-
र्ग्यास्ता एवान्वारभ्य सुवर्गं लोकमेति (२) ॥

(सुवर्गमेव ता एव चत्वारि च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके दशमोऽनुवाकः) ।

वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदे-
कधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳ सादयति
तस्मात्सर्वानृतून्वर्षति पुरोवातसनिरसीत्याहै-
तद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्धे संया-
नीभिर्वै देवा इमाँल्लोकान्त्समयुस्तत्संयानी-
नाꣳ संयानित्वं यत्संयानीरुपदधाति यथाऽप्सु
नावा संयात्येवम् (१) एवैताभिर्यजमान
इमाँल्लोकान्त्सं याति प्लवो वा एषोऽग्नेर्यत्संया-
नीर्यत्संयानीरुपदधाति प्लवमेवैतमग्नय उप
दधात्युत यस्यैतासूपहितास्वापोऽग्निꣳ हरन्त्य-
हुत एवास्याग्निरादित्येष्टका उप दधात्यादित्या
वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन्भूतिं
न प्राप्नोत्यादित्याः (२) एवैनं भूतिं गमय-

(भूयस्कृदादीष्टकाषट्काभिधानम्)

न्त्यसौ वा एतस्याऽऽदित्यो रुचमादत्ते योऽग्निं चित्वा न रोचते यदादित्येष्टका उपदधात्यसावेवास्मिन्नादित्यो रुचं दधाति यथाऽसौ देवानां रोचत एवमेवैष मनुष्याणां रोचते घृतेष्टका उप दधात्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धयति (३) अथो तेजसाऽनुपरिहारं सादयत्यपरिवर्गमेवास्मिन्तेजो दधाति प्रजापतिरग्निमचिनुत स यशसा व्यार्ध्यत स एता यशोदा अपश्यत्ता उपाधत्त ताभिर्वै स यश आत्मन्नधत्त यद्यशोदा उपदधाति यश एव ताभिर्यजमान आत्मन्धत्ते पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन्यशो दधाति (४) ॥

(एवं प्राप्नोत्यादित्या अर्धयत्येकान्नपञ्चाशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः) ।

देवासुराः संयत्ता आसन्कनीयांसो देवा आसन्भूयांसोऽसुरास्ते देवा एता इष्टका अपश्यन्ता उपादधत भूयस्कृदसीत्येव भूयांसोऽभवन्वनस्पतिभिरोषधीभिर्वरिवस्कृदसीतीमामजयन्प्राच्यसीति प्राचीं दिशमजयन्नूर्ध्वाऽसीत्यमूमजयन्नन्तरिक्षसदस्यन्तरिक्षे सीदेत्यन्त-

(अश्वमेधविधिः)

रिक्षमजयन्ततो देवा अभवन् (१) पराऽसुरा यस्यैता उपधीयन्ते भूयानेव भवत्यमीमाँल्लोकाञ्जयति भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यप्सुषदसि श्येनसदसीत्याहैतद्वा अग्ने रूपꣳ रूपेणैवाग्निमव रुन्धे पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर्लोकान्द्रविणावतः कुरुत आयुष्या उप दधात्यायुरेव (२) अस्मिन्दधात्यग्ने यत्ते परꣳ हृन्नामेत्याहैतद्वा अग्नेः प्रियं धाम प्रियमेवास्य धामोपाऽऽप्नोति तावेहि सꣳ रभावहा इत्याह व्येवैनेन परि धत्ते पाञ्चजन्येष्वप्येध्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकस्तस्मादेवमाहर्तव्या उप दधात्येतद्वा ऋतूनां प्रियं धाम यदृतव्या ऋतूनामेव प्रियं धामाव रुन्धे सुमेक इत्याह संवत्सरो वै सुमेकः संवत्सरस्यैव प्रियं धामोपाऽऽप्नोति (३)।

(अभवन्नायुरेवर्तव्या उप षड्विꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः)।

प्रजापतेरक्ष्यश्वयत्तत्पराऽपतत्तदश्वोऽभवद्यदश्वयत्तदश्वस्याश्वत्वं तद्देवा अश्वमेधेनैव प्रत्यदधु-

रेष वै प्रजापतिꣳ सर्वं करोति योऽश्वमेधेन यजते सर्व एव भवति सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजꣳ सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन्त्सर्वं पाप्मानम् (१) तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदोत्तरं वै तत्प्रजापतेरक्ष्यश्वयत्तस्मादश्वस्योत्तरतोऽवं द्यन्ति दक्षिणतोऽन्येषां पशूनां वैतसः कटो भवत्यप्सुयोनिर्वा अश्वोऽप्सुजो वैतसः स्व एवैनं योनौ प्रति ष्ठापयति चतुष्टोमः स्तोमो भवति सरड्ढ वा अश्वस्य सक्थ्याऽवृहत्तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर्यच्चतुष्टोमः स्तोमो भवत्यश्वस्य सर्वत्वाय (२) ।

(सर्वं पाप्मानमवृहद्द्वादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

उत्सन्नयज्ञ इन्द्राग्नी देवा वा अक्ष्णयास्तोमीया अग्नेर्भागोऽस्यग्ने जातान्रश्मिरिति नाकसद्भिश्छन्दाꣳसि सर्वाभ्यो वृष्टिसनीर्देवासुराः कनीयाꣳसः प्रजापतेरक्षि द्वादश ॥ १२ ॥

उत्सन्नयज्ञो देवा वै यस्य मुख्यवतीर्नाकसद्भिरेवैताभिरष्टाचत्वारिꣳशत् ॥ ४८ ॥

हरिः ॐ ।

इतिकृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके तृतीयः प्रपाठकः ॥ ३ ॥

(अश्वमेधविधिः)

(अथ पञ्चमकाण्डे तृतीयः प्रपाठकः)।

(तत्र प्रथमादिद्वादशान्ता अनुवाकाः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
चितिराद्या द्वितीये स्यात्तृतीये तु चतुष्टयम्।
द्वादशात्रानुवाकाः स्युः प्रथमे त्विष्टका इमाः॥
आश्विन्यश्च तथर्तव्याः प्राणभृत्संज्ञकास्तथा।
अपस्याश्च वयस्याश्च द्वितीयस्यां चितौ श्रुताः॥
द्वितीये स्वयमातृण्णा दिश्याः प्राणभृतस्तथा।
बृहत्यो वालखिल्याश्च तृतीयस्यां चिताविमाः॥
तृतीयतुर्ययोरक्ष्णयास्तोमीयाश्च सृष्टयः।
व्युष्टयश्चेष्टकाः प्रोक्ताश्चतुर्थ्यां च चिताविमाः॥
पञ्चमे त्वसपत्नाख्या विराडाख्याश्च वर्णिताः।
षष्ठे तु स्तोमभागाख्या नाकसत्संज्ञकास्तु याः॥
चोडाख्याः स्वयमातृण्णा विकर्णी ताश्च सप्तमे।
छन्दोभिधा अष्टमे स्युः पञ्चम्यां तु चिताविमाः॥
अथावशिष्टाः कथ्यन्ते ता विज्ञेया यथाचिति।
सयुजो मण्डलाख्याश्च विश्वज्योतिष इत्यमूः॥
नवमे दशमे वृष्टिसनिसंयानिकाभिधाः।
आदित्याख्या घृताख्याश्च यशोदाश्चेति वर्णिताः॥
एकादशे तु भूयस्कृदग्निरूपाभिधा अपि।
द्रविणोदास्तथाऽऽयुष्याः स्यादग्निहृदयाभिधा॥
ऋतव्याश्चेत्येवमेताः क्रमादिह समीरिताः।
द्वादशे त्वश्वमेधस्य विधिरित्यत्र[1] निर्णयः॥

तमिममश्वमेधं विधत्ते—

प्रजापतेरक्षीति। प्रजापतेश्चतुर्मुखस्याक्षिगोलकं केनापि व्याधिनोच्छूनमभूत्। तच्च भूमौ पतितं सदश्वरूपेणाऽऽविर्बभौ। यस्मात्कारणादश्वयत्तस्मात्कारणात्तत उत्पन्नस्य प्राणिनोऽश्वनाम संपन्नम्। ततो देवाः प्रतीकारं विचार्याश्वमे-

1 ख. 'रित्येव नि'।

थमनुष्ठाय तेनाश्वमेधसामर्थ्येन तत्प्रजापतेराक्षि समादधुः। तस्मादेवं प्रशस्तत्वादश्व-मेधेन यजेत। स च यष्टा प्रजापतिं संपूर्णं करोति। स्वयं च प्रजापतिप्राप्त्या सर्वात्मको भवति। तदेवं सर्वभावप्राप्त्यर्थमश्वमेधं विधाय पुनः पापक्षयार्थमश्व-मेधक्रतुं तदुपासनं च विधत्ते—

सर्वस्य वा इति। येयमश्वमेधानुष्ठितिः सैषा सर्वस्य पाप्मन उपपातकरू-पस्य महापातकरूपस्य च प्रायश्चित्तिर्भवति। किंच, सर्वस्य व्याधिजातस्य तद्धे-तुपापक्षयद्वारेणाश्वमेधानुष्ठानं भेषजम्। अत एवेदानींतना देवाः पूर्वस्मिन्मनुष्य-जन्मन्येतेनाश्वमेधेन गोवधादिरूपमुपपातकं ब्रह्महत्यादिरूपं महापातकं च परि-हृतवन्तः। तस्मादिदानीमपि योऽश्वमेधक्रतुना यजते सोऽयमुपपातकमहापातके तरति। योऽपि च पुरुष एनमश्वमेधं शास्त्रोक्तप्रकारेण जानाति। ज्ञानं च द्विविधम्—अर्थनिर्णय उपासनं च। तत्रार्थनिर्णयः पदवाक्यप्रमाणपर्यालो-चनया संपद्यते। उपासनाप्रकारस्तु सप्तमकाण्डस्यान्तिमानुवाके—"यो वा अश्व-स्य मेध्यस्य शिरो वेद" इत्यस्मिन्नभिधास्यते। चोदकप्राप्तं दक्षिणावदानं बाधितुं विधत्ते—

उत्तरं वै तदिति। यस्मात्प्रजापतेरुत्तरभागवर्ति वामाक्षि उच्छूनमभ-वत्तस्मादश्वसंबन्धिनो हविषोऽवदानमप्युत्तरस्यां दिशि कर्तव्यम्। अन्येषामश्व-व्यतिरिक्तानां पशूनां दक्षिणस्यां दिश्यवदानम्। अत एव सूत्रकार आह— "पशुकाल उत्तरत उपरिष्टादग्नेर्वैतसे कटेऽश्वं प्राञ्चं यथाऽङ्गं चिनोति एवं पुरस्तात्प्रत्यञ्चं तूपरं पश्चात्प्राचीनं गोमृगं दक्षिणतः प्लक्षशाखास्वितरान्पशूना-सादयति" इति। हविःसादनाधारं विधत्ते—

वेतसः कट इति। अप्सु जलेषु योनिर्निवासस्थानं यस्यासावप्सुयोनिः। वडवा हि समुद्रजलेष्ववतिष्ठते। वेतसस्योदकजन्यत्वं प्रसिद्धम्।

यदुक्तं सूत्रकारेण—"भोभूते प्रेतायते गोतमचतुष्टोमयोः पूर्वो रथंतरसामा" इति। गोतमेन दृष्टो यो चतुष्टोमाख्यायेकाहक्रतू तयोर्मध्ये यः पूर्वश्चतुष्टोमः सोऽत्र कर्तव्य इति सूत्रार्थः। तमिमं विधत्ते—

चतुष्टोमः स्तोम इति। चत्वारः स्तोमास्त्रिवृत्पञ्चदशः सप्तदश एकविंशो यस्मिन्नग्निष्टोमे विद्यन्ते सोऽयं चतुष्टोमः। द्वितीयेन स्तोमशब्देन विशेष्य-

---

१ ख. प्रजापते।

(अश्वमेधविधिः)

भूतोऽग्निष्टोमो लक्ष्यते। भीमसेनो भीमः सत्यभामा भामेतिवत्त्रिवृदग्निष्टोम इत्यत्र विधानात्। एकस्तोमकोऽपि कश्चिदग्निष्टोमो विद्यते तद्व्यावृत्तये चतुष्टोम इति विशिनष्टि। त्रिसुत्यात्मकस्याश्वमेधस्य प्रथममहश्चतुष्टोमरूपं कुर्यात्। सरट्शब्देन कृकलासोऽभिधीयते। स कदाचिदश्वस्य सक्थिप्रदेशमारुह्य तत्सक्थिमांसमुद्यम्य भक्षितवान्। तच्च सक्थिरूपं विकलमङ्गं देवाश्चतुष्टोमेनैव समादधुः। तस्मादयं चतुष्टोमोऽश्वस्य संपूर्तये भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे तृतीयप्रपाठके प्रथमादिद्वादशान्ता अनुवाकाः ॥ १–१२ ॥

———

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥

———

१ क. घ. ङ. त्रिरात्म°।

(इन्द्रतन्वाख्यादीष्टकात्रयाभिधानम्)

(अथ पञ्चमाष्टके चतुर्थः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

*देवासुराः संयत्ता आसन्ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत्ता उपाधत्त ताभिर्वै स तनुवामिन्द्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन्पराऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिन्द्रियं वीर्यं यजमान आत्मन्धत्तेऽथो सेन्द्रमेवाग्निꣳ सतनुं चिनुते भवत्यात्मना पराऽस्य भ्रातृव्यः (१) भवति यज्ञो देवेभ्योऽपाक्रामत्तमवरुधं नाशक्नुवन्त एता यज्ञतनूरपश्यन्ता उपादधत ताभिर्वै ते यज्ञमवारुन्धत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽव रुन्धे त्रयस्त्रिꣳशतमुप दधाति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्धेऽथो सात्मानमेवाग्निꣳ सतनुं चिनुते सात्माऽमुष्मिँल्लोके (२) भवति य एवं वेद ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन्दधात्येताभिर्वा अग्निश्चितो ज्वलति ताभिरेवैनꣳ समिन्ध उभयोरस्मै लोकयोर्ज्योतिर्भवति नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि तान्येवाव रुन्धे सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि तान्येवाऽऽप्नोत्यथो

* एतद्वाद्येकादशानुवाकभाष्यं चतुर्थकाण्डस्थचतुर्थप्रपाठकाष्टमानुवाकमारभ्य काण्ड-समाप्तिपर्यन्तं वर्तते, तत्तत्र द्रष्टव्यम् ।

(ऋतव्यादीष्टकात्रयप्रोक्षणयोरभिधानम्)

अनूकाशमेवैतानि (३) ज्योतीꣳषि कुरुते सुवर्गस्य लोकस्यानुख्यात्यै यत्सꣳस्पृष्टा उपदध्याद्वृष्ट्यै लोकमपि दध्यादवर्षुकः पर्जन्यः स्यादसꣳस्पृष्टा उप दधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते (४) ॥

(भ्रातृव्यो लोक एवैतान्येकचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

ऋतव्या उप दधात्यृतूनां क्लृप्त्यै द्वंद्वमुप दधाति तस्माद्द्वंद्वमृतवोऽर्धतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषा द्वंद्वमन्यासु चितीषूप दधाति चतस्रो मध्ये धृत्या अन्तःश्लेषणं वा एताश्चितीनां यदृतव्या यदृतव्या उपदधाति चितीनां विधृत्या अवकामनूप दधात्येषा वा अग्नेर्योनिः सयोनिम् (१) एवाग्निं चिनुत उवाच ह विश्वामित्रोऽददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेदादिति संवत्सरो वा एतं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चितिं चिनुते

षड्वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठत्येता वै (२) अधिपत्नीर्नामेष्टका यस्यैता उपधीयन्तेऽधिपतिरेव समानानां भवति यं द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्छत्यङ्गिरसः सुवर्गं लोकं यन्तो या यज्ञस्य निष्कृतिरासीत्तामृषिभ्यः प्रत्यौहन्तद्धिरण्यमभवद्यद्धिरण्यशल्कैः प्रोक्षति यज्ञस्य निष्कृत्या अथो भेषजमेवास्मै करोति (३) अथो रूपेणैवैनꣳ समर्धयत्यथो हिरण्यज्योतिषैव सुवर्गं लोकमेति साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्या इमा मे अग्न इष्टका धेनवः सन्त्वित्याह धेनूरेवैनाः कुरुते ता एनं कामदुघा अमुत्रामुष्मिँल्लोक उपतिष्ठन्ते (४) ॥

(सर्पा निनेता वै करोत्येकान्नचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः) ।

रुद्रो वा एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वत्सो जातः स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्यायेच्छतरुद्रीयं जुहोति भागधेयेनैवैनꣳ शम-

(शतरुद्रीयहोमाभिधानम्)

यति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानो यद्ग्रा-
म्याणां पशूनाम् (१) पर्यसा जुहुयाद्ग्रा-
म्यान्पशूञ्छुचार्पयेद्यदारण्यानामारण्याञ्जर्तिलय-
वाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न
ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यानथो खल्वा-
हुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण
जुहोत्याग्नेयी वा एषा यदजाऽऽहुत्यैव जुहोति
न ग्राम्यान्पशून्हिनन्ति नाऽऽरण्यानाङ्गिरसः
सुवर्गं लोकं यन्तः (२) अजायां घर्मं प्रासि-
ञ्चन्त्सा शोचन्ती पर्णं पराऽजिहीत सोऽर्कोऽ-
भवत्तदर्कस्यार्कत्वमर्कपर्णेन जुहोति सयोनि-
त्वायोदङ्तिष्ठञ्जुहोत्येषा वै रुद्रस्य दिक्स्वा-
यामेव दिशि रुद्रं निरवदयते चरमायामिष्ट-
कायां जुहोत्यन्तत एव रुद्रं निरवदयते त्रेधा-
विभक्तं जुहोति त्रय इमे लोका इमानेव लो-
कान्समावद्वीर्यान्करोतीयत्यग्रे जुहोति (३)
अथेयत्यथेयति त्रय इमे लोका एभ्य एवैनं
लोकेभ्यः शमयति तिस्र उत्तरा आहुतीर्जुहो-
ति षट्सं पद्यन्ते षड्वा ऋतव ऋतुभिरेवैनꣳ
शमयति यदनुपरिक्रामं जुहुयादन्तरवचारि-
णꣳ रुद्रं कुर्यादथो खल्वाहुः कस्यां वाऽह
दिशि रुद्रः कस्यां वेत्यनुपरिक्राममेव होतव्य-
मपरिवर्गमेवैनꣳ शमयति (४) एता वै देव-
ताः सुवर्ग्या या उत्तमास्ता यजमानं वाच-

(परिषेचनाद्यभिधानम्)

यति ताभिरेवैनꣳ सुवर्गं लोकं गमयति यं द्वि-
ष्यात्तस्य संचरे पशूनां न्यस्येद्यः प्रथमः पशु-
रभितिष्ठति स आर्तिमार्छति (५) ॥

(पशूनां यन्तोऽग्रे जुहोत्यपरिवर्गमेवैनꣳ शमयति त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

अश्मन्नूर्जमिति परि षिञ्चति मार्जयत्येवैन-
मथो तर्पयत्येव स एनं तृप्तोऽक्षुध्यन्नशोचन्नमु-
ष्मिँल्लोक उप तिष्ठते तृप्यति प्रजया पशु-
भिर्य एवं वेद तां न इषमूर्जं धत्त मरुतः सꣳ-
रराणा इत्याहान्नं वा ऊर्गन्नं मरुतोऽन्नमेवाव
रुन्धेऽश्मꣳस्ते क्षुदमुं ते शुक् (१) ऋच्छतु
यं द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च
शुचा चार्पयति त्रिः परिषिञ्चन्पर्येति त्रिवृद्वा
अग्निर्यावानेवाग्निस्तस्य शुचꣳ शमयति त्रिः
पुनः पर्येति षट्सं पद्यन्ते षड्वा ऋतव ऋतु-
भिरेवास्य शुचꣳ शमयत्यपां वा एतत्पुष्पं
यद्वेतसोऽपाम् (२) शरोऽवका वेतसशा-
खया चावकाभिश्च वि कर्षत्यापो वै शान्ताः
शान्ताभिरेवास्य शुचꣳ शमयति यो वा अग्निं
चितं प्रथमः पशुरधिक्रामतीश्वरो वै तꣳ
शुचा प्रदहो मण्डूकेन वि कर्षत्येष वै पशूनाम-

(व्याघारणाद्यभिधानम्)

नुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नाऽऽरण्येषु तमेव शुचाऽर्पयत्यष्टाभिर्वि कर्षति (३) अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावा- नेवाग्निस्तस्य शुचꣳ शमयति पावकवतीभिरन्नं वै पावकोऽन्नेनैवास्य शुचꣳ शमयति मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्तेऽ- न्तर्मृत्योर्धत्तेऽन्तरन्नाद्यादित्याहुरन्यामुपमुञ्चतेऽन्यां नान्तः (४) एव मृत्योर्धत्तेऽवान्नाद्यꣳ रुन्धे नमस्ते हरसे शोचिष इत्याह नमस्कृत्य हि वसीयाꣳसमुपचरन्त्यन्यं ते अस्मत्तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य शुचाऽर्प- यति पावको अस्मभ्यꣳ शिवो भवेत्याहान्नं वै पावकोऽन्नमेवाव रुन्धे द्वाभ्यामधि क्रामति प्रतिष्ठित्या अपस्यवतीभ्याꣳ शान्त्यै (५) ॥

(शुग्वेतसोऽपामष्टाभिर्वि कर्षति नान्तरेकान्नपञ्चाशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः) ।

नृषदे वाडिति व्याघारयति पङ्क्त्याऽऽ- हुत्या यज्ञमुखमा रभतेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रति- ष्ठित्यै यद्वषट्कुर्याद्यातयामाऽस्य वषट्कार- स्यायन्न वषट्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्व-

डित्याह परोक्षमेव वषट्करोति नास्य यात-
यामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि
घ्नन्ति हुतादो वा अन्ये देवाः (१) अहुता-
दोऽन्ये तानग्निचिदेवोभयान्प्रीणाति ये देवा
देवानामिति दध्ना मधुमिश्रेणावोक्षति हुताद-
श्चैव देवानहुतादश्च यजमानः प्रीणाति ते यज-
मानं प्रीणन्ति दध्नैव हुतादः प्रीणाति मधु-
षाऽहुतादो ग्राम्यं वा एतदन्नं यद्दध्यारण्यं
मधु यद्दध्ना मधुमिश्रेणावोक्षत्युभयस्यावरुद्ध्यै
ग्रुमुष्टिनाऽवोक्षति प्राजापत्यः (२) वै ग्रुमुष्टिः
सयोनित्वाय द्वाभ्यां प्रतिष्ठित्या अनुपरिचार-
मवोक्षत्यपरिवर्गमेवैनान्प्रीणाति वि वा एष
प्राणैः प्रजया पशुभिर्ऋध्यते योऽग्निं चिन्वन्न-
धिक्रामति प्राणदा अपानदा इत्याह प्राणाने-
वाऽऽत्मन्धत्ते वर्चोदा वरिवोदा इत्याह प्रजा
वै वर्चः पशवो वरिवः प्रजामेव पशूनात्मन्धत्त
इन्द्रो वृत्रमहन्तं वृत्रः (३) हतः षोडशभि-
र्भोगैरसिनात्स एतामग्नयेऽनीकवत आहुतिम-
पश्यत्तामजुहोत्तस्याग्निरनीकवान्त्स्वेन भागधे-
येन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वै-
श्वकर्मणेन पाप्मनो निरमुच्यत यदग्नयेऽनी-
कवत आहुतिं जुहोत्यग्निरेवास्यानीकवान्त्स्वेन
भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वक-
र्मणेन पाप्मनो निर्मुच्यते यं कामयेत चिरं

(समिदाधानादिविधिः)

पाप्मनः (४) निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो निर्मुच्यते यं कामयेत ताजक्पाप्मनो निर्मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात्ताजगेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै (५) ॥

(देवाः प्राजापत्यो वृत्रश्चिरं पाप्मनश्चत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः) ।

उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतेऽवसं करोति तादृगेव तत्तिस्र आ दधाति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्मै भागधेयं करोत्यौदुम्बरीर्भवन्त्यूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपि दधात्युदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणैः (१) एवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनꣳ समर्धयति पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवतेऽपामतिं दुर्मतिं बाधमाना इत्याह रक्षसामपहत्यै रायस्पोषे यज्ञपतिमाभजन्तीरित्याह पशवो वै रायस्पोषः (२) पशूनेवाव रुन्धे षड्भिर्हरति षड्वा ऋतव ऋतुभिरेवैनꣳ हरति द्वे परिगृह्यवती भव-

तो रक्षसामपहत्यै सूर्यरश्मिर्हरिकेशः पुरस्ता-
दित्याह प्रसूत्यै ततः पावका आशिषो नो
जुषन्तामित्याहान्नं वै पावकोऽन्नमेवाव रुन्धे
देवासुराः संयत्ता आसन्ते देवा एतदप्रतिरथ-
मपश्यन्तेन वै तेऽप्रति (३) असुरानजयन्त-
दप्रतिरथस्याप्रतिरथत्वं यदप्रतिरथं द्वितीयो
होताऽन्वाहाप्रत्येव तेन यजमानो भ्रातृव्यान्ज-
यत्यथो अनभिजितमेवाभि जयति दशर्चं
भवति दशाक्षरा विराड्विराजेमौ लोकौ विधृ-
तावनयोर्लोकयोर्विधृत्या अथो दशाक्षरा विरा-
डन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठत्यसदिव
वा अन्तरिक्षमन्तरिक्षमिवाऽऽग्नीध्रमाग्नीध्रे (४)
अश्मानं नि दधाति सत्त्वाय द्वाभ्यां प्रतिष्ठित्यै
विमान एष दिवो मध्य आस्त इत्याह व्येवै-
तया मिमीते मध्ये दिवो निहितः पृश्निरश्मे-
त्याहान्नं वै पृश्न्यन्नमेवाव रुन्धे चतसृभिरा
पुच्छादेति चत्वारि छन्दांसि छन्दोभिरेवेन्द्रं
विश्वा अवीवृधन्नित्याह वृद्धिमेवोपावर्तते वाजा-
नाꣳ सत्पतिं पतिम् (५) इत्याहान्नं वै
वाजोऽन्नमेवाव रुन्धे सुम्नहूर्यज्ञो देवाꣳ आ च
वक्षदित्याह प्रजा वै पशवः सुम्नं प्रजामेव
पशूनात्मन्धत्ते यक्षदग्निर्देवो देवाꣳ आ च
वक्षदित्याह स्वगाकृत्यै वाजस्य मा प्रसवेनो-
द्ग्राभेणोदग्रभीदित्याहासौ वा आदित्य उद्य-

(चितौ बर्हिःक्षेपविधिः)

पुरुग्राम एव निम्रोचन्निग्रामो ब्रह्मणैवाऽऽत्मा-
नमुद्गृह्णाति ब्रह्मणा भ्रातृव्यं नि गृह्णाति (६) ।

(प्राणैः पोषोऽसत्यायधि पतिमेव द्रां च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः) ।

प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह देव-
लोकमेवैतयोपावर्तते क्रमध्वमग्निना नाकमि-
त्याहेमानेवैतया लोकान्क्रमते पृथिव्या अह-
मुदन्तरिक्षमाऽरुहामित्याहेमानेवैतया लोका-
न्समारोहति सुवर्यन्तो नापेक्षन्त इत्याह सुव-
र्गमेवैतया लोकमेत्यग्ने प्रेहि (१) प्रथमो
देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षु-
र्दधाति पञ्चभिराधि क्रामति पाङ्क्तो यज्ञो
यावानेव यज्ञस्तेन सह सुवर्गं लोकमेति नक्तो-
षासेति पुरोनुवाक्यामन्वाह प्रत्या अग्ने सह-
स्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै
तस्मै ते विधेम वाजाय स्वाहेत्याहान्नं वै
वाजोऽन्नमेवाव (२) रुन्धे दध्नः पूर्णामौदुम्ब-
रीᳪ स्वयमातृण्णायां जुहोत्यूर्ग्वै दध्यूर्गुदुम्ब-
रोऽसौ स्वयमातृण्णाऽमुष्यामेवोर्जं दधाति त-
स्मादमुतोऽर्वाचीमूर्जमुप जीवामस्तिसृभिः साद-
यति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गम-

यति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीमा दधात्येषा वै सूर्मी कर्णकावत्येतया ह स्म (३) वै देवा असुराणाꣳ शततर्हाꣳस्तृꣳहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रातृव्याय प्र हरति स्तृत्या अछम्बट्कारं विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीमा दधाति भा एवाव रुन्धे ताꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीꣳ शान्त्या अग्निर्वा ह वा अग्निचितं दुहेऽग्निचिद्वाऽग्निं दुहे ताम् (४) सवितुर्वरेण्यस्य चित्रामित्याहैष वा अग्नेर्दोहस्तमस्य कण्व एव श्रायसोऽवेत्तेन ह स्मैनꣳ स दुहे यदेतया समिधमादधात्यग्निचिदेव तदग्निं दुहे सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवास्य साप्तानि प्रीणाति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेः (५) आप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्या अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राविशज्जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमव रुन्धे दध्ना पुरस्ताज्जुहोत्याज्येनोपरिष्टात्तेजश्चैवास्मा इन्द्रियं च समीची दधाति द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षात् (६) एव वैश्वानरमव रुन्धे यत्प्रयाजानूयाजान्कुर्याद्विकस्तिः सा यु-

(वसोर्धाराभिधानम्)

ज्ञस्य दर्विहोमं करोति यज्ञस्य प्रतिष्ठित्यै राष्ट्रं वै वैश्वानरो विण्मरुतो वैश्वानरꣳ हुत्वा मारुता-ञ्जुहोति राष्ट्र एव विशमनु बध्नात्युच्चैर्वैश्वान-रस्याऽऽश्रावयत्युपाꣳशु मारुताञ्जुहोति तस्मा-द्राष्ट्रं विशमति वदति मारुता भवन्ति मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्यवि-शमव रुन्धे सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुन्धे गणेन गणमनुद्रुत्यं जुहोति विशमेवास्मा अनुवर्त्मानं करोति (७) ॥

(अग्ने प्रेह्यव स्म दुहे तां प्रजापतेः साक्षान्मनुष्यविशमेकाविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

वसोर्धारां जुहोति वसोर्मे धाराऽसदिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिँल्लोके पिन्वमानोपतिष्ठत आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुन्धेऽथो कामा वै वसोर्धारा कामानेवाव रुन्धे यं कामयेत प्राणानस्यान्नाद्यं वि (१) च्छिन्द्यामिति विग्राहं तस्य जुहु-यात्प्राणानेवास्यान्नाद्यं वि च्छिनत्ति यं कामयेत प्राणानस्यान्नाद्यꣳ सं तनुयामिति संततां तस्य जुहुयात्प्राणानेवास्यान्नाद्यꣳ सं तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः

संवत्सरः संवत्सरेणैवास्मा अन्नमव रुन्धेऽन्नं च मेऽक्षुच्च म इत्याहैतद्वै (२) अन्नस्य रूपꣳ रूपेणैवान्नमव रुन्धेऽग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमव रुन्धेऽर्धेन्द्राणि जुहोति देवता एवाव रुन्धे यत्सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तम इन्द्रमुत्तरमाहेन्द्रियमेवास्मिन्नुपरिष्टाद्दधाति यज्ञायुधानि जुहोति यज्ञः (३) वै यज्ञायुधानि यज्ञमेवाव रुन्धेऽथो एतद्वै यज्ञस्य रूपꣳ रूपेणैव यज्ञमव रुन्धेऽवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे घर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमव रुन्ध ऋक्च मे साम च म इत्याह (४) एतद्वै छन्दसाꣳ रूपꣳ रूपेणैव छन्दाꣳस्यव रुन्धे गर्भाश्च मे वत्साश्च म इत्याहैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे कल्पान्जुहोत्यक्लृप्तस्य क्लृप्त्यै युग्मदयुजे जुहोति मिथुनत्वायोत्तरावती भवतोऽभिक्रान्त्या एका च मे तिस्रश्च म इत्याह देवछन्दसं वा एका च तिस्रश्च (५) मनुष्यछन्दसं चतस्रश्चाष्टौ च देवछन्दसं चैव मनुष्यछन्दसं चाव रुन्ध आ त्रयस्त्रिꣳशतो जुहोति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्ध आऽष्टाचत्वा-

(वाजप्रसवीयाभिधानम्)

रि॑ꣳशतो जुहोत्यष्टाचत्वारिꣳशदक्षरा जग॑ती जाग॑ताः पशवो॑ जग॑त्यैवास्मै॑ पशूनव॑ रुन्धे वाज॑श्च प्रसवश्चेति॑ द्वादशं जु॑होति द्वाद॑श मासाः संवत्सरः सं॑वत्सर एव प्रति॑ तिष्ठति (६) ॥

(वि वै यज्ञः साम॑ च प्र इत्या॑ह च विꣳशश्चैकान्नपञ्चाशच्च॑) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः) ।

अ॒ग्निर्दे॒वेभ्यो॒ऽपाक्रा॑मद्भाग॒धेय॑मि॒च्छमा॑न॒स्तं दे॒वा अ॑ब्रुव॒न्नुप॑ न॒ आ व॑र्तस्व ह॒व्यं नो॑ वहे॒ति सो॑ऽब्रवी॒द्वरं॑ वृणै॒ मह्य॑मे॒व वा॑जप्रस॒वीयं॑ जुहव॒न्निति॒ तस्मा॑द॒ग्नये॑ वाजप्रस॒वीयं॑ जुह्वति॒ यद्वा॑जप्रस॒वीयं॑ जुहो॒त्य॒ग्निमे॒व तद्भा॑ग॒धेये॑न॒ सम॑र्धय॒त्यथो॑ अभि॒षेक॑ ए॒वास्य॒ स चतु॑र्दशभि॒र्जु॑होति स॒प्त ग्रा॒म्या ओष॑धयः स॒प्त (१) आ॒र॒ण्या उ॒भयी॑षा॒मव॑रुद्ध्या॒ अन्न॑स्यान्नस्य जुहो॒त्यन्न॑स्यान्न॒स्याव॑रुद्ध्या॒ औदु॑म्बरेण स्रु॒वेण॑ जुहो॒त्यूर्ग्वा उ॑दु॒म्बर॒ ऊर्गन्न॑मू॒र्जैवास्मा॒ ऊर्ज॑म॒न्नमव॑ रुन्धे॒ऽग्निर्वै दे॒वाना॑मभि॒षिक्तो॑ऽग्नि॒चिन्म॑नु॒ष्या॑णां॒ तस्मा॑दग्नि॒चिद्व॒र्षति॒ न धा॑वे॒दव॑रुद्धꣳ ह्य॑स्या॒न्नम॒न्नमि॑व॒ खलु॒ वै व॒र्षं यद्धावे॑दन्ना॒याद्धावे॑दु॒पाव॑र्तेता॒न्नाद्य॑मे॒वाभि (२) उ॒पाव॑र्तते॒ नक्तो॒षासेति॑ कृ॒ष्णायै॒ श्वेत॑वत्साये॒ पय॑सा जुहो॒त्य॒ह्नैवास्मै॒ रात्रिं॒ प्र दा॑पयति॒ रात्रि॑याऽहरहोरा॒त्रे

(अग्निसंयोजनाभिधानम्)

एवास्मै प्रत्ते काममन्नाद्यं दुहाते राष्ट्रभृतो जुहोति राष्ट्रमेवाव रुन्धे षड्भिर्जुहोति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर्जुहोति वज्रो वै रथो वज्रेणैव दिशः (३) अभि जयत्यग्निचितꣳ ह वा अमुष्मिँल्लोके वातोऽभि पवते वातनामानि जुहोत्यभ्येवैनममुष्मिँल्लोके वातः पवते त्रीणि जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमव रुन्धे समुद्रोऽसि नभस्वानित्याहैतद्वै वातस्य रूपꣳ रूपेणैव वातमव रुन्धेऽञ्जलिना जुहोति न ह्येतेषामन्यथाऽऽहुतिरवकल्पते (४) ॥

(ओषधयः सप्ताभि दिशोऽन्यथा द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः) ।

सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथ एष खलु वै देवरथो यदग्निरग्निं युनज्मि शवसा घृतेनेत्याह युनक्त्येवैनꣳ स एनं युक्तः सुवर्गं लोकमभि वहति यत्सर्वाभिः पञ्चभिर्युञ्ज्याद्युक्तोऽस्याग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः स्तोमा अप्रतिष्ठितान्युक्थानि तिसृभिः प्रातःस-

(अग्निसंयोजनाभिधानम्)

वनेऽभि मृशति त्रिवृत् (१) वा अग्निर्यावा-
नेवाग्निस्तं पुनक्ति यथाऽनासि युक्त आधीयत
एवमेव तत्प्रत्याहुतयस्तिष्ठन्ति प्रति स्तोमाः
प्रत्युक्थानि यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभि
मृशत्येतावान्वै यज्ञो यावानग्निष्टोमो भूमा त्वा
अस्यात ऊर्ध्वः क्रियते यावानेव यज्ञस्तमन्त-
तोऽन्वारोहति द्वाभ्यां प्रतिष्ठित्या एकयाऽप्र-
स्तुतं भवत्यथ (२) अभि मृशत्यथैनमुत्तरो
यज्ञो नमत्यथो संतत्यै प्र वा एषोऽस्माल्लोका-
च्च्यवते योऽग्निं चिनुते न वा एतस्यानिष्टक
आहुतिरव कल्पते यां वा एषोऽनिष्टक आहु-
तिं जुहोति स्रवति वै सा तां स्रवन्तीं यज्ञोऽ-
नु परा भवति यज्ञं यजमानो यत्पुनश्चितिं
चिनुत आहुतीनां प्रतिष्ठित्यै प्रत्याहुतयस्तिष्ठ-
न्ति (३) न यज्ञः पराभवति न यजमानोऽ-
ष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवैनं
छन्दसा चिनुते यदेकादश त्रैष्टुभेन यद्द्वादश
जागतेन छन्दोभिरेवैनं चिनुते नपात्को वै
नामैषोऽग्निर्यत्पुनश्चितिर्य एवं विद्वान्पुनश्चितिं
चिनुत आ तृतीयात्पुरुषादन्नमत्ति यथा वै
पुनराधेय एवं पुनश्चितिर्योऽग्न्याधेयेन न (४)
ऋध्नोति स पुनराधेयमा धत्ते योऽग्निं चित्वा
नर्ध्नोति स पुनश्चितिं चिनुते यत्पुनश्चितिं चि-

(काम्यचितीनामभिधानम्)

नुत ऋद्ध्या अथो खल्वाहुर्न चैतव्येति रुद्रो वा एष यदग्निर्यथा व्याघ्रꣳ सुप्तं बोधयति तादृगेव तदथो खल्वाहुश्चेतव्येति यथा वसीयाꣳसं भागधेयेन बोधयति तादृगेव तन्मनुरग्निमचिनुत तेन नार्ध्नोत्स एतां पुनश्चितिमपश्यत्तामचिनुत तया वै स आर्ध्नोद्यत्पुनश्चितिं चिनुत ऋद्ध्यै (५) ॥

(त्रिवृदथ विंशत्यग्न्याधेयेन नाचिनुत सप्तदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः) ।

छन्दश्चितं चिन्वीत पशुकामः पशवो वै छन्दाꣳसि पशुमानेव भवति श्येनचितं चिन्वीत सुवर्गकामः श्येनो वै वयसां पतिष्ठः श्येन एव भूत्वा सुवर्गं लोकं पतति कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामिति शीर्षण्वानेवामुष्मिँल्लोके भवत्यलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकामश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति प्रउगचितं चिन्वीत भ्रातृव्यवान्प्र (१) एव भ्रातृव्यान्नुदत उभयतः प्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रति जनिष्यमाणानिति प्रैव जातान्भ्रातृव्यान्नुदते प्रति जनिष्यमाणान्रथचक्रचितं

(काम्यचितीनामभिधानम्)

चिन्वीत भ्रातृव्यवान्वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्र हरति द्रोणचितं चिन्वीतान्नकामो द्रोणे वा अन्नं भ्रियते सयोन्येवान्नमव रुन्धे समूह्यं चिन्वीत पशुकामः पशुमानेव भवति (२) परिचाय्यं चिन्वीत ग्रामकामो ग्राम्येव भवति श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति पितृलोक एवर्ध्नोति विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेताᳪं स एता जमदग्निर्विहव्या अपश्यत्ता उपाधत्त ताभिर्वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्या उपदधातीन्द्रियमेव ताभिर्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते होतुर्धिष्णिय उप दधाति यजमानायतनं वै (३) होता स्व एवास्मा आयतन इन्द्रियं वीर्यमव रुन्धे द्वादशोप दधाति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धेऽष्टावष्टावन्येषु धिष्णियेषूप दधात्यष्टाशफाः पशवः पशूनेवाव रुन्धे षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान्पितॄन्प्रीणाति (४)।

(प्र भवति यजमानायतनं वा अष्टाचत्वारिᳪंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अश्वमेधीयस्तोत्रसंबन्ध्यृगाद्यभिधानम्)

(अथ पञ्चमाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः) ।

पवस्व वाजसातय इत्यनुष्टुक्प्रतिपद्भवति तिस्रोऽनुष्टुभश्चतस्रो गायत्रियो यत्तिस्रोऽनुष्टुभस्तस्मादश्वस्त्रिभिस्तिष्ठꣲस्तिष्ठति यच्चतस्रो गायत्रियस्तस्मात्सर्वाꣲश्चतुरः पदः प्रतिदधत्पलायते परमा वा एषा छन्दसां यदनुष्टुक्परमश्चतुष्टोमः स्तोमानां परमस्त्रिरात्रो यज्ञानां परमोऽश्वः पशूनां परमेणैवैनं परमतां गमयत्येकविꣲशमहर्भवति (१) यस्मिन्नश्व आलभ्यते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣲश एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति शक्वरयः पृष्ठं भवन्त्यन्यदन्यच्छन्दोऽन्यैन्य वा एते पशव आ लभ्यन्त उतेव ग्राम्या उतेवाऽऽरण्या यच्छक्वरयः पृष्ठं भवन्त्यश्वस्य सर्वत्वाय पार्थुरश्मं ब्रह्मसामं भवति राश्मिना वा अश्वः (२) यत ईश्वरो वा अश्वोऽयतोऽप्रतिष्ठितः परां परावतं गन्तोर्यत्पार्थुरश्मं ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै संकृत्यच्छावाकसामं भवत्युत्सन्नयज्ञो वा एष यदश्वमेधः कस्तद्वेदेत्याहुर्यदि सर्वो वा क्रियते न वा सर्व इति यत्संकृत्यच्छावाकसामं भवत्यश्वस्य सर्वत्वाय पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्त-

(अश्वमेधीयस्तोत्रसंबन्ध्यृगाद्यभिधानम्)

ममहर्भवति सर्वस्याऽऽप्त्यै सर्वस्य जित्यै सर्व-
मेव तेनाऽऽप्नोति सर्वं जयति (३) ॥

(अहर्भवति वा अश्वोऽहर्भवति दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

देवासुरास्तेनतव्यां रुद्रोऽश्मन्नृषदे वहुर्देनं प्राचीमिति वसोर्धारामग्निर्दे-
वेभ्यः सुवर्गाय यज्ञाकूताय छन्दश्चितं पवस्व द्वादश ॥ १२ ॥

देवासुरा अग्नायो वै ग्रुमुष्टिः प्रथमो देवयतामेतद्वै छन्दसाꣳ रूप-
मुक्नोत्यष्टौ पञ्चाशत् ॥ ५८ ॥

हरिः ॐ ।

इतिकृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ पञ्चमकाण्डे चतुर्थः प्रपाठकः)।

(तत्र प्रथमादिद्वादशान्ता अनुवाकाः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रपाठके तु तार्तीये वर्णिताश्चितयोऽखिलाः ।
चतुर्थे चितिसंस्कारो द्वादशात्रानुवाककाः ॥
इष्टका इन्द्रतन्वाख्या यज्ञतन्वभिधास्तथा ।
नक्षत्राख्याश्च विहिताः प्रथमेऽप्यनुवाकके ॥
ऋतव्या वैश्वदेव्यश्च द्वितीये प्रोक्षणं तथा ।
शतरुद्रीयहोमस्तु तृतीये समुदीरितः ॥
परिषेचनमभ्युक्तं तुर्ये तद्वद्विकर्षणम् ।
व्याघारणं वैश्वकर्मणाऽऽहुतिश्चात्र पञ्चमे ॥

षष्ठे तु समिदाधानमग्निप्रणयनं तथा ।
होताऽन्वाहाप्रतिरथं दशर्चं सविकल्पकम् ।
सप्तमे चितिमारुह्य वह्निं तत्र विनिक्षिपेत् ।
वसोर्धाराऽष्टमे वाजप्रसवीयोऽप्यनन्तरे ॥
दशमे वह्नियोगश्च पुनश्चितिरितीरितः ।
एकादशे तु काम्यानि विहव्याश्च समीरिताः ॥
द्वादशे त्वश्वमेधीयस्तोत्रे त्र्यमुदीरितम् ।
ककुस्तोमः साम चेत्येवं प्रपाठक उदीरितः ॥

तत्राऽऽदौ बहिष्पवमानस्तोत्रे चोदकप्राप्तां गायत्रीमपवदितुमन्यामृचं विधत्ते—

पवस्व वाजसातय इति । बहिष्पवमानस्तोत्रे प्राकृते त्र्यस्तृचा गायत्राः । तेऽत्र चोदकेन प्राप्ताः । तत्परित्यागेन पवस्वेत्यादिका येयमृगनुष्टुबुक्ता प्रतिपत्प्रथमा कार्या । प्रतिपद्यते प्रारभ्यतेऽनयेति प्रतिपत् । अस्मिंस्तृचे चतुष्पादो याास्तिस्रोऽनुष्टुभस्तास्त्रिपात्त्वेन विभज्यमानाश्चतस्रो गायत्रियो भवन्ति । तत्र यस्मात्स्वरूपेण तिस्रोऽनुष्टुभस्तस्मादश्वो गमनं परित्यज्यैकत्र यदा तिष्ठति तदानीमेकास्मिन्पादे भारमुपेक्ष्य त्रिष्वेव पादेषु भारमवलम्ब्य तिष्ठति । यस्मादेता विभज्यमानाश्चतस्रो गायत्रियस्तस्मात्पलायमानोऽश्वश्चतुरः पादान्सर्वानपि भूमौ प्रक्षिपन्नेव पलायते । प्रकारान्तरेणानुष्टुभं प्रशंसति—

परमा वा इति । सर्ववागात्मकत्वाच्छन्दसां मध्येऽनुष्टुभः परमत्वं वाग्वा अनुष्टुबिति बहुशः श्रुतम् । स्तोमानां त्रिवृदाग्निष्टोमादीनां मध्ये प्रकृतत्वाच्चतुष्टोमस्य परमत्वम् । त्रिरात्रस्याश्वमेधस्य महापातकप्रायश्चित्तरूपत्वाद्यज्ञानां मध्ये परमत्वम् । तादृशयज्ञसाधनत्वात्संग्रामजयहेतुत्वाच्च पशूनां मध्येऽश्वस्य परमत्वम् । एवं सति परमस्य त्रिरात्रस्य परमे चतुष्टोमे परमस्याश्वस्य संबन्धित्वेनानुष्टुभि परमायां प्रयुज्यमानायां परमेणैवैनं साधनसमूहेन परमतां श्रेष्ठतां प्राप्नोति । प्रकृतिप्राप्तांस्त्रिवृदादिस्तोमान्बाधितुं स्तोमान्तरं विधत्ते—

एकविंशमिति । एकविंशावृत्त्यात्मकेन स्तोमेन सर्वत्र युक्तं न तु स्तोमान्तरेण तादृशमेकविंशमहः कर्तव्यम् । प्रथमवृत्तीयपयोरह्नोर्व्यावृत्तये विशे-

(अश्वमेधीयस्तोत्रसंबन्धगाद्यभिधानम्)

ष्यते—यस्मिन्नश्वमेधेऽहन्ययमश्व आलभ्यते तदहरेकाविंशम् । अथो दुक्थ्यसंज्ञके द्वितीयेऽहन्यालभ्यते । मासर्तुलोकादित्यानामेकविंशतिसंख्योपेतत्वाज्जगद्रूपेण प्रजापतिशरीरत्वादश्वस्य प्रजापतिजन्यत्वाच्च तस्याश्वस्य समृद्ध्यर्थमयमेकविंशतिस्तोमो युक्तः।

अथ पृष्ठस्तोत्रगतानामृचां छन्दोन्तरं वारयितुं शक्वर्याख्यं छन्दो विधत्ते—

शक्वरयः पृष्ठमिति । शक्वरीछन्दोपेता ऋचः शक्वरयस्ताभिर्युक्तं पृष्ठस्तोत्रं कुर्यात् । सप्तपादात्मके शक्वर्यात्मके(रूपे) छन्दसि पादत्रयात्मकं गायत्र्याख्यं छन्दः, पादचतुष्टयात्मकं त्रिष्टुबाख्यं छन्दः, पादपञ्चकात्मकं पङ्क्त्यात्मकं(रूपं) छन्द इत्येवमन्यदन्यन्नानाविधं छन्दोऽन्तर्भवति । अश्वमेधेऽप्ययमप्रधानकेऽप्येऽन्ये नानाजातीया एव पशव आलभ्यन्ते । तत्र केचन ग्राम्या एव केचनाऽऽरण्या एव । तत्राप्यवान्तरभेदा बहुधा द्रष्टव्याः । एवं सर्वपृष्ठस्तोत्रेऽश्वमेधसंबन्धिनि नानाछन्दोगर्भितशक्वरीस्वीकारे सति मुख्यस्याश्वस्य सर्वपश्वात्मकत्वं संपादितं भवति । अथ चोदकप्राप्तं सामान्तरमपवदितुं सामविशेषं विधत्ते—

पार्थुरश्ममिति । पृथुरश्मिना महर्षिणा दृष्टं साम पार्थुरश्मं, ब्रह्माणमृत्विजमाभिलक्ष्य गीयमानं साम ब्रह्मसामं, तच्च नात्र प्रकृतं कार्यं किंतु पार्थुरश्मं कार्यम् । यस्मात्कारणाद्रश्मिना रज्जुविशेषेण दृढीभूतोऽश्वः पुरुषमपेक्षितदेशे नेतुमीश्वरः समर्थः, यस्माच्च कारणाद्यतो नियमनरहितोऽश्वः क्वाप्यप्रविष्टितः सन्नत्यन्तं दूरं गन्तुं समर्थस्तस्मादश्वस्य यत्यै दूरगमननियमनायोपरितनपुरुषेण धारणाय च पार्थुरश्मं कार्यम्। तथैवाच्छावाकं प्रति गातव्यं सामविशेषं विधत्ते—

संकृत्यच्छावाकेति । समीचीनाऽऽकृतिर्यस्य साम्नस्तत्संकृति विकलमङ्गं सम्यक्कर्तुं समर्थमित्यर्थः । एतन्नामकं सामगानां यत्प्रसिद्धं तदच्छावाकमभिलक्ष्य गातव्यम् । योऽयमश्वमेधः क्रतुः सोऽयं विप्रष्टयज्ञावयवो बहुभिरवयवैरुपेतत्वात्कृत्स्नोऽयमवयवसंघातः क्रियते क्वचित्किंचिदवयवो विस्मृतो वेति को नाम लोके वेत्ति । तस्मात्संकृतिगानेनाश्वसंबन्धिनः क्रतोः सर्वावयवसाकल्यं भवति । तच्च देवानां संपूर्त्यै यजमानस्य च स्वर्गप्राप्तिविघ्नपरिहाराय संपद्यते ।

अपेक्षितविशेषगुणैर्युक्तं द्वितीयमहर्विधायाथ तृतीयं विधत्ते—

सर्वस्तोम इति । त्रिवृदाद्यास्त्रयस्त्रिंशदन्ता आम्नाताः सर्वेऽपि स्तोमा यस्मिन्नतिरात्रे सन्ति सोऽयमतिरात्रस्तृतीयदिवसे कर्तव्यः । तच्च स्तोमगतं

(अश्वमेधीयस्तोत्रसंबन्धयुगाद्यभिधानम्)

सर्वस्वं स्वेन पूर्वमप्राप्तस्य सर्वस्यापि प्राप्त्यै भवति । यस्तु वैरी पूर्वमजितस्तस्य सर्वस्यापि जयाय भवति । तस्मादयं यजमानस्तेन सर्वस्तोमेन प्राप्तव्यं धनादिकं सर्वं प्राप्नोति, जेतव्यं वैरिवर्गं सर्वं जयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे चतुर्थप्रपाठके प्रथमादिद्वादशान्ता अनुवाकाः ॥ १–१२ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

(दीक्षणीयेष्ट्यभिधानम्)

(अथ पञ्चमाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

यदेकेन सꣳस्थापयति यज्ञस्य संतत्या अविच्छेदायैन्द्राः पशवो वै ये मुष्करा यदैन्द्राः सन्तोऽग्निभ्य आ लभ्यन्ते देवताभ्यः समदं दधात्याग्नेयीस्त्रिष्टुभो याज्यानुवाक्याः कुर्याद्यदाग्नेयीस्तेनाऽऽग्नेया यत्त्रिष्टुभस्तेनैन्द्राः समृद्ध्यै न देवताभ्यः समदं दधाति वायवे नियुत्वते तूपरमा लभते तेजोऽग्नेर्वायुस्तेजस एष आ लभ्यते तस्माद्यद्रियङ्ग्वायुः (१) वाति तद्रियङ्ग्निर्दहाति स्वमेव तत्तेजोऽन्वेति यन्न नियुत्वते स्यादुन्माद्येद्यजमानो नियुत्वते भवति यजमानस्यानुन्मादाय वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय हिरण्यगर्भः समवर्तताग्र इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय सर्वाणि वा एष रूपाणि पशूनां प्रत्या लभ्यते यच्छ्मश्रुणस्तत् (२) पुरुषाणाꣳ रूपं यत्तूपरस्तदश्वानां यदन्यतोदन्तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानां वायुर्वै पशूनां प्रियं धाम यद्वायव्यो भवत्येतमेवैनमभि संजानानाः पशव उप तिष्ठन्ते वायव्यः कार्याः प्राजापत्या३ इत्याहुर्यद्वायव्यं कुर्यात्प्रजापतेरिया-

(दीक्षणीयेष्ट्यभिधानम्)

यत्प्राजापत्यं कुर्याद्वायोः (३) इयाद्यद्वायव्यः पशुर्भवति तेन वायोर्नैति यत्प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेर्नैति यद्द्वादशकपालस्तेन वैश्वानरान्नैत्याग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चाऽऽरभतेऽग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवताः (४) एवोभयतः परिगृह्य यजमानोऽव रुन्धे पुरोडाशेन वै देवा अमुष्मिँल्लोक आर्ध्नुवन्चरुणाऽस्मिन्यः कामयेतामुष्मिँल्लोक ऋध्नुयामिति स पुरोडाशं कुर्वीतामुष्मिन्नेव लोक ऋध्नोति यदष्टाकपालस्तेनाऽऽग्नेयो यत्त्रिकपालस्तेन वैष्णवः समृद्ध्यै यः कामयेतास्मिँल्लोक ऋध्नुयामिति स चरुं कुर्वीताग्नेर्घृतं विष्णोस्तण्डुलास्तस्मात् (५) चरुः कार्योऽस्मिन्नेव लोक ऋध्नोत्यादित्यो भवतीयं वा अदितिरस्यामेव प्रति तिष्ठत्यथो अस्यामेवाधि यज्ञं तनुते यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते यथा सामि गर्भोऽवपद्यते तादृगेव तदार्तिमार्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्संवत्सरो वा अग्निर्वैश्वानरो यथा संवत्सरमाप्त्वा (६) काल आगते विजायत एवमेव संवत्सरमाप्त्वा काल आगतेऽग्निं चिनुते नाऽऽ-

(दीक्षणीयेष्ट्यभिधानम्)

र्तिमार्छत्येषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे त्रीण्येतानि हवी॑षि भवन्ति त्रय इमे लोका एषां लोका॑नाꣳ रोहाय (७)।

(यदि॒यं॒ङ्ग॒वायुः श्मश्रुणस्तद्वायोर्निर्वपति देवतास्तस्माद्राष्ट्वाऽष्टात्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः॥ १॥

अथ पञ्चमकाण्डे पञ्चमः प्रपाठकः।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
मन्त्राणां ब्राह्मणं प्रोक्तं प्रपाठकचतुष्टये।
अथ प्रश्नत्रये तत्र शिष्टमङ्गं विविच्यते॥

प्रथमप्रपाठक एकविंशत्या मासैरित्यस्मिन्ननुवाकेऽग्निभ्यः पशूनालभत इति विधायान्येषां पशूनां पर्यग्निकृतानामुत्सर्गमुक्त्वा प्राजापत्येन सꣳस्थापयतीति यदुक्तं तदनुस्मारयितुमनुवदति——

यदेकेनेति। इतरान्पशूनुत्सृज्य प्राजापत्येनैकेन समापनं यत्तत्प्रारब्धस्य पशुकर्मणः सांतत्याय भवति। असमापने तु विच्छेदः स्यात्।

अथ तस्मिन्कर्मणि मन्त्रविशेषं विधत्ते——

ऐन्द्राः पशव इति। ये लोके मुष्करा अण्डसहिताः पशवः सन्ति त सर्वे पुंस्त्वलक्षणयेन्द्रियवृद्ध्या युक्तत्वादिन्द्रदेवताकाः। तादृशानामन्यथालम्भने देवतानां कलहं संपादयेत्। अतः कलहपरिहारायाग्निदेवताकास्त्रिष्टुप्छन्दस्का ऋचो याज्यानुवाक्याः कुर्यात्। तथा सति ऋचामाग्नेयत्वेन पशवोऽप्याग्नेयाः संपद्यन्ते। त्रिष्टुभ इन्द्रेण सहोत्पन्नत्वात्तेन च्छन्दसा पशव ऐन्द्रा अपि संप॰द्यन्ते। तदुभयं मिलित्वा कलहं परिहृत्य समृद्ध्यै संपद्यते।

---

१ ख. °म्भने दे°।

यदुक्तं सूत्रकारेण—"अपि वा सर्वेषामेतेषां स्थाने वायवे नियुत्वते श्वेतमजं तूपरमालभते वायुमती श्वेतवती वपाया याज्यानुवाक्ये" इति। तमिमं पक्षं विधत्ते—

वायवे नियुत्वत इति। नियुत्संज्ञका अश्वविशेषा यस्य वायोः सन्ति सोऽयं नियुत्वान्। तूपरः शृङ्गरहितः। अग्निज्वालाया उद्बोधकत्वाद्वायुरेवाग्नेस्तेजः। तस्मात्तेजस एष तूपर आलभ्यो भवति। यां दिशं प्रति गच्छतीति यद्दियङ्वायुर्यद्दिगभिमुखो वाति तद्दिगभिमुख एवाग्निर्दहति। तेन दहनेन स्वकीयमेव तेजोऽनुगतवान्भवति। नियुत्वत इत्येतद्वायुविशेषणमन्वयव्यतिरेकाभ्यां प्रशंसति—

यन्न नियुत्वत इति। वायोर्नियामकाश्वाभावे सति यजमानोऽपि नियामकबुद्धिरहितः सन्नुन्मत्तो यत्र क्वापि गच्छेद्यत्किंचिद्वा वदेत्। अतस्तत्परिहाराय नियुत्वद्विशेषणं वायोरपेक्षितम्॥ मन्त्रविशेषं विधत्ते—

वायुमतीति। पिवाऽन्नं रयिवृध इत्यृचौ वायुमत्यौ श्वेतवत्यौ च, ते वायवे समनस इति वायुशब्दसद्भावाच्छ्वेतः सिषक्तीति श्वेतशब्दसद्भावाच्च। वायोराग्नितेजस्त्वात्पशुश्वैत्यस्य च तेजोरूपत्वात्तदुभयं सतेजस्त्वाय संपद्यते।

द्वितीयाघारे प्राकृतमन्त्रं बाधितुं विधत्ते—

हिरण्यगर्भ इति। हिरण्यं ब्रह्माण्डरूपं परमेश्वरस्य प्रजापतेर्गर्भे वर्तते सोऽयं हिरण्यगर्भः। यद्वा हिरण्मयस्य ब्रह्माण्डस्य मध्ये सत्यलोके गर्भरूपत्वेनावस्थितश्चतुर्मुखो हिरण्यगर्भः। अतोऽयं मन्त्रः प्रजापतेरनुरूपः। पशुं प्रशंसति–

सर्वाणि वा इति। पशूनां द्विपदां चतुष्पदां च यानि रूपाणि सन्ति तानि सर्वाणि प्रति तद्रूपत्वेनैव पशुरालभ्यते। तत्र श्मश्रुयुक्तत्वेन द्विपदा पुरुषेण साम्यं, शृङ्गरहितत्वेनाश्वस्य साम्यम्, अधस्तनपङ्क्तावेव दन्तसद्भावेन गोसाम्यम्, अविसदृशैः क्षुद्रकैर्द्विखुरैरुपेतत्वादविसाम्यम्, अजजात्या सर्वेषामजानां साम्यम्। अथ वायुदेवतां प्रशंसति—

वायुर्वै पशूनामिति। पशूनां प्रावरणरहितत्वेन संचरणाद्वायुः प्रियं धाम। अतः पशोर्वायव्यत्वे सत्येनं वायुमभिलक्ष्य सम्यक्स्वकीयं धाम गानन्तः पशवः प्राप्यन्ते। अथ मीमांसया निर्णेतुं कंचिदर्थविशेषमनुष्ठेयं विधत्ते—

वायव्य इति। पशोर्वायव्यत्वे सत्ययं पशुः प्रजापतेरपेयात्।

(दीक्षणीयेष्ट्यभिधानम्)

प्राजापत्ये सति वायोरपेयात् । एवमन्यदप्यत्राध्याहर्तव्यम् । पक्षद्वयेऽपि वैश्वानराद्प्यपेयाद्वैश्वानरसंबन्धित्वे ताभ्यामपेयादिति प्रथमपक्षोपन्यासेऽपि वैश्वानरादित्यपि तृतीयः पक्षोऽध्याहर्तव्यः । तत्रायं निर्णयः—पशुर्वायव्यः पुरोडाशः प्राजापत्यस्तस्य द्वादशकपालत्वं वैश्वानरसंबन्धि तेन देवतात्रयात्प्रापैतीति ।

यदुक्तं सूत्रकारेण—“ यत्प्राग्दीक्षणीयायास्तत्कृत्वा त्रिहविषं दीक्षणीयां निर्वपति वैश्वानरं द्वादशकपालं तृतीयं पुरस्तादसंवत्सरभृतः ” इति । अत्राऽऽग्नावैष्णवमेकादशकपालमादित्यं चरुं चापेक्ष्य वैश्वानरस्य तृतीयत्वम् । तत्र प्रथमं हविर्विधत्ते—

आग्नावैष्णवमिति । अग्नेः सर्वदेवतारूपत्वं सोमप्रकरणे स्पष्टमाम्नातम्—“ ते देवा बिभ्यतोऽग्निं प्राविशन्तस्मादाहुरग्निः सर्वा देवताः ” इति । यज्ञस्य सर्वाङ्गव्यापित्वाद्विष्णुत्वम् । अत एतदीयेन हविषा सर्वा देवता यज्ञं चोपक्रान्तवान्भवति । प्रकारान्तरेण देवताद्वयं प्रशंसति—

अग्निरवमो देवतानामिति । शस्त्राणां मध्ये प्रथमशस्त्रे भूरग्निर्ज्योतिरित्युक्तत्वादग्नेरवमत्वं चरमशस्त्रे विष्णोर्नुकमित्युक्तत्वाद्विष्णुः परमः । अत आग्नावैष्णवनिर्वापेण मध्यवर्तिनीः सर्वा देवता उभयतः परिगृह्य स्वाधीनाः करोति । कामनाविशेषेण पुरोडाशं विधत्ते—

पुरोडाशेन वा इति । अथ कपालगतामेकादशसंख्यां विभज्य प्रशंसति—

यदष्टाकपाल इति । अन्यत्र ह्याग्नेयमष्टाकपालं निर्वपतीत्युक्तत्वादष्टसंख्याऽग्नेः प्रिया । तथा वैष्णवं त्रिकपालमित्युक्तत्वात्त्रिसंख्या विष्णोः प्रिया । तदुभयं समृद्ध्यै भवति । फलविशेषाय चरुं विधत्ते—

यः कामयेतेति । घृतमग्नेः [प्रियम्]। “घृतमस्य योनिर्घृते श्रितः” इत्यादिमन्त्रवर्णात् । तण्डुलास्तु विष्णोः प्रियाः । “येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय” इति श्रुतेः । तस्मादुभयप्रियत्वाद्घृतयुक्तश्चरुः कार्यः । एतेनास्मिँल्लोके समृद्धो भवति । अथ हविरन्तरं विधत्ते—

आदित्यो भवतीति । अदितिर्देवता यस्य चरोः सोऽयमादित्यः । आग्नावैष्णवं हविः प्रथमं कृत्वा द्वितीयहविष्ट्वेनायमादित्यश्चरुः कार्यः। अदितिशब्देनेयमेव भूमिरुच्यते । अस्यामेव भूमावुपरि यज्ञं कृतवान्भवति भूमौ प्रतिष्ठितश्च भवति । अथ तृतीयं हविर्विधत्ते—

---

१ ख. घ. ङ. च. °व्यः पशुपु° ।

यो वै संवत्सरमिति । उख्यस्याग्नेः संवत्सरधारणमुपरिष्टाद्विधास्यति—"संवत्सरमुख्यं भृत्वा" इति । तेन च धारणेन विनाऽग्निचयनमपरिपक्वगर्भपातेन समानम् । अतो यजमानो म्रियते । तस्मात्संवत्सरं धारयितुमशक्तः पुमान्संवत्सरात्प्रागेव तिस्रः षड्वा दश वा रात्रीर्दीक्षाभिरक्रीषुर्वैश्वानरं द्वादशकपालं निर्वपेत् । तस्य च वैश्वानरस्याग्नेः संवत्सररूपत्वात् । यथा लोके संवत्सरेण पूर्णो गर्भः काले सुखेन जायत एवमप्यनयेष्ट्या संवत्सरं प्राप्य काले प्राप्ते चितन्वान्भवति । ततो न म्रियते । प्रकारान्तरेण प्रशंसति—

एषा वा अग्नेरिति । सर्वेषां पुरुषाणामुपकारकः कश्चिदग्निमूर्तिविशेषो वैश्वानरः । सा च मूर्तिरग्नेः प्रियं शरीरम् । ततस्तयेष्ट्याऽग्निसंबन्धिनीं प्रियामेव तनुवं प्राप्नोति । विहितानां हविषां त्रित्वं प्रशंसति—

त्रीण्येतानीति । प्राप्तय इत्यर्थः । यद्यप्याग्नावैष्णवं हविः प्रकृतावपि विद्यमानत्वाच्चोदकप्राप्तं तथाऽप्युपरितनहविर्विधानायायमनुवाद इत्यविरोधः । सेयं दीक्षणीयेष्टिः षड्भिर्दीक्षयतीत्यस्मादनुवाकात्पूर्वं द्रष्टव्या । प्रकृतौ दीक्षाहुतीनामिष्ट्यनन्तरभावित्वात् । यत्तु रुक्ममन्तरं प्रतिमुञ्चत इति विहितं तदुपरितने न ह स्म वै पुराऽग्निरित्येतस्मिन्ननुवाके समाम्नातम् । तत्रेयं मीमांसा ।

पञ्चमाध्यायस्य द्वितीयपादे द्वादशाधिकरणे चिन्तितम्—

चयने रुक्मधृत्यादिः पुरोत स्वामिसंस्कृतिः ।
पाठादाद्योऽन्तिमः क्लृप्तः(प्त)क्रमात्पाठस्य न क्षतिः ॥

अग्निचयने दीक्षणीयादेरूर्ध्वं रुक्मधारणमाम्नातम् । कण्ठे धृतः सन्नुरसि लम्बमानः सौवर्ण आभरणविशेषो रुक्मशब्दार्थः । उखास्थितोऽग्निः शिक्येऽवस्थापितः कण्ठे धार्यमाणो यथोरःप्रदेशं न दहति तथा व्यवधायकत्वेन तद्धारणम् । अत एव ब्राह्मणम्—"रुक्ममन्तरं प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्ते" इति । यजमानसंस्कारा वपनादयः प्रकृतौ दीक्षणीयानन्तरभाविनश्चोदकेन प्राप्तास्तेभ्यः पूर्वमेव रुक्मप्रतिमोकः पदार्थः कार्यः । तस्य प्रत्यक्षपाठात्सावित्रादिषु तस्याऽऽदृतत्वादिति चेत् । नैवम् । यजमानसंस्काराणां दीक्षणीयानन्तर्यं प्रकृतौ क्लृप्तम् । रुक्मस्य तु पाठेन तत्कल्पनीयम् । तस्मात्संस्काराः पूर्वभाविनः । न च सावित्रदृष्टान्तो युक्तः । दीक्षणीयाया इव संस्काराणां प्रतिमो-

१ ख. °क्ममभृत्या° । २ क. घ. ङ. °त्यादि पु° । ३ ख. च. °राश्च व° । ४ ख. च. °न इह चोद्° ।

कादूर्ध्वं पुनः पाठात्। न च दीक्षणीयानन्तर्ये बाधिते रुक्मप्रतिमोकपाठवैयर्थ्यम्। स्वरूपबोधनेन चरितार्थत्वात्। ततो रुक्मप्रतिमोकः पश्चात्कार्यः।

चतुर्थाध्यायस्य चतुर्थपादे षष्ठाधिकरणे चिन्तितम्—

नित्यो नैमित्तिको वा स्याद्यागो वैश्वानरश्रितौ।
नित्यः पुरेव यच्छब्दादविरोधाच्च पश्चिमः॥

अग्निचयने श्रूयते—"यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते यथा सामि गर्भोऽवपद्यते तादृगेव तदार्तिमार्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्" इति। उखा पिठरः। तामुखां युञ्जानः प्रथमं मन इत्यादिपाठकाम्नातैर्मन्त्रैः संपाद्य तस्यामुखायामग्निं निधाय षड्यामे द्वादशोद्यामे वा शिक्ये तामुखामवस्थाप्य तच्छिक्यं स्वकण्ठे बद्ध्वा तमुख्यमग्निं संवत्सरं भृत्वा पश्चादिष्टकाभिरग्निश्चेतव्यः। अभरणे त्वपूर्णगर्भपातवद्विनाशः स्यात्। अतो वैश्वानरेष्टिं चयनात्प्रागेव कुर्यादित्यर्थः। अत्राप्यन्तरायवाक्यवदभरणवाक्यस्यार्थवादत्वान्नित्या वैश्वानरेष्टिरिति चेन्मैवम्। यः पुमान्भृत्वा चिनुते स निर्वपेदिति कर्तृसमानाधिकृतयच्छब्दबलादभरणेष्ट्योर्निमित्तनैमित्तिकभावावभासात्। किंच दधिग्रहस्य नित्यस्य पाक्षिकत्वरूपं नैमित्तिकत्वं विरुद्धम्। इह तु नित्यत्वे प्रमाणाभावादेकमेव नैमित्तिकत्वमित्यविरोधः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः)।

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनु प्राविशत्ताभ्यः पुनः संभवितुं नाशक्नोत्सोऽब्रवीदृध्नवदित्स यो मेतः पुनः संचिनवदिति तं देवाः समचिन्वन्ततो वै त आर्ध्नुवन्यत्समचिन्वन्तच्चित्यस्य चित्यत्वं य एवं विद्वानग्निं चिनुत ऋध्नोत्येव कस्मै कमग्निश्चीयत इत्याहुरग्निवान् (१) असानीति वा अग्निश्चीयतेऽग्नि-

---

१ ख. च. बोधिते।

वानेव भवति कस्मै कमग्निश्चीयत इत्याहुर्देवा मा वेदन्निति वा अग्निश्चीयते विदुरेनं देवाः कस्मै कमग्निश्चीयत इत्याहुर्गृह्यसानीति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमानसानीति वा अग्निः (२) चीयते पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुः सप्त मा पुरुषा उप जीवानिति वा अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनममुष्मिँल्लोक उप जीवन्ति प्रजापतिरग्निमचिकीषत तं पृथिव्यब्रवीन्न मय्यग्निं चेष्यसेऽति मा धक्ष्यति सा त्वाऽतिदह्यमाना वि धविष्ये (३) स पापीयान्भविष्यसीति सोऽब्रवीत्तथा वा अहं करिष्यामि यथा त्वा नातिधक्ष्यतीति स इमामभ्यमृशत्प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपाधत्तानतिदाहाय यत्प्रत्यग्निं चिन्वीत तदभि मृशेत्प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद (४) इतीमामेवेष्टकां कृत्वोप धत्तेऽनतिदाहाय प्रजापतिरकामयत प्र जायेयेति स एतमुख्यमपश्यत्तꣳ संवत्सरमबिभस्ततो वै स प्राजायत तस्मात्संवत्सरं भार्यः प्रैव जायते तं वसवोऽब्रुवन्प्र त्वमजनिष्ठा वयं प्र जायामहा इति तं वसुभ्यः प्रायच्छत्तं त्रीण्यहान्यबिभ-

(चयनतत्फलाभिधानम्)

रुस्तेन (५) त्रीणि च शतान्यसृजन्त त्रयस्त्रिंशतं च तस्मात्त्र्यहं भार्यः प्रैव जायते तान्रुद्रा अब्रुवन्प्र यूयमजनिढ्वं वयं प्र जायामहा इति तं रुद्रेभ्यः प्रायच्छन्तं षडहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिंशतं च तस्मात्षडहं भार्यः प्रैव जायते तानादित्या अब्रुवन्प्र यूयमजनिढ्वं वयम् (६) प्र जायामहा इति तमादित्येभ्यः प्रायच्छन्तं द्वादशाहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिंशतं च तस्माद्द्वादशाहं भार्यः प्रैव जायते तेन वै ते सहस्रमसृजन्तोखां सहस्रतमीं य एवमुख्यं साहस्रं वेद प्र सहस्रं पशूनाप्नोति (७) ॥

(अग्निवान्पशुमानसानीति वा अग्निर्धिष्ण्ये मृगेत्प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद तेन तानादित्या अब्रुवन्प्र यूयमजनिढ्वं वयं चत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः)।

दीक्षणीयेष्टिराद्यानुवाके निरूपिता। अथ द्वितीये चयनतत्फले अभिधीयेते। तत्राऽऽदौ चयनं विधातुं प्रस्तौति—

प्रजापतिरिति। पुरा कदाचित्प्रजापतिः सर्वाः प्रजाः सृष्ट्वा प्रेणा प्रेम्णा प्रियातिशयेन तासु प्रजासु स्वयं प्राविशत्। प्रविश्य च ताभ्यः प्रजाभ्यः तत्कायात्स्वकीयेन केनचिद्रूपेण पुनरुद्भवितुं नाशक्नोत्। अशक्तस्तत्रैव स्थित इदमब्रवीत्—यः कश्चिन्मामितः प्रजाभ्यः पुनः संभवो यथा भवति तथा चिनव-

च्चिनोति स पुरुष ऋध्नवदिद्दध्नोत्येवेति तद्वाक्यं श्रुत्वा देवा अग्निरूपेण पुनः संभृतो यथा भवति तथा तं प्रजापतिरूपमग्निमिष्टकाभिरचिन्वंस्तेन चयनेन ते देवा ऋद्धिं प्राप्ताः। यस्मादेवं सम्यगचिन्वंस्तस्माच्चयनविषयादग्नेश्चित्यमिति नाम संपन्नम्। इदानीं विधत्ते—

य एवं विद्वानिति। अथ प्रश्नोत्तराभ्यां क्रमेण फलविशेषान्नि(न्दि)-दर्शयिषुरादावेकं फलं दर्शयति—

कस्मै कमग्निरिति। कमित्यव्ययं कामायेत्यस्मिन्नर्थे वर्तते। ब्रह्मवादिषु मध्ये केचिदेवं पप्रच्छुः—कस्मै कामायायमग्निश्चीयत इति। उक्त एवमुत्तरमाहुः—अग्निवानसानीति शास्त्रीयाग्नियुक्तोऽहं भवानीति कामयित्वाऽयमग्निश्चीयत इति। ततोऽग्निं चित्वोत्तरक्रतुयोग्यशास्त्रीयाग्नियुक्त एव भवति।

द्वितीयं फलं दर्शयति—

कस्मै कमग्निरिति। स्वर्गस्था देवाः सर्वे मा मां यजमानं वेदन्नयं यजमानः सम्यगनुष्ठितवानित्येवं विदन्त्विति कामयित्वाऽग्नेश्चितत्वाद्देवा एवं विदन्त्येव। तृतीयं फलं दर्शयति—

कस्मै कमग्निरिति। शास्त्रीयसर्वकर्मानुष्ठानसमर्थो गृहस्थो भवानीति कामयित्वाऽग्निं चिन्वानस्तथैव भवति। चतुर्थं फलं दर्शयति—

कस्मै कमग्निरिति। पशुसमृद्धेः कामितत्वात्पशुसमृद्धिर्भवत्येव।

पञ्चमं फलं दर्शयति—

कस्मै कमग्निरिति। प्राञ्चः पूर्वभाविनः पितृपितामहप्रपितामहास्त्रयः पुरुषाः प्रत्यञ्चः पश्चाद्भाविनः पुत्रपौत्रप्रपौत्रास्त्रयः पुरुषाः। मध्यवर्ती स्वयं सप्तमः। एते सर्वे पुरुषा मामुपजीवन्तु। अहमेवैतेषां रक्षको भविष्यामीति कामयमानोऽग्निं चित्वा स्वर्गे लोके तथैव रक्षको भवति॥

यदुक्तं सूत्रकारेण—"प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्युत्तरवेदिमभिमृश्य" इति। तदिदं विधातुं प्रस्तौति—

प्रजापतिरग्निमिति। पुरा कदाचित्प्रजापतिरग्निं चेतुमिच्छां चकार। तं चयनार्थिनं प्रजापतिं पृथिव्येवमब्रवीद्धे प्रजापते ममोपर्यग्निं न चेष्यसेऽग्निचयनं न करिष्यसि। मा कुर्वित्यर्थः। कुत इति चेत्तच्छृणु। ममोपरि चीयमानोऽग्निर्मामतिशयेन धक्ष्यति तदानीमत्यन्तं दह्यमाना साऽहमितस्ततः परिलुठन्ती

(चयनतत्फलाभिधानम्)

ममोपरि स्थितं त्वामपि कम्पयिष्ये। ततः स त्वं पापिष्ठो दरिद्रो भविष्यसीति। तच्छ्रुत्वा प्रजापतिरिदमब्रवीत्—यथाऽयं चीयमानोऽग्निस्त्वां नातिशयेन धक्ष्यति तथैवाहं करिष्यामीत्युक्त्वा प्रजापतिर्वक्ष्यमाणेन मन्त्रेणेमां भूमिमभितः स्पृष्टवान्। मन्त्रस्य चायमर्थः—हे भूमे त्वामाद्यकारणभूतामाद्यप्रजापतिः सादयतु स्थापयतु। अथ प्रजापतिरूपया तया तव रक्षयित्र्या देवतया ध्रुवा सती सीदोपविशाङ्गिरोभिः स्थापिता यथा ध्रुवा भवति तद्वदिति। अनेन समन्त्रकस्पर्शनेनेमां सर्वां भूमिमिष्टकामेव कृत्वाऽग्निशरीरान्तःपातित्वेनोपाधत्त। नह्यग्निः स्वात्मानमतिदहति। अथ विधत्ते—

यत्प्रत्यग्निमिति। यच्चयनस्थानं प्रतीष्टकाभिरग्निं चेतुमिच्छति तत्स्थानं प्रजापतिरित्यादिमन्त्रेणाभिमृशेत्। तेनाभितः स्पर्शनेनेमां भूमिं कृत्स्नामपीष्टकां कृत्वोपहितवान्भवति। तेन चातिदाहो न भवति। अथोख्याग्नेर्धारणं विधत्ते—

प्रजापतिरकामयतेति। प्रजोत्पादनसाधनत्वेनोख्याग्निमेकस्मिन्संवत्सरे प्रतिदिनमुपस्थानकाले स्वगले शिक्यपाशं बद्ध्वा धारयेत्। तत उत्पादको भवति।

अथ त्रीणि पक्षान्तराणि त्र्यहषडहद्वादशाहधारणरूपाणि क्रमेण विधत्ते—

तं वसवोऽब्रुवन्निति। तं प्रजापतिं वसव एवमब्रुवन्—हे प्रजापते त्वं प्रजा उत्पादितवानासि, तथा वयमप्युत्पादयाम इति। ततः प्रजापतिस्तमुख्यमग्निं वसुभ्यः प्रायच्छत्। ते च वसवोऽग्निं त्र्यहं धृत्वा त्रयस्त्रिंशदधिकं प्रजानां शतत्रयमसृजन्त। तस्मात्प्रजोत्पत्तये त्र्यहं भार्य इत्येकः पक्षः। एवं रुद्रादित्यवाक्ययोरपि व्याख्येयम्। पक्षत्रयार्थवादाग्नमूहाकारेण निगमयति—

तेन वै त इति। ते वसुरुद्रादित्या उख्या सहस्रतमी यथा भवति तथैकोनं प्रजासहस्रमसृजन्त। वेदनं प्रशंसति—

य एवमुख्यमिति। अत्र चयनविधितद्ब्राह्मणं सावित्राणि जुहोतीत्येतस्मात्प्रागद्रष्टव्यम्। भूमिस्पर्शनमन्त्रब्राह्मणे त्वमग्ने तव धवो वय इत्यनुवाके शंयुं बार्हस्पत्यं मेधो नोपानमदित्यतः प्राग्द्रष्टव्ये। उख्यधारणब्राह्मणं तु न ह स्म वै पुराऽग्निरित्यनुवाके द्रष्टव्यम्। अथ मीमांसा।

---

१ क. ध. ङ. °छोऽयमुख्यापि भ°। २ क. °मे त्वां ममापि कारणभूत आद्य. प्र°।

द्वितीयाध्यायस्य तृतीयपादे दशमाधिकरणे चिन्तितम्—

अग्निं चिनुत इत्यत्र यागो वा संस्कृतिर्यजिः ।
लिङ्गेन यागनामत्वाद्यजिना चानुवादतः ॥
रूढ्या द्रव्यस्य नामैतद्वह्नेराधानवाचितिः ।
संस्कृतिः संस्कृते वह्नावग्निष्टोमो विधीयते ॥

"य एवं विद्वानग्निं चिनुते" इत्येवं विधाय श्रूयते—"अथातोऽग्निमग्निष्टोमेनानुयजति तमुक्थ्येन तं षोडशिना तमतिरात्रेण" इति । अत्राग्निशब्दो यागवाची । स्तोत्रशस्त्रादेः क्रतुलिङ्गस्य श्रूयमाणत्वात् । तच्च लिङ्गमेवं श्रूयते—"अग्नेः स्तोत्रमग्नेः शस्त्रम्" इति । "षडुपसदोऽग्नेश्चित्यस्य भवन्ति" इति च । यदि लिङ्गं प्रापकापेक्षं तर्हि यजिना तदनुवादः प्रापकोऽस्तु । अग्निमग्निष्टोमेनानुयजतीत्यस्मिन्वाक्येऽग्निं यजतीति यजिसामानाधिकरण्यादुपांशुयाजं यजतीतिवद्यागनामत्वम् । अथोच्येत—अनुशब्दस्याग्निशब्देनान्वयाद्यज्यन्वयोऽग्निष्टोमस्येति, तथाऽप्यग्नेः पुरोयजने सत्यग्निष्टोमस्यानुयजनं संभवति । देवदत्तमनुगच्छति यज्ञदत्त इत्यत्र देवदत्ते पुरोगमनदर्शनात् । तस्मादग्निं चिनुत इत्यत्राग्निनामको याग आख्यातेन विधीयते । चिनोतिरिष्टकाभिरग्निं चिनुत इतिवाक्यप्राप्तस्य चयनस्य सोमयागविकृतित्वेन प्राप्तस्य ग्रहसमुदायस्य वाऽनुवाद इति प्राप्ते ब्रूमः—अग्निशब्दो रूढ्या वह्निद्रव्यमाचष्टे । रूढिश्च बलवत्तया लिङ्गादिकल्प्याद्यागवाचित्वाद्बलीयसीति न यागनामत्वम् । न चात्र यागरूपमस्ति । द्रव्यदेवतयोरसिद्धेः । अतोऽग्निमादधीतेत्युक्ताधानवदग्निं चिनुत इत्युक्तं चयनमग्निद्रव्यसंस्कारः । न च संस्कृतस्य विनियोगाभावः । अग्निमग्निष्टोमेन यजत इत्यादिवाक्यैरग्निष्टोमादौ विनियोगात् । तस्मात्संस्कारविधिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

---

१ क. घ. ङ. च. °ष्टोमे वि° ।

(उखाहोमादेरभिधानम्)

(अथ पञ्चमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

यजुषा वा एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यदुखा सा वा एषैतर्हि यातयाम्नी सा न पुनः प्रयुज्येत्याहुरग्ने युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाꣳ इत्युखायां जुहोति तेनैवैनां पुनः प्र युङ्क्ते तेनायातयाम्नी यो वा अग्नि योग आगते युनक्ति युङ्क्ते युञ्जानेष्वग्ने (१) युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाꣳ इत्याहैष वा अग्नेर्योगस्तेनैवैनं युनक्ति युङ्क्ते युञ्जानेषु ब्रह्मवादिनो वदन्ति न्यङ्ङग्निश्चेतव्या३ उत्ताना३ इति वयसां वा एष प्रतिमया चीयते यदग्निर्यन्न्यञ्चं चिनुयात्पृष्टित एनमाहुतय ऋच्छेयुर्यदुत्तानं न पतितुꣳ शक्नुयादसुवर्ग्योऽस्य स्यात्प्राचीनमुत्तानम् (२) पुरुषशीर्षमुप दधाति मुखत एवैनमाहुतय ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्योऽस्य भवति सौर्या जुहोति चक्षुरेवास्मिन्प्रति दधाति द्विर्जुहोति द्वे हि चक्षुषी समान्या जुहोति समानꣳ हि चक्षुः समृद्ध्यै देवासुराः संयत्ता आसन्ते वामं वसु सं न्यदधत तद्देवा वामभृताऽवृञ्जत तद्वामभृतो वामभृत्त्वं यद्वामभृतमुपदधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य वृङ्क्ते हिरण्यमूर्ध्नी भवति ज्योतिर्वै हिरण्यं

(उखाहोमादेरभिधानम्)

ज्योतिर्वा इमं ज्योतिरेवास्य ज्योतिर्वा इमं वृक्के दिव्यजुर्भवति प्रतिष्ठित्यै (१) ॥

(युञ्जानेष्वग्नेः पांशीनमुत्तानं वानभृतं चतुर्विंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः) ।

चयनस्य विधिस्तस्य फलमुक्तमथ धारणम् ।
अनुवाके द्वितीये हि तदेतत्सर्वमीरितम् ॥

अथ तृतीयानुवाक उखाहोमादिकमभिधीयते । तमेतं होमं विधत्ते—

यजुषा वा इति । एषोखा वसवस्त्वा कृण्वन्त्वित्यादिना यजुषा क्रियते । धिषणास्त्वेत्यादिना यजुषा सेयमुखा पच्यते । मातेव पुत्रमित्यादिना यजुषा शिक्यान्मुच्यते । सेयमुखा बहुधा यजुर्भिरनुष्ठिता सेयमुखैतस्मिन्काले गतसारा संपन्ना । बहुधा प्रयुक्तत्वात् । अतः सा गतसारोखा पुनः प्रयोक्तुं न योग्येत्ये-वमभिज्ञा आहुः । अतः पुनः ससारत्वसंपादनायाग्ने युक्ष्वा हीति मन्त्रद्वयेनो-खायां जुहुयात् । तेन होमेनोखां पुनः प्रयोगयोग्यां करोति । होमेनैव ससार-त्वस्य संपादितत्वात् । अग्ने युक्ष्वा हीत्यादिके ऋचौ तु ध्रुवाऽसीत्यनुवाके समाम्नाते व्याख्याते च । मन्त्रगतस्य युक्ष्वेतिशब्दस्य तात्पर्यं दर्शयति—

यो वा अग्निमिति । यो यजमानो योगकाले समागते सत्यप्रमत्तोऽग्निं युनक्ति स यजमानोऽग्नियोगानुष्ठातृषु यजमानेषु मध्ये स्वयमप्यग्नियोगानुष्ठातेति-व्यपदेशार्हो भवति । स च योगो मन्त्रे युक्ष्वपदोच्चारणेन सिध्यति । हेऽग्ने त्वं युक्तो भवेत्येवं तस्य पदस्य वाच्यार्थत्वात् । अतस्तदुच्चारणेनैनमग्निं युनक्ति । युञ्जानेषु यजमानेषु च परिगण्यते । एतच्च होमब्राह्मणम्—"एषां वा एतल्लोकानाम्" इत्यनुवाके "पूर्णा तस्योप दध्यादनुपदस्यदेवान्नमत्ति" इति वाक्यादूर्ध्वं द्रष्टव्यम् । अथ पुरुषशीर्षोपधानं विधत्ते—

---

१ ख. ग. °ह्मणे 'प' ।

(उखाहोमादेरभिधानम्)

ब्रह्मवादिन इति । न्यङ्ङधोमुख उत्तान ऊर्ध्वमुखो योऽयमग्निः स एष पक्षिणामाकारेण चीयते । तथा सत्यधोमुखत्वेन चितस्याग्नेः पृष्ठभागे सर्वा आहुतय एनमग्निं प्राप्नुयुः । ऊर्ध्वमुखत्वे स पक्षाभ्यामाकाशे गन्तुं न शक्नुयात् । गमनाभावे च स्वर्गाय हितो न भवति । अत्र दोषद्वयपरिहाराय पुरुषशीर्षमुपदध्यात् । तच्च शिरः प्राचीनं केशभागं प्राच्यां दिशि छिन्नगलभागं प्रतीच्यां दिशि कृत्वोर्ध्वमुखं स्थापयेत् । एवं सति तत्र हूयमाना आहुतयो मुखप्रदेश एवाग्निं प्राप्नुवन्ति, न तु पृष्ठतः । पक्ष्याकारस्योर्ध्वमुखत्वाभावेनाऽऽकाशे गन्तुं शक्यत्वात्स्वर्गाय हित एव भवति । अस्य चोपधानमन्त्रस्त्वादित्यं गर्भमित्यादिकः । उपधानविधिस्तु मध्ये पुरुषशीर्षमुपदधातीति । स वेषां वा एतल्लोकानामित्यनुवाके समाम्नातः । अत्र तूक्तं विधिमनूद्य प्राचीनोत्तानत्वगुणौ विधीयेते । यदुक्तं सूत्रकारेण—" चित्रं देवानामित्यर्धर्चाभ्यामक्षिकटयोर्हुत्वा " इति, तदिदं विधत्ते—

सौर्या जुहोतीति । सौरी चित्रं देवानामित्यादिका । सा चोदु त्यं जातवेदसमित्यनुवाके समाम्नातत्वात्तत्रैव व्याख्याता । सूर्यस्य चक्षुरभिमानिदेवत्वात्तन्मन्त्रहोमेनास्मिन्पुरुषशीर्षे चक्षुरिन्द्रियं संपादयति । चक्षुरभिमानित्वं चैतरेयिणः समामनन्ति—" आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् " इति ।

अर्धर्चद्वयं विभज्य विनियुङ्क्ते—

द्विर्जुहोतीति । इन्द्रियस्यैकत्वेऽपि गोलकभेदाद्द्वित्वम् ।

ऋग्भेदशङ्कां वारयितुमेकत्वं विधत्ते—

समान्या जुहोतीति । गोलकभेदेऽपीन्द्रियस्यैकत्वादृगेकत्वम् । इदं होमब्राह्मणमपि पुरुषशीर्षविधिसमीपे द्रष्टव्यम् । अथ वामभृदाख्याया इष्टकाया उपधानं विधत्ते—

देवासुराः संयत्ता इति । यदा देवाश्चासुराश्च युद्धायोद्यतास्तदानीं तदुभयेऽपि वननीयं वसु स्वं धनमेकैकत्र गूढत्वेन सम्यक्स्थापितवन्तः । तत्रासुरसंबन्धि यद्धनं तद्देवा वामभृदाख्येष्टकया विनाशितवन्तः । अतो वामं हरन्ति(ति) नाशयन्ती(त्यनये)ति व्युत्पत्त्या हकारस्थाने भकारादेशे सति वामभृदिति नाम संपन्नम् । अतो यजमानोऽप्येतदुपधानेन भ्रातृव्यस्य धनं विनाशयति ।

यदुक्तं सूत्रकारेण—“ यवाहुगिष्टकायां हिरण्यशकलावध्यू(ध्यु)ह्य यास्ते अग्ने सूर्ये रुच इति द्वाभ्यां वामभृतम्” इति । तत्र हिरण्यशकलौ विधत्ते—

हिरण्यमूर्ध्नीति । हिरण्यशकलद्वयं मूर्ध्न्युपरिभागे यस्या इष्टकायाः सा हिरण्यमूर्ध्नी । हिरण्यं प्रकाशरूपत्वाज्ज्योतिः । वाममपि मणिमुक्तादिकं तथा ज्योतिः । यास्ते अग्ने सूर्ये रुच इत्यादिमन्त्रद्वयं तत्र विनियुङ्क्ते—

द्वियजुर्भवतीति । द्वे यजुषी मन्त्रौ यस्या वामभृतः सा द्वियजुः । इदं च वामभृद्ब्राह्मणं स्वयमातृण्णामुपदधातीत्यनुवाके दूर्वेष्टकाब्राह्मणादूर्ध्वं देवलक्ष्मं वै त्र्यालिखितेत्यतः पूर्वं द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-
र्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः) ।

आपो वरुणस्य पत्नय आसन्ता अग्निर-
भ्यध्यायत्ताः समभवत्तस्य रेतः पराऽपतत्त-
दियमभवद्यद्द्वितीयं पराऽपतत्तदसावभवदियं
वै विराडसौ स्वराड्यद्विराजावुपदधातीमे
एवोप धत्ते यद्वा असौ रेतः सिञ्चति तदस्यां
प्रति तिष्ठति तत्प्र जायते ता ओषधयः (१)
वीरुधो भवन्ति ता अग्निरत्ति य एवं वेद प्रैव
जायतेऽन्नादो भवति यो रेतस्वी स्यात्प्रथ-
मायां तस्य चित्यामुभे उप दध्यादिमे एवा-
स्मै समीची रेतः सिञ्चतो यः सिक्तरेताः
स्यात्प्रथमायां तस्य चित्यामन्यामुप दध्या-
दुत्तमायामन्याꣳ रेत एवास्य सिक्तमाभ्यामु-

(रेतःसिगाद्यभिधानम्)

भयतः परि गृह्णाति संवत्सरं न कम् (२) चन प्रत्यवरोहेन्न हीमे कं चन प्रत्यवरोहंत-स्तदेनयोर्व्रतं यो वा अपशीर्षाणमग्निं चिनु-तेऽपशीर्षाऽमुष्मिँल्लोके भवति यः सशीर्षाणं चिनुते सशीर्षाऽमुष्मिँल्लोके भवति चित्तिं जुहोमि मनसा घृतेन यथा देवा इहाऽऽगमं-न्वीतिहोत्रा ऋतावृधः समुद्रस्य वयुनस्य पत्मन्जुहोमि विश्वकर्मणे विश्वाऽहाऽमर्त्यꣳ हविरिति स्वयमातृण्णामुपधाय जुहोति (३) एतद्वा अग्नेः शिरः सशीर्षाणमेवाग्निं चिनुते सशीर्षाऽमुष्मिँल्लोके भवति य एवं वेद सुव-र्गाय वा एष लोकाय चीयते यदग्निस्तस्य यदयथापूर्वं क्रियतेऽसुवर्ग्यमस्य तत्सुवर्ग्योऽ-ग्निश्चितिमुपधायाभि मृशेच्चित्तिमचित्तिं चिन-वद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान्राये च नः स्वपत्याय देव दितिं च रास्वादिति-मुरुष्येति यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्योऽस्य भवति ॥ (४) ।

(ओषधयः कं जुहोति स्वपत्यायाष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः) ।

उखाहुतिः पुंशिरश्च वामभृच्च तृतीयके ।

अथ चतुर्थे रेतःसिगाद्या उच्यन्ते ।

यदुक्तं सूत्रकारेण—“ विराड्ज्योतिरिति तिस्रो रेतःसिचस्तासां द्वे प्रथमायां चित्यां यून उपदध्यात्तृतीयां मध्यमायां विवयस एकां प्रथमायामेकामुत्तमायां स्थविरस्य ” इति, तत्र द्वयोरुपधानं विधत्ते—

आपो वरुणस्येति । वरुणपत्न्यो या अब्देवतास्ताः कामुकोऽग्निरभ्यध्याय-दुध्यात्वा समभवत् । तत्र मानसेन संभवेन स्खलितं रेतोऽधोऽपतत् । तच्च रेत इयं पृथिव्यभवत् । द्वितीयवारं पतितं रेतोऽसौ द्युलोकोऽभवत् । तत्र येयं पृथिवी सा विविधा प्राण्याधारत्वेन राजत इति विराडित्युच्यते । या त्वसौ द्यौः सा स्वातन्त्र्येण राजत इति स्वराट् । एवं सत्यत्र द्वे विराजावुपदध्यात् । विराट्शब्दोपेताभ्यां मन्त्राभ्यामुपधेये विराजौ । मन्त्रद्वयं च विराड्ज्योतिरधारयत् । स्वराड्ज्योतिरधारयदित्याम्नातं व्याख्यातं च । अनेन विराड्द्वयोपधानेनेमे द्वे द्युभूमी एवाप्नमुपधत्ते । तदेतद्विराडुपधानं प्रकारान्तरेण प्रशंसति—

यद्वा असाविति । असौ द्यौर्यदेव रेतो वृष्टिरूपं सिञ्चति तदस्यां भूमौ प्रतिष्ठितं सन्नानाकारेणोत्पद्यते । ताश्चोत्पन्ना ओषधयो व्रीहियवाद्या वीरुधो नागवल्ल्यादयश्च भवन्ति । ताश्च जाठराग्निरत्ति । एवंविधे द्युभूमिरूपे विराजाविति तयोः प्रशंसा । वेदनं प्रशंसति—

य एवं वेदेति । अथाधिकारिभेदेन प्रकारविशेषं विधत्ते—

यो रेतस्वीति । रेतस्वी युवा तस्य प्रथमायामेव चितावुभयोरुपधाने सति ते उभे अपि द्युभूमिरूपे अनुकूले भूत्वा यजमानार्थं रेतः सिञ्चतः । सिक्तरेताः स्थविरस्तस्य प्रथमोत्तमचित्योः क्रमेण द्वयोरुपधाने सति स्वकीयं सिक्तं रेत आभ्यामिष्टकाभ्यामुभयतः परिगृहीतं भवति । एतद्विराड्ब्राह्मणं पूर्वोक्तवामभृद्ब्राह्मणादनन्तरमेव द्रष्टव्यम् । अथाग्निचितः कंचिन्नियमं विधत्ते—

संवत्सरं नेति । अग्निं चित्वा संवत्सरपूर्तिपर्यन्तं वयोवृद्धेषु विद्यावृद्धेषु च समागतेष्वपि कमपि पुरुषं प्रत्यभ्युत्थानं न कुर्यात् । इमे द्युभूमिरूपे विराजाविष्टके कमप्युत्कृष्टं पुरुषं प्रति नाभ्युत्थानं कुरुतः । तदनभ्युत्थानमेनयोरि-

(रेतःसिगाद्यभिधानम्)

ब्रह्मवोर्व्रतं नियतम्। अतस्तयोरुपधाताऽपि नाभ्युत्तिष्ठति। यद्यप्ययं नियमः कृष्णब्राह्मणान्ते वक्तव्यस्तथाऽपि विराड्द्वारेण स्तोतुमिहाऽऽम्नातः।

अथ कंचिद्धोमं विधातुं प्रस्तौति—

यो वा अपशीर्षाणमिति। अग्नेः शिरोराहित्यसाहित्याभ्यां यजमानोऽपि सुवर्गे तथा भवति। विधित्सितस्य होमस्य मन्त्रमुत्पादयति—

चित्तिं जुहोमीति। यथा देवा इहाऽऽगमन्त्येन प्रकारेण हविर्भाजो देवा अस्मिन्कर्मण्यागच्छन्ति, तथाऽहं मनसा मनोगतया भक्त्या घृतेन द्रव्येण चित्तिं जुहोमि देवानां चित्तमुपाददे प्रसादयामीत्यर्थः। कीदृशा देवाः, वीतिहोत्राः कमनीयहविषः, ऋतावृधो यज्ञस्य वर्धयितारः। तत ऊर्ध्वं विश्वकर्मणे प्रजापतये विश्वाऽहा सर्वेष्वप्यहःसु अमर्त्यं विनाशराहितं स्वाहुतं हविर्जुहोमि। होमस्य स्थानमुच्यते—वयुनस्य कमनीयस्य समुद्रस्य समुद्रवदुत्कृष्टस्य स्वयमातृण्णास्वरूपस्य पत्मन्पतन आहुतियोग्य उपरिभाग इत्यर्थः। उत्पादितं मन्त्रं विनियुङ्क्ते—

इति स्वयमिति। चित्तिं जुहोमीति यो मन्त्र उत्पादित इत्यनेन मन्त्रेण स्वयमातृण्णोपधानादनन्तरं जुहुयात्। एतदेवाऽऽहुतिस्वरूपमग्नेः शिरस्थानीयम्। अतः शिरःसहितमेवाग्निं चितवान्भवति। वेदनं प्रशंसति—

सशीर्षाऽमुष्मिन्निति। एतद्धोमब्राह्मणं स्वयमातृण्णामित्यनुवाके द्रष्टव्यम्।

अथाभिमर्शनं विधातुं प्रस्तौति—

सुवर्गाय वा इति। योऽयमग्निरस्ति स एष स्वर्गलोकार्थं चीयते। अतस्तस्याग्नेर्यदङ्गं यथापूर्वं क्रमोल्लङ्घनेन क्रियते तदङ्गमसुवर्ग्यं स्वर्गाय हितं न भवति। अग्निश्च स्वर्गाय हितः। तस्मात्क्रममनुल्लङ्घ्यैव तदङ्गमनुष्ठेयम्।

अथ यदर्थं प्रस्तावः कृतस्तद्विधत्ते—

चितिमुपधायेति। उपधानादूर्ध्वं तामुपहितां चितिं हस्तेन स्पृशेत्।

तत्र मन्त्रमुत्पादयति—

चित्तिमचित्तिमिति। अयमग्निश्चित्तिमचित्तिमस्मदीयां मानसीं भक्तिमभक्तिं च विचिनवद्विविच्य निश्चिनोतु। कीदृशोऽग्निः पृष्ठेव वीता वृजिना च विद्वान्, पृष्ठोपलक्षितसर्वावयवसदृशानि कर्माङ्गानि(णि) वीता कान्तानि वृजिना च स्खलितानि चेत्युभयं जानानः। तथा मर्तान्मनुष्यरूपान्प्रमादबहुलानस्मानपि विद्वान्। हे देव नोऽस्माकं राये धनाय स्वपत्याय च शोभनपुत्रार्थमपि

(हिरण्येष्टकादेरभिधानम्)

दिर्दिं च रास्व यद्देयं तदपि देहि । अदितिमुरुष्य यदपीतः परं न देयं किंतु पूर्वमेव दत्तं तदपि बहुलं कर्तुमिच्छ । अनेन मन्त्रेणानुष्ठितमभिमर्शनं प्रशंसति–

यथापूर्वमिति । अत्र भक्त्यभक्त्योः स्खलनास्खलनयोर्विवेककारिणा वह्निना वैकल्यस्य समाहितत्वात्क्रममनुल्लङ्घ्यैवैनां चितिमुपधत्ते । अग्निं च प्राङ्मुखं चिनुते । स चाग्निरस्य यजमानस्य स्वर्गाय हितो भवति । तदिदं ब्राह्मणं पशुर्वा एष यदग्निरित्यनुवाके प्रथमचितिसमाप्तौ द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

विश्वकर्मा दिशां पतिः स नः पशून्पातु सोऽस्मान्पातु तस्मै नमः प्रजापती रुद्रो वरुणोऽग्निर्दिशां पतिः स नः पशून्पातु सोऽस्मान्पातु तस्मै नम एता वै देवता एतेषां पशूनामधिपतयस्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधात्येताभ्य एव देवताभ्यो नमस्करोति ब्रह्मवादिनः (१) वदन्त्यग्नौ ग्राम्यान्पशून्प्र दधाति शुचाऽऽरण्यानर्पयति किं तत उच्छिंषतीति यद्धिरण्येष्टका उपदधात्यमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान्हिनास्ति प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीयाऽपानस्तृतीयाऽनु प्राण्यात्प्रथमां स्वयमातृण्णामुप-

(हिरण्येष्टकादेरभिधानम्)

धार्य प्राणेनैव प्राणꣳ समर्धयति व्यन्याद् (२) द्वितीयामुपधार्य व्यानेनैव व्यानꣳ समर्धयत्यपान्यात्तृतीयामुपधार्यापानेनैवापानꣳ समर्धयत्यथो प्राणैरेवैनꣳ समिन्धे भूर्भुवः सुवरिति स्वयमातृण्णा उप दधातीमे वै लोकाः स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु (३) लोकेष्वधि प्र जायते प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदाग्निना वै देवाः सुवर्गं लोकमाजिगाꣳसन्तेन पतितुं नाशक्नुवन्त एताश्चतस्रः स्वयमातृण्णा अपश्यन्ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन्यच्चतस्रः स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानः सुवर्गं लोकमेति (४) ॥

(ब्रह्मवादिनो व्यन्यादेषु यजमानस्त्रीणि च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

रेतःसिग्घोमसंस्पर्शाश्चतुर्थे समुदीरिताः ।

अथ पञ्चमे हिरण्येष्टकाद्या उच्यन्ते ।

यदुक्तं सूत्रकारेण—"विश्वकर्मा दिशां पतिरिति पञ्च हिरण्येष्टकाः प्रतिदिशमेकां मध्ये" इति । तत्र मन्त्रानुत्पादयति—

विश्वकर्मा दिशामिति । योऽयं विश्वकर्मा दिशां पालकः सोऽस्मदीया-न्पशूनस्मांश्च रक्षतु । तस्मै विश्वकर्मणे नमः । प्रजापतिरित्यादिभिश्चतुर्भिः पदै-श्चत्वारो मन्त्रा उत्पन्नाः । सर्वत्रानुषङ्गाय दिशां पतिरिति पुनः पाठः ।

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

एता वै देवता इति । पुरुषाश्वगोऽवयवृष्णिवस्तानामेतेषां पशूनां विश्वकर्मा-दयः स्वामिभूता देवताः । एवं सति पशुशीर्षोपधाने ताभ्यो देवताभ्य आवृ-श्च्यते तासां देवतानां द्रोही भवतीत्यर्थः । अतस्तत्परिहाराय हिरण्येष्टका उप-दध्यात् । हिरण्यशकला एव हिरण्येष्टकास्तदुपधानेन ताभ्यो नमस्करोति । तन्मन्त्रेषु तस्मै नम इति दर्शनात् । प्रकारान्तरेण हिरण्येष्टकाः प्रशंसति—

ब्रह्मवादिनो वदन्तीति । लोके हि द्विविधा एव पशवो ग्राम्याश्चाऽऽर-ण्याश्चेति । तत्र ग्राम्यान्पुरुषाश्वादीनयं यजमानश्चीयमानेऽग्नौ स्थापितवान् । प्रयुमारण्यमनु ते दिशामीत्यादिभिर्मन्त्रैरारण्यांश्च शोकेन योजितवान् । तत उभयविधेभ्यः पशुभ्योऽन्यदनुपहितं पशुस्वरूपं किं नामोच्छिष्यते । अतः कष्टोऽयं सर्वकर्मोपद्रवैको यजमानव्यापार इति ब्रह्मवादिनः परस्परमाहुः । तत्रै-तदुत्तरं द्रष्टव्यम्—नायं कष्टो व्यापारो यस्मादयं हिरण्येष्टका उपदधाति हिरण्यं चामृतं तेनामृतेन ग्राम्येभ्यः पशुभ्यो भेषजकरणादेतदीयाहिंसादोषं न प्राप्नोति । एतच्चोपलक्षणमारण्यपशुशोकस्यापि भेषजमेतदिति द्रष्टव्यम् । एतासां कृत्तिका-दिनक्षत्रेष्टकाभ्य ऊर्ध्वभावित्वात्तद्ब्राह्मणानन्तरमेवैतद्ब्राह्मणं द्रष्टव्यम् ।

अथ तिसृणां स्वयमातृण्णानामुपधानानन्तरं प्राणनादिकं विधत्ते—

प्राणो वा इति । प्रथममध्यमोत्तमचितिषु तिस्रः स्वयमातृण्णाः, ताश्च क्रमेण प्राणव्यानापानस्वरूपाः प्राग्वृत्तिमध्यवृत्तिपश्चाद्वृत्तित्वसाम्यात् । अतः प्रथमचितौ स्वयमातृण्णामुपधाय प्राण्यादुच्छ्वासं कुर्यात् । मध्यमचितौ व्यन्यात्प्राणा-पानस्तम्भनं कुर्यात् । उत्तमचितावपान्यान्निःश्वासं कुर्यात् । स एवं सति स्वकीयैः प्राणादिभिरग्नेः प्राणादीन्समर्धयति । अपि च प्राणवायुभिरेवैनमग्निं प्रदीपयति ।

अथ तिसृषु स्वयमातृण्णासु व्याहृतित्रयं क्रमेण विनियुङ्क्ते—

भूर्भुवः सुवरिति । तत्रास्स्वयमातृण्णोपधानब्राह्मणानन्तरमेवैतदपि ब्राह्मणं विभज्य योजयितव्यम् । यदुक्तं सूत्रकारेण—“ प्राणाय त्वा चक्षुषे त्वेति चतस्रः स्वयमातृण्णाः प्रतिदिशम् ” इति । तत्र मन्त्रानुत्पादयति—

---

१ घ. ङ. च. °न्यत्तु यदुदितं । २ ख. ङ. च. °वकार्यजन्यमा° ।

(अह्नां रूपादीनामभिधानम्)

प्राणाय व्यानायेति । प्राणादिपदैश्चतुर्भिश्चत्वारो मन्त्राः । प्राणाय त्वा चक्षुषे त्वा तयेत्यादि सर्वत्रानुषज्यते । हे पूर्वदिग्वर्तिस्वयमातृण्णे प्राणवृत्ति-सिद्धये त्वामुपदधामि । चक्षुषे दृष्टिसिद्ध्यर्थं त्वामुपदधामि । या तव स्वामि-भूता देवता तयाऽनुगृहीता ध्रुवा सतीह सीदोपविश । यथाऽङ्गिरोभिरुपहिता ध्रुवा तद्वत् । एवं व्यानायेत्यादिमन्त्रत्रये योजनीयम् । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते–

अग्निना वै देवा इति । पुरा कदाचिद्देवाश्चीयमानमग्निं साधनं कृत्वा स्वर्गं प्राप्तुमैच्छन् । तेन चाग्निना साधनेन प्राप्तुं नाशक्नुवन् । अतः शक्तिसाधन-त्वेन स्वयमातृण्णा निश्चित्योपधाय तत्रत्येन सर्वदिगवगतेन चक्षुषा स्वर्गं प्रापुः। तदीयमन्त्रेषु हि चक्षुषे त्वेत्यादि सर्वेष्वप्यनुषक्तम् । अत एताश्चतस्रः स्वय-मातृण्णाश्चतसृषु दिक्षूपधाय सर्वदिगवगतचक्षुर्युक्तेनाग्निना स्वर्गं प्राप्नोति । हिरण्येष्टकाब्राह्मणेन सहैतद्ब्राह्मणं द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतै-
त्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

अग्न आ याहि वीतय इत्याहाहूर्तैवैनमग्निं दूतं वृणीमह इत्याह हुत्वैवैनं वृणीतेऽग्निनाऽग्निः समिध्यत इत्याह समिन्ध एवैनमग्निर्वृत्राणि जङ्घनदित्याह समिद्ध एवास्मिन्निन्द्रियं दधात्यग्नेः स्तोमं मनामह इत्याह मनुत एवैनमेतानि वा अह्नाꣳ रूपाणि (१) अन्वहमेवैनं चिनुतेऽवाह्नाꣳ रूपाणि रुन्धे ब्रह्मवादिनो वदन्ति कस्मात्सत्यादयातयाम्नीरन्या इष्टका अयातयाम्नी लोकंपृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां बृहस्पतिश्चायात-

यामानोऽनुचरवती भवत्यजामित्वायानुष्टुभाऽनु चरत्यात्मा वै लोकंपृणा प्राणोऽनुष्टुप्तस्मात्प्राणः सर्वाण्यङ्गान्यनु चरति ता अस्य सूददोहसः (२) इत्याह तस्मात्परुंषिपरुषि रसः सोमं श्रीणन्ति पृश्नय इत्याहान्नं वै पृश्न्यन्नमेवाव रुन्धेऽर्को वा अग्निरर्कोऽन्नमन्नमेवाव रुन्धे जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इत्याहेमानेवास्मै लोकान्ज्योतिष्मतः करोति यो वा इष्टकानां प्रतिष्ठां वेद प्रत्येव तिष्ठति तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्याहैषा वा इष्टकानां प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति (३) ।

(रूपाणि सूददोहसस्तया षोडश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

हिरण्यस्वयमातृण्णाभिधाः पञ्चम ईरिताः ।

अथ षष्ठेऽह्नां रूपादयः कथ्यन्ते ।

यदुक्तं सूत्रकारेण—“अग्न आ याहि वीतयेऽग्निं दूतं वृणीमहेऽग्निनाऽग्निः समिध्यतेऽग्निर्वृत्राणि जङ्घनदग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशम् । देवस्य द्रविणस्यव इति पञ्चाह्नां रूपाणि ” इति । तदिदं विधातुं मन्त्राणां तात्पर्याणि क्रमेण दर्शयति—

अग्न आ याहीति । प्रथममन्त्र आयाहीत्युक्तत्वादाह्वानं प्रतीयते । द्वितीये तु वृणीमह इत्युक्तत्वादाहूय पश्चाद्वरणं प्रतीयते । तृतीये तु समिध्यत इत्युक्तत्वात्समिन्धनं प्रतीयते । चतुर्थे तु वृत्राणि जङ्घनदिति शत्रुवधोक्तेः सामर्थ्यं

(अह्नां रूपादीनामभिधानम्)

प्रतीयते। पञ्चमे तु मनामहे इत्युक्तत्वान्मननं प्रतीयते। तत्र प्रथमद्वितीयौ होतृकाण्डे प्र वो वाजा इत्यनुवाके समाम्नातौ। तौ चास्माभिर्द्वितीयकाण्डस्य पञ्चमप्रपाठके सामिधेनीब्राह्मणे व्याख्यातौ। तृतीयो यस्त्वा हृदेत्यनुवाके समाम्नातत्वात्तत्रैव व्याख्यातः। चतुर्थस्तु चतुर्थकाण्डस्य तृतीयप्रपाठकस्यान्त्यानुवाके व्याख्यातः। पञ्चमः शाखान्तरगतः। एतैर्मन्त्रैरुपधेयानामिष्टकानामह्नां रूपाणीत्येतन्नामधेयम्। तेषामुपधानविधिमर्थवादेनोन्नयति—

एतानि वा इति। पञ्चस्वहःसु तस्यां तस्यां चितावुपधेयत्वादेतन्मन्त्रसाध्यानीष्टकास्वरूपाण्यह्नां रूपाणीत्युच्यन्ते। तान्युपदध्यादिति विधिरुन्नेयः। तदुपधानेन सर्वदा प्रतिदिनमग्निं चितवान्भवति। कालविशेषाणामह्नां स्वरूपं च प्राप्नोति। एतच्च ब्राह्मणवाक्यं तत्तच्चितिप्रस्तावे विभज्य द्रष्टव्यम्।

अथ लोकंपृणाया विधिमर्थवादेनोन्नयति——

ब्रह्मवादिन इति। लोकं पृण छिद्रं पृणेति मन्त्रेणोपधेया लोकंपृणाः। एतद्व्यतिरिक्तानामिष्टकानामेकस्यां चितौ सकृदेवोपधानं तावतैव गतसारत्वात्। लोकंपृणायास्त्वगतसारत्वादसकृदुपधानं क्रियते। तदेतदगतसारत्वं कस्मात्कारणादिति ब्रह्मवादिभिः पृष्टे सति ऐन्द्राग्नत्वाद्बार्हस्पत्यत्वाच्चेति बुद्धिमानुत्तरं ब्रूयात्। इन्द्राग्नी त्वा बृहस्पतिरितिमन्त्रे समाम्नातत्वात्तदीयत्वम्। इन्द्राग्नी बृहस्पतिरित्येते देवाः सामर्थ्यातिशयोपेतत्वात्कदाचिदपि गतसारा न भवन्ति। तादृशीमयातयाम्नीं लोकंपृणाख्यामिष्टकामुपदध्यादिति विधिरुन्नेयः।

अत्र लोकं पृणेतिमन्त्रस्य मन्त्रान्तरोपेतत्वं विधत्ते——

अनुचरवतीति। लोकं पृण छिद्रं पृणेति मन्त्रमनु पश्चादनुचरति पठ्यत इति अनुचरो द्वितीयो मन्त्रः। तेनाप्युपधेयत्वादियमिष्टकाऽनुचरवती। एकेनैव मन्त्रेण पुनः पुनरुपधाने सत्यालस्यं भवेत्। मन्त्रान्तरसद्भावे तु तदालस्यं न भवति।

अनुचरमन्त्रं सामान्यतो विधाय पुनर्विशेषतो विधत्ते——

अनुष्टुभेति। लोकं पृणेतिमन्त्र आत्मा शरीरम्। अनुचररूपो द्वितीयोऽनुष्टुप्छन्दस्कः प्राणरूपः। यस्मादेवं तस्माल्लोकेऽपि प्राणवायुः सर्वान्शरीरावयवाननुसृत्य चरति।

१ क. घ. ङ. स. °त्य संच°।

तस्मिन्ननुचरमन्त्रे प्रथमपादस्य तात्पर्यं दर्शयति—

ता अस्येति । सूदशब्देन दोहनीयः क्षीरादिरस उपलक्ष्यते । सूदं दुहन्तीति सूददोहसस्ता इष्टकाः। यस्मादत्रैवमुक्तं तस्मात्सोमवल्ल्यामपि परुषि-परुषि-तत्तत्पर्वणि रसोऽवतिष्ठते । द्वितीयपादस्य तात्पर्यं दर्शयति—

सोमꣳ श्रीणन्तीति । पृश्नयः श्वेतगोरूपा इष्टका अन्नं च श्वेतवर्णं तस्मादन्नप्राप्तिः । किंचेष्टकाचितोऽग्निरर्चनीयोऽन्नं चार्चनीयम् । तस्मादप्यन्नप्राप्तिः ।

द्वितीयार्धे त्रिष्वा रोचने दिव इत्यस्य तात्पर्यं दर्शयति—

जन्मन्देवानामिति । त्रिशब्देन लोकत्रयमुच्यते । रोचनशब्देन ज्योतिः । यावती वै पृथिवीत्यनुवाके त्रयोदश लोकंपृणा उपदधातीत्यावृत्तैर्विहितत्वात्तद्यावत्त्वशङ्कायां तत्परिहारोऽत्राऽऽम्नातः । अतस्तत्रैवेदं ब्राह्मणं द्रष्टव्यम् । तत्र संख्यामात्रविधिमभिप्रेत्यात्र त्रिष्वुन्नयनमुक्तम् । यदा तु तत्रैव विशिष्टोपधानविधिस्तदानीं नात्र विधिरुन्नेतव्यः ।

अथ सर्वेष्टकाशेषत्वेन तया देवतयेति मन्त्रं विधत्ते—

यो वा इष्टकानामिति । मन्त्रे ध्रुवेत्यभिधानादनेनोपधाने सर्वेष्टकाः प्रतिष्ठिता भवन्ति । अतः सर्वास्वपीष्टकास्विमं मन्त्रं पठेदित्यभिप्रायः । इदं ब्राह्मणं स्वयमातृण्णोपधानब्राह्मणे द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

सुवर्गाय वा एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नावेकादशिनीं मिनुयाद्वज्रेणैनꣳ सुवर्गाल्लोकादन्तर्दध्याद्यन्न मिनुयात्स्वरुभिः पशून्व्यर्धयेदेकयूपं मिनोति नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न स्वरुभिः पशून्व्यर्धयति वि वा एष इन्द्रियेण वीर्येण-

(यूपैकत्वादीनामभिधानम्)

र्ध्यते योऽग्निं चिन्वन्नधिक्रामत्यैन्द्रिया (१)
ऋचाऽऽक्रमणं प्रतीष्टकामुपदध्यान्नेन्द्रियेण वी-
र्येण व्यृध्यते रुद्रो वा एष यदग्निस्तस्य तिस्रः
शरव्याः प्रतीची तिरश्च्यनूची ताभ्यो वा एष
आ वृश्च्यते योऽग्निं चिनुतेऽग्निं चित्वा तिसृ-
धन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नम-
स्करोत्यथो ताभ्य एवाऽऽत्मानं निष्क्रीणीते
यत्ते रुद्र पुरः (२) धनुस्तद्वातो अनु वातु
ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि यत्ते
रुद्र दक्षिणा धनुस्तद्वातो अनु वातु ते तस्मै
ते रुद्र परिवत्सरेण नमस्करोमि यत्ते रुद्र
पश्चाद्धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र-
ऽऽवत्सरेण नमस्करोमि यत्ते रुद्रोत्तराद्धनुस्तत्
(३) वातो अनु वातु ते तस्मै ते रुद्रेदुव-
त्सरेण नमस्करोमि यत्ते रुद्रोपरि धनुस्तद्वातो
अनु वातु ते तस्मै ते रुद्र वत्सरेण नमस्करोमि
रुद्रो वा एष यदग्निः स यथा व्याघ्रः क्रुद्धस्ति-
ष्ठत्येवं वा एष एतर्हि संचितमेतैरुप तिष्ठते
नमस्कारैरेवैनꣳ शमयति येऽग्नयः (४)
पुरीष्याः प्रविष्टाः पृथिवीमनु । तेषां त्वमस्यु-
त्तमः प्र णो जीवातवे सुव । आपं त्वाऽग्ने
मनसाऽऽपं त्वाऽग्ने तपसाऽऽपं त्वाऽग्ने दीक्ष-
याऽऽपं त्वाऽग्न उपसद्भिरापं त्वाऽग्ने सुत्य-

(यूपैकत्वादीनामभिधानम्)

याऽऽपं त्वाऽग्ने दक्षिणाभिराप्नं त्वाऽग्नेऽवभृथे-
नाऽऽपं त्वाऽग्ने वशयाऽऽपं त्वाऽग्ने स्वगाकारे-
णेत्याहैषा वा अग्नेराप्तिस्तयैवैनमाप्नोति (५) ॥

(ऐन्द्रिया पुरं ऊंतराद्धनुस्तदग्रयं आहाष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

अह्नां रूपाणीरितानि षष्ठे लोकंपृणा तथा ।

अथ सप्तमे यूपैकत्वादीन्युच्यन्ते ।

यदुक्तमश्वमेधकाण्डे—" एकयूपो वैकादशिनी वा । अन्येषां यज्ञानां यूपा भवन्ति । एकविंशिन्यश्वमेधस्य " इति । तत्र विकल्पेन प्राप्तां यूपैकादशिनी-मपोद्य यूपैकत्वमेव विधत्ते—

सुवर्गाय वा एष इति । योऽश्वमेधः स एष सुवर्गार्थं चीयते, यूपैका-दशिनी च वज्रसमाना । तत्रेदं विचार्यते—किमग्नौ पश्वर्थं यूपैकादशिनी कर्तव्या न वेति । यदि तामेकादशिनीं प्रक्षिपेत्तदा तद्रूपेण वज्रेणैनमग्निं स्वर्गलोकाद-न्तर्हितं कुर्यात् । बहुयूपव्यवधानात्स्वर्गो न दृश्येत । अथ तामेकादशिनीं न प्रक्षिपेत्तदानीं पशून्स्वरुभिर्वियोजयेत् । स्वरुशब्देन यूपतक्षणकालीनानि शक-लान्युच्यन्ते । यूपाभावे च कथं तानि संभवेयुः । तदभावे च स्वरुणा पशु-मनक्तीत्येतन्न सिध्येत् । अत्रोभयदोषपरिहारार्थमेकं यूपं प्रक्षिपेत् । तदानीं वज्रा-त्मकबहुयूपव्यवधानाभावादिममग्निं स्वर्गादन्तर्हितं न करोति । यूपसद्भावात्तद्वि-योगोऽपि न भविष्यति । अस्य च ब्राह्मणस्य चोदकप्राप्तापवादरूपत्वान्नाऽऽ-म्नाते कस्मिंश्चिदप्यनुवाकेऽन्तर्भावः ।

यदुक्तं सूत्रकारेण—" इन्द्रं विश्वा अवीवृधन्नित्युत्तरेण पुच्छाप्ययमन्तार्वे-द्या(वेद्या) ऋषभं प्रतीष्टकामुपदध्यात् " इति । पुच्छाप्ययः पुच्छपक्षयोः संधिः । तदिदं सूत्रोक्तमुपधानं विधत्ते—

---

१ क. त्वाद्राम्रा° ।

(यूपैकत्वादीनामभिधानम्)

वि वा एष इति । य उपधानकर्ता चयनकालेऽग्निमाधिक्रामति स एष इन्द्रिय(येण) सामर्थ्येन [च] वियुक्तो भवति । अतस्तत्परिहारायाऽऽक्रमणं प्रति पादप्रक्षेपस्थाने कांचिदिष्टकामिन्द्रं विश्वा अवीवृधन्नित्यृचोपदध्यात् । सा चाग्निप्रणयनप्रस्तावे समाम्नातत्वात्तत्रैव व्याख्याता । अत्र पुनर्वाचनिकं विनियोगान्तरम् । एतदुपधानेनेन्द्रियसामर्थ्यवियोगो न भवति । एतच्च ब्राह्मणं शंयुं बार्हस्पत्यमित्यादेरग्न्याक्रमणब्राह्मणात्पूर्वं द्रष्टव्यम् । अथ धनुर्दानं विधत्ते—

रुद्रो वा एष इति । योऽयमग्निः स एव रुद्रः क्रूरो देवः । रुद्रो वै क्रूर इति ह्यन्यत्राऽऽम्नातम् । तस्य च क्रूरस्य शरव्याः शरेण साध्याः प्रतीच्याद्यस्तिस्रः शरव्याः । यद्वा हिंसकत्वादिषुरेव शरव्याः । सा च त्रेधा—प्रतीची संमुखमागच्छन्ती, तिरश्ची पार्श्वयोश्च गच्छन्ती, अनूची पृष्ठत आगच्छन्ती चेति । एवं सति योऽग्निं चिनुते स एष ताभ्य इषुभ्यो निमित्तभूताभ्य आवृश्च्यते सर्वतश्छिद्यते ताभिः प्रहतो भवतीत्यर्थः। अतस्तत्परिहाराय तिसृभिरिषुभिर्युक्तमेकं धनुरयाचितमपि ब्राह्मणाय दद्यात् । तेन दानेन वाचिकाभ्यस्ताभ्य इषुभ्यो नमस्करोत्येव । अपि च ताभ्य इषुभ्यः सकाशादेवाऽऽत्मानं स्वशरीरं निष्क्रीणीते । यदुक्तं सूत्रकारेण—"तिसृधन्वमयाचितं यजमानो ब्राह्मणाय दत्त्वा यत्ते रुद्र पुरो धनुरित्येतैर्यथालिङ्गमुपतिष्ठते " इति । तदेतद्विधातुं मन्त्रानुत्पादयति—

यत्ते रुद्र पुर इति । हे रुद्र पुरः पूर्वस्यां दिशि ते त्वदीयं यद्धनुरस्ति तदनुसृत्य वातो वातु प्रसरतु । किमर्थं, ते त्वदर्थं त्वत्सहायार्थमित्यर्थः । त्वया बाणे मुक्ते सति यदा वायुरनुकूलो भवति तदा बाणः शीघ्रमुद्गच्छति वदिद्(?) साहाय्यम् । हे रुद्र ते त्वदीयाय तस्मै धनुषे संवत्सरेण कालेन नमोऽस्तु । एकस्मिन्संवत्सरे निरन्तरं नमस्करोमीत्यर्थः । एवमुत्तरत्रापि योज्यम् । प्रभवविभवादीनां षष्टिसंवत्सराणां मध्य एकैकस्मिन्पञ्चके स्थिताः संवत्सराः क्रमेण संवत्सरपरिवत्सरेदावत्सरेदुवत्सरवत्सरशब्दैर्विवक्षिताः । प्रथमः संवत्सरो द्वितीयः परिवत्सरस्तृतीय इदावत्सरश्चतुर्थ इदुवत्सरः पञ्चमो वत्सरः । एवं सत्येकैकदिग्वर्तिधनुषे निरन्तरमेकैकस्मिन्संवत्सरे नमस्कारः कृतो भवति । एतन्मन्त्रसाध्यमुपस्थानं विधत्ते—

रुद्रो वा एष इति । लोके क्रुद्धो व्याघ्रो गर्जन्भक्षणोद्यतो यथा भयंकर-

स्तिष्ठति, एवमेवैष सम्यक्चितोऽग्निरयं सम्युपस्थाने सति तन्मन्त्रगतैर्नमस्कारैः श्रान्तो भवति । तदिदमुपस्थानमालम्भं शतरुद्रीयहोमब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—"येऽग्नयः पुरीष्या इति प्रयास्यन्नोपिभिरग्निं यजमान उपतिष्ठते" इति, तदिदं विधातुं मन्त्रान्पठति—

येऽग्नय इति । हेऽग्ने मया चीयमाना ये केचिदन्येऽचीयमानाः पुरीष्या मृदा निष्पाद्याः पृथिवीमनु प्रविष्टाः सन्ति तेषां मध्ये त्वमुत्तमोऽसि । तादृश-स्त्वं नोऽस्माञ्जीवातवे जीवनौषधाय चिरं जीवितुं प्रसुव प्रकर्षेण प्रेरय । हेऽग्ने त्वामापं प्राप्तवानस्मि । सामान्येनोक्ता प्राप्तिः पुनर्विशेष्यते । संकल्पमारभ्य वशानूबन्ध्यास्वगाकारपर्यन्ता ये सोमप्रयोगावयवास्तैः सर्वैस्त्वां प्राप्तोऽस्मि । मनः संकल्पो वचो मन्त्रोच्चारणम् । तपोऽनशनं दानं च । दीक्षा मौनादिनियमः । उपसदो दिनत्रयानुष्ठेया होमाः । सुत्या सोमग्रहहोमः । दक्षि-णा द्वादशशतगवादयः। अवभृथो जले होमः । वशाऽनूबन्ध्यापशुः । स्वगा-कारोऽवशिष्टावयवसंपूर्त्या स्वाधीनत्वकरणम् । अत्राप्यापं त्वाऽग्न इत्यनुषज्यते ।

एतन्मन्त्रसाध्यं प्रयाणकालीनोपस्थानविधिं मन्त्रव्याख्यानरूपेणार्थवादेनो-न्नयति—

इत्याहैषा वा इति । योऽयं मन्त्रः पठितस्तं मन्त्रमुक्तप्रकारेण प्रयाण-काले ब्रूयात् । एषैव मन्त्रपाठानुष्ठितिरग्नेः प्राप्तिका । तस्मात्तयैवाग्निं प्राप्नोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-र्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मि-न्दधाति बृहद्रथंतराभ्यां पक्षावोज एवास्मि-न्दधात्यृतुस्थायज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज

---

१ घ. ङ. च. °नाग्निभि ।

(उपस्थानाद्यभिधानम्)

एवास्मिन्दधाति प्रजापतिरग्निमसृजत सोऽस्मात्सृष्टः पराङैत्तं वारवन्तीयेनावारयत तद्वारवन्तीयस्य वारवन्तीयत्वꣳ श्यैतेन श्येती अकुरुत तच्छ्यैतस्य श्यैतत्वम् (१) यद्वारवन्तीयेनोपतिष्ठते वारयत एवैनꣳ श्यैतेन श्येती कुरुते प्रजापतेर्हृदयेनापिपक्षं प्रत्युप तिष्ठते प्रेमाणमेवास्य गच्छति प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाऽग्निना देवतयाऽग्नेः शीर्ष्णाऽग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छन्दसेन्द्रेण देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधामि प्रतीच्या त्वा दिशा सादयामि (२) जागतेन छन्दसा सवित्रा देवतयाऽग्नेः पुच्छेनाग्नेः पुच्छमुप दधाम्युदीच्या त्वा दिशा सादयाम्यानुष्टुभेन छन्दसा मित्रावरुणाभ्यां देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधाम्यूर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसा बृहस्पतिना देवतयाऽग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि यो वा अपात्मानमग्निं चिनुतेऽपात्माऽमुष्मिँल्लोके भवति यः सात्मानं चिनुते सात्माऽमुष्मिँल्लोके भवत्यात्मेष्टका उप दधात्येष वा अग्नेरात्मा सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य एवं वेद (३) ॥

(उपस्थानाद्यभिधानम्)

(श्यैतत्वं प्रतीच्यां त्वा दिशा सादयामि यः सात्मानं चिनुते द्वाविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

एकयूपादिविषयः सप्तमे समुदीरिताः ।

अथाष्टम उपस्थानादिकमुच्यते ।

यदुक्तं सूत्रकारेण—" पृष्ठैरुपतिष्ठते गायत्रेण पुरस्ताद्बृहद्रथंतराभ्यां पक्षावृतुस्थायज्ञायज्ञियेन पुच्छं दक्षिणस्यां श्रोण्यां वारवन्तीयेनोत्तरस्यां वामदेव्येनापि पक्षे प्रजापतेः सामानुषं गायति " इति तदेतद्विधत्ते—

गायत्रेण पुरस्तादिति । गायत्रादीनि सामविशेषनामानि । तत्सवितुर्वरेण्यमित्यस्यामृच्युत्पन्नं गायत्रं, तेन शिरोभागस्योपस्थाने सत्यस्मिन्नग्नौ प्राणः स्थापितो भवति । त्वामिद्धि हवामह इत्यस्यामृच्युत्पन्नं बृहत्, अभि त्वा शूर नोनुम इत्यस्यामृच्युत्पन्नं रथंतरम् । ताभ्यां पक्षयोरुपस्थाने सति बलं संपादितं भवति । वसन्तमित्यादिकायामृच्युत्पन्नमृतुस्थायज्ञायज्ञियं, तेन पुच्छोपस्थाने सति ऋतुषु प्रतिष्ठितो भवति । यानि पृष्ठस्तोत्रगतानि सामानि तैः सर्वैः कृत्स्नमग्निमुपतिष्ठेत । तेन शरीरकान्तिः प्राप्यते ।

अथ श्रोणिद्वयोपस्थानाय सामद्वयं विधत्ते—

प्रजापतिरग्निमिति । अश्वं न त्वा वारवन्तमित्यस्यामृच्युत्पन्नं वारवन्तीयं, तेन साम्ना पराचीनं गच्छन्तमग्निं विनिवारयामास निवारणसाधनत्वादेव वारवन्तीयं नाम संपन्नम् । अभि प्र वः सुराधसमित्यस्यामृच्युत्पन्नं श्यैतं, तेन साम्ना तं निवारितमग्निं श्येती स्ववशो यथा भवति तथाऽकुरुत । श्येतीकरणसाधनत्वाच्छ्यैतमिति साम्नो नाम । तेन सामद्वयेन श्रोणिद्वयोपस्थाने सत्यन्यत्र गमनं निवार्य स्वाधीनं करोति । सूत्रे तु शाखान्तरानुसारेण श्यैतस्थाने वामदेव्यमुक्तम् । अथ पक्षसंध्युपस्थानाय सामान्तरं विधत्ते—

प्रजापतेरिति । ऋग्रहितेषु स्तोभेषु यदुत्पन्नं साम प्रजापतेर्हृदयमिति नाम तेषु स्तोमेष्वेतस्य शब्दस्य भावात्तेन पक्षसंध्युपस्थाने सत्यग्नेः प्रीतिं प्राप्नोति ।

१ ख. गायन्ति । २ क. ध. ङ. °त्यत्र । ख. °त्यस्य ग° । ३ ख. घ. ङ. स्तोमेषु । ४ ख. घ. ङ. स्तोमेष्वे° । ५ ख. ध. ङ. °स्य° सश° । ६ ख. °स्य सद्भावा° ।

(उपस्थानाद्यभिधानम्)

एतस्योपस्थानस्य विकर्षणानन्तरभावित्वादश्यन्नूर्जमित्यस्मिन्ब्राह्मणानुवाके तदे-तद्व्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—"प्राच्या त्वा दिशा सादयामीति पञ्चाऽऽत्मेष्टकाः प्रतिदिशमेकां मध्ये" इति, तदेतद्विधातुं मन्त्रानुत्पादयति—

प्राच्या त्वा दिशेति । येयं प्राची दिग्यच्च गायत्रं छन्दो याऽप्यग्निरूपा देवता यदपि देवतात्मनोऽग्नेः शिरः, सर्वैः सहितोऽहं हे इष्टके त्वामस्य चीयमा-नस्याग्नेः शिरस्थान उपदधामि । एवमुत्तरेष्वपि योज्यम् । इदानीमात्मेष्टका विधत्ते—

यो वा अपात्मानमिति । आत्मा शरीरं तद्रहितमग्निं चिन्वानः स्वर्गे शरीररहितो भवति । सात्मकमग्निं चिन्वानस्तत्र सात्मक एव भवति । तस्मादा-त्मेष्टका उपदध्यात् । तन्निष्पादकत्वादेता आत्मेष्टका एव शिरःप्रमुख्यवयव-संघ एवाग्नेः शरीरम् । तस्मादेतदुपधानेन सशरीरमग्निं चिनुते ।

वेदनं प्रशंसति—सात्माऽमुष्मिन्निति ।

अथ मीमांसा ।

सप्तमाध्यायस्य तृतीयपादे चतुर्दशाधिकरणे चिन्तितम्—

पृष्ठैरुपस्थितौ स्तोत्रधर्माः सन्ति न वाऽग्रिमः ।
अग्निहोत्रनयान्मैवं मन्त्रोक्तेरात्मनेपदात् ॥

अग्निचयने श्रूयते—"पृष्ठैरुपतिष्ठते" इति । पृष्ठशब्दो ज्योतिष्टोमे माध्यं-दिनसवनगतस्य स्तोत्रकर्मणो नामधेयमिति प्रथमाध्याये निर्णीतम् सोऽग्निचयन-गतोपस्थानकर्मणि प्रयुज्यमानोऽग्निहोत्रशब्दन्यायेन पृष्ठस्तोत्रधर्मानुपस्थानेऽतिदि-शतीति चेन्मैवम् । अत्र पृष्ठशब्दस्य मन्त्रपरत्वेन कर्मपरत्वाभावात् । मासमग्नि-होत्रं जुहोतीत्यत्राग्निहोत्रशब्दो जुहोतिधातुना समानाधिकृतः कर्मपरः। अत्रोपा-श्मन्त्रकरण इत्येतत्पाणिनीयसूत्रमुपशब्दयुक्तात्तिष्ठतिधातोरात्मनेपदं विदधद्विवक्षि-तान्तरस्य पृष्ठशब्दस्य मन्त्रात्मककरणपरतां दर्शयति। यद्यपि स्तोत्रकर्मवाची पृष्ठ-शब्दस्तथाऽपि तत्साधनभूतान्रथंतरादिसामोपेतानाभि त्वा शूरेत्यादिमन्त्रानुपलक्ष-यति । न च लक्षणाश्रयणमेव दोष इति वाच्यं, त्वत्पक्षेऽप्याश्रयणीयत्वात् । किंच त्वत्पक्षे यथा नित्याग्निहोत्रवाचिनाऽग्निहोत्रशब्देन तद्धर्मानुपलक्ष्य तैर्ध-र्मैस्तद्युक्तं मासाग्निहोत्रात्मकं कर्मान्तरं लक्ष्यते । तथा स्तोत्रवाचिना

(आहुत्याद्यभिधानम्)

पृष्ठशब्देन तद्धर्मोपलक्षणद्वारेणोपस्थानरूपं कर्मान्तरं लक्षणीयमिति विभज्यते । तस्मात्पृष्ठशब्दो न स्तोत्रधर्मानतिदिशति । एतच्च ब्राह्मणं नक्षत्रेष्टकाब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः) ।

अग्ने उद्धे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्माग्ने दुध्र गह्य किꣳशिल वन्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उपजीवन्तो भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुध्रः (१) द्वितीयो गह्यस्तृतीयः किꣳशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च प्र दहेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानो वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनूः (२) तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीरप वा एतस्मात्प्राणाः क्रामन्ति योऽग्निं चिन्वन्नधिक्रामति वाङ्म आसन्नसोः प्राण इत्याह

(आहुत्याद्यभिधानम्)

प्राणानेवाऽऽत्मन्धत्ते यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्त्वाहुतिभागा वा अन्ये रुद्रा हविर्भागाः (३) अन्ये शतरुद्रीयꣳ हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद्भागधेयेनैवैनꣳ शमयति तस्य त्वै शतरुद्रीयꣳ हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात्पान्तु पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर्देवैः पश्चात्पान्तु द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु (४) देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति यत्संचितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः (५) ॥

(दुध्रस्तनूर्हविर्भागाः पातु द्वात्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः) ।

आत्मेष्टकामुपस्थानमप्यष्टम उदीरितम् ।

अथ नवम आहुत्यादिकमभिधीयते ।

यदुक्तं सूत्रकारेण—“ अग्न उदधे या त इषुर्युवा नामेति पञ्चाऽऽज्याहुतीर्हुत्वा ” इति, तदिदं विधातुं मन्त्रानुत्पादयति—

अग्न उदध इति । उदधिरिति कस्यचिदग्नेर्नाम । उदधिनामक हेऽग्ने ते त्वदीया येयमिषुर्युवा नाम, परशरीरे सहसा मिश्रणाद्युवेति बाणस्य नामधेयं, तया युवाभिधेयया नोऽस्मान्मृड सुखय । ते त्वदीयायास्तस्या इषोर्नमोऽस्तु । ते त्वदीयायास्तस्या इषोः प्रसादादुपजीवन्तः समीचीनजीवनयुक्ता भूयास्म । एवमुत्तरत्रापि योज्यम् । दुध्रादीनि चत्वार्यग्निविशेषनामानि । तैर्मन्त्रश्चतुर्धा भिद्यते । सर्वेषामप्यग्निशब्द आदावनुषज्यते । या त इषुरित्यादिरन्त्यानुषङ्गः ।

अथैतैर्मन्त्रैराहुतीर्विधत्ते—

पञ्च वा एत इति । या एताः पञ्च चितय उपर्यधोभावेन निष्पादितास्ता एवोदध्यादिनामकाः पञ्चाग्नयः । तेषामाहुत्यभावेऽध्वर्युयजमानयोर्दाहः स्यात् । अतस्तत्परिहारार्थैतैर्मन्त्रैः पञ्चाऽऽज्याहुतीर्जुहुयात् । एतासां च वातनामाहुत्यनन्तरभावित्वादग्निर्देवेभ्य इत्यनुवाकान्ते तदेतद्ब्राह्मणं द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—" वाङ्म आसन्निति सर्वत्राऽऽरोहन्प्रत्यवरोहंश्च जपति सकृद्वाऽन्ततः " इति, तमेतं विधिमुन्नेतुं मन्त्रमुत्पादयति ।

वाङ्म आसन्निति । मे मदीया येयं वाक्सेयमासन्नास्ये मुखे सुस्थिता भवतु । नसोर्नासिकाछिद्रयोः प्राणः सुस्थितो भवतु । तथाऽक्षिगोलकयोश्चक्षुरिन्द्रियं, कर्णगोलकयोः श्रोत्रेन्द्रियम् । बाह्वोर्नानाविधव्यापारसामर्थ्यम् । ऊर्वोर्गमनसामर्थ्यम् । तथा विश्वान्यङ्गान्यरिष्टानि सर्वेऽप्यवयवा हिंसारहिता भवन्तु । तनूरवयवीभूतं शरीरमपि हिंसारहितमस्तु । मे तनुवा मदीयेन शरीरेण सह ते तुभ्यं नमः साष्टाङ्गदण्डप्रणामोऽस्तु । अतो मा मां त्वं मा हिंसीः । अथ जपविधिमुन्नयति—

अप वा एतस्मादिति । यो यजमानोऽध्वर्युर्वाऽग्निचयनकाले चितमग्निमधिरुह्य पादेनाऽऽक्रामति, एतस्मात्प्राणाः सर्वेऽप्यपक्रामन्ति । अतः प्राणानां धारणाय मन्त्रे वागादीनां स्वस्थानावस्थितिरुच्यते । तस्मादिमं मन्त्रं जपेदिति विधिरभ्युन्नेयः । यदा त्वाहेतिपदमेव ब्रूयादितिलिङ्गार्थं ब्रूते तदा प्रत्यक्ष एव विधिः । एतच्चाऽऽक्रमणेष्टकाब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—" यो रुद्रो अग्नाविति रौद्रं गावीधुकं चरुमेतेन यजुषा यस्यामिष्टकायां शतरुद्रीयं जुहोति तस्यां प्रतिष्ठापयति " इति, तदिदं विधातुं मन्त्रमुत्पादयति—

१ ख. °रोहान्प्र° । २ ख. °रोहांश्च । ३ क. °तच्चक्रक ।

(आहुत्याद्यभिधानम्)

यो रुद्रो अग्नाविति। रुद्रदेवतारूपोऽग्निः। स च लौकिकेऽङ्गाररूपेऽ-प्स्वुदकादिषु च प्रविश्य गूढो वर्तते, तस्मै नमोऽस्तु।

एतन्मन्त्रसाध्यं चरुप्रधानं विधत्ते—

आहुतिभागा इति। सहस्राणि सहस्रशो ये रुद्रा इत्युक्तत्वात्सन्त्यनेके रुद्रास्तेषां मध्ये केचिदाहुतिमेव भजन्ते तदर्थः शतरुद्रीयहोमः। अन्ये तु हविर्भजन्ते तदर्थमिमं गवीधुकधान्येन निष्पादितं चरुं निदध्यात्। उपधाने सति हविर्भाजमग्निं स्वभागेन शान्तं करोति। यस्य यजमानस्य चयने तदिदं चरुप्रधानं क्रियते तस्यैव शतरुद्रीयहोमः सफलो भवति। अन्यथा शतरुद्रीयं हुतमप्यफलं स्यादित्यभिज्ञा आहुः। एतच्च रुद्रो वा एष यदग्निरित्यनुवाके द्रष्टव्यम्।

यदुक्तं सूत्रकारेण—"वसवस्त्वा रुद्रैः पुरस्तात्पान्त्विति यथालिङ्गं संचितमग्निमाज्येन प्रोक्षति मध्य उत्तमेन प्राङ्मुखः" इति, तदिदं विधातुं मन्त्रानुत्पादयति—

वसवस्त्वा रुद्रैरिति। य एतेऽष्टौ वसवः सन्ति ते रुद्रैरेकादशभिः सह हेऽग्ने त्वां पूर्वस्यां दिशि रक्षन्तु। यमो राजा येषां पितॄणां ते यमराजानस्तादृशाः पितरोऽन्यैः पितृभिः सार्धं दक्षिणस्यां दिशि पान्तु। ये द्वादशाऽऽदित्यास्ते विश्वेर्देवैः सार्धं पश्चात्पान्तु। यो द्युताननामकोऽधिकप्रकाशवान्कश्चिन्मरुतां स्वामी स सर्वैर्मरुद्गणैः सहोत्तरस्यां दिशि पातु। इन्द्रो ज्येष्ठो वयोगुणाभ्यामधिको येषां देवानां त इन्द्रज्येष्ठाः। वरुणो राजा येषामन्येषां देवानां ते वरुणराजानः। ते चोभयविधा देवा ऊर्ध्वाधोदिशोः पान्तु।

अथ विधत्ते—

न वा एतेनेति। अतोऽस्मादाज्यप्रोक्षणात्प्राचीनं पूर्वमेव यदि सहस्रस्य प्रमा असीत्यादिमन्त्रेण हिरण्यशकलैः प्रोक्षेत्, तदानीमेतेन प्रोक्षणेन नायमग्निः पूतो नापि यज्ञयोग्यो भवति। किं बहुना प्रोक्षित एव न भवति। यदि संचितमग्निमाज्यद्रव्येणोक्तमन्त्रेण प्रोक्षेत्, इदानीं तेनैवाऽऽज्यप्रोक्षणेनाग्निः पूतो भवति, यज्ञयोग्यश्च भवति। सम्यक्प्रोक्षितश्च भवति। एतच्च साहस्रवता प्रोक्षतीति ब्राह्मणात्पूर्वं द्रष्टव्यम्।

१ क. ख. ङ. च. °णादूर्ध्वमपूर्वं।

(सर्पाहुत्याद्यभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः)।

समीची नामा॑सि प्राची॑ दिक्तस्या॑स्तेऽग्निर॑धिपतिरसि॒तो र॑क्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जम्भे॑ दधाम्योजस्वि॒नी ना॑मासि दक्षि॒णा दिक्तस्या॑स्त इन्द्रोऽधि॑पतिः पृदा॒कुः प्राची॒ नामा॑सि प्र॒तीची॒ दिक्तस्या॑स्ते (१) सोमोऽधि॑पतिः स्व॒जोऽव॒स्थावा॒ नामा॒स्युदी॑ची॒ दिक्तस्या॑स्ते॒ वरु॒णोऽधि॑पतिस्ति॒रश्च॑राजिरधि॑पत्नी॒ नामा॑सि बृ॒हती दिक्तस्या॑स्ते॒ बृह॒स्पति॒रधि॑पतिः श्वि॒त्रो व॒शिनी॒ नामा॑सी॒यं दिक्तस्या॑स्ते य॒मोऽधि॑पतिः कल्माषग्रीवो र॑क्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ (२) नो॒ द्वेष्टि॒ तं वां॒ जम्भे॑ दधाम्ये॒ता वै दे॒वता॑ अ॒ग्निं चि॒तꣳ र॑क्षन्ति॒ ताभ्यो॒ यदाहु॑तीर्न जु॑हु॒याद॑ध्व॒र्युं च॒ यज॑मानं च ध्या॒येयु॒र्यदे॒ता आहु॑तीर्जु॒होति॑ भाग॒धेये॑नै॒वैना॑ञ्छमयति॒ नाऽऽर्ति॒मार्छ॑त्यध्व॒र्युर्न यज॑मानो॒ हे॒तयो॒ नाम॑ स्थ॒ तेषां॑ वः पु॒रो गृ॒हा अ॒ग्निर्व॒ इष॑वः सलि॒लो

(सर्पाहुत्याद्यभिधानम्)

निलिम्पा नाम (३) स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहाः स्वप्नो व इषवो गह्वरोऽवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा आपो व इषवः समुद्रोऽधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान्क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहाः (४) अन्नं व इषवो निमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निचिदेवोभयान्प्रीणाति दध्ना मधुमिश्रेणैता आहुतीर्जुहोति भागधेयेनैवैनान्प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इति (५) अनुपरिक्रामं जुहोत्यपरिवर्गमेवैनान्प्रीणातीमꣳ स्तनमूर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये। उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमा विशस्व। यो वा अग्निं प्रयुज्य न विमुञ्चति यथाऽश्वो युक्तोऽविमुच्यमानः क्षुध्यन्पराभवत्येवमस्याग्निः परा भवति तं पराभवन्तं यजमानोऽनु परा भवति सोऽग्निं चित्वा लूक्षः (६) भवतीमꣳ स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णाꣳ स्रुचं जुहोत्येष वा अग्नेर्विमोको विमुच्यैवास्मा अन्नमपि

दधाति तस्मादाहुर्यश्चैवं वेद यश्च न सुधायं॰
ह वै वाजी सुहितो दधातीत्याग्निर्वाव वाजी
तमेव तत्प्रीणाति स एनं प्रीतः प्रीणाति वसी-
यान्भवति (७) ॥

(प्रतीची दिकस्यास्ते द्विष्मो यश्च निलिम्पा नामेह
गृहा इति लुक्षो वसीयान्भवति) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः) ।
आज्याहुतीः(तिः) प्रोक्षणं चेत्यादिकं नवमे श्रुतम् ।
अथ दशमे सर्पाहुत्यादिकमुच्यते ।

यदुक्तं सूत्रकारेण—“ समीची नामासि प्राची दिगिति दध्ना मधुमिश्रेण षट्सर्पाहुतीरनुपरिचारम् ” इति, तदेतद्विधातुं मन्त्रानुत्पादयति—

समीची नामासीति । येयं प्राची दिक्तस्याः समीचीति नामधेयं, सम्यगञ्चतीति प्रातःकालानुष्ठानार्थं प्रवर्तत इति व्युत्पत्तेः । हे प्राची (चि) त्वं समीच्यभिधाऽसि । तस्यास्तादृश्या अग्निर्देवः स्वामी । असितः कृष्णसर्पः । स च तव रक्षिता । ताभ्यामधिपतिरक्षितृभ्यां नमोऽस्तु । तावुभौ नोऽस्मान्मृडयतां सुखयताम् । ते सुखिनो वयं यं पुरुषमस्मान्हिंसितुं प्रवर्तमानं द्विष्मः, यश्च शत्रुरस्मानुदासीनानपि द्वेष्टि तं द्विविधं शत्रुं वां युवयोरधिपतिरक्षित्रोर्जम्भे विदारितास्ये दधामि स्थापयामि । एवमुत्तरत्रापि योज्यम् । ओजस्विनी बलवतीति दक्षिणदिशो नाम । पृदाकुरजगरः सर्पः । रक्षितेत्यादिशेषोऽनुषज्यते । प्रकर्षेणाञ्चतीति सायंसंध्याद्यनुष्ठानाय प्रवर्तत इति पश्चिमदिशः प्राचीति नामधेयम् । स्वस्मिञ्जायत इति स्वजः स्वाधीनबलः सर्पः । मनुष्यानवस्थापयतीति व्युत्पत्त्याऽवस्थावेत्युदग्दिशो नाम । तिरश्चीनाः कटकवलयाकारा राजयो रेखा यस्य सर्पस्यासौ तिरश्चराजिः । अधिपालयतीति व्युत्पत्त्याऽधिपत्नीत्यूर्ध्वदिशो

(सर्पाहुत्याद्यभिधानम्)

नाम। प्रौढत्वाद्बृहती। श्वित्रो यस्य सर्पस्य श्वासधारणेन स्वशरीरं उच्छूनता भवति। दर्शनेन मनुष्यशरीरेऽप्युच्छूनता भवति सोऽयं श्वित्रः। वशः प्राणिनामवस्थातुं स्वाधीनताऽस्यामस्तीति वशिनी। एतच्च भूमिरूपाया अधोदिशो नाम कल्माषाः कृष्णबिन्दवो ग्रीवायां यस्य सर्पस्य सोऽयं कल्माषग्रीवः। रक्षितेत्यादिः सर्पस्य वाचकेभ्यः शब्देभ्य ऊर्ध्वमनुषङ्गद्योतनायान्तिममन्त्रे पुनः पाठः॥

एतन्मन्त्रसाध्या आहुतीर्विधत्ते—

एता वै देवता इति। एता अग्नीन्द्राद्यधिपतिरूपा असितादिसर्परूपाश्च देवता इष्टकाभिश्चितमग्निं रक्षन्ति अतश्चाऽऽसां शान्त्यै जुहुयात्॥

यदुक्तं सूत्रकारेण "हेतयो नाम स्थेति षण्महाहुवर्यथा सर्पाहुतीः" इति तदेतद्विधातुं मन्त्रानुत्पादयति—

हेतयो नाम स्थेति। हेतयः शत्रूणां ग(ह)न्तारो हे गन्धर्वविशेषा यूयं हेतिनामकाः स्थ। तेषां युष्माकं पूर्वस्यां दिशि गृहा वर्तन्ते। अग्निर्युष्माकमिषवोऽग्निसमाना इत्यर्थः। सलिलो वायुविशेषः। चरममन्त्रे पठितं वातनामित्यादिकं सर्वेष्वपि मन्त्रेष्वनुषज्यते। पूर्वस्यां दिशि संचरतो वायोः सलिल इति नामधेयम्। तेभ्यो वो नम इत्यादिकं विस्पष्टम्। नितरां चन्दनेनानुलिप्ता ये गन्धर्वास्तेषां निलिम्पा इति नामधेयम्। पितरः पितृसमानाः। सगर इति तत्र स्थितस्य नामधेयम्। वज्रं येषामस्तीति वज्रिणः। तदेतद्गन्धर्वनाम। स्वप्नः स्वप्नसमानाः। यथा स्वप्ने किंचिदप्यसाध्यं नास्त्येवमेतासामिषूणामित्यर्थः। गह्वर इति वायोर्नाम। अवस्था स्थितिरवस्थानमेषामस्तीत्यवस्थावानः। तदेतद्गन्धर्वनाम। आप उदकसमानाः। जलवत्सर्वदा प्रसरन्तीत्यर्थः। समुद्र इति वायोर्नाम। अधिकं पालयन्तीत्यधिपतयः। वर्षं वृष्टिसमाना निरन्तरं पतन्तीत्यर्थः। अवस्वानिति वायोर्नाम। क्रव्या मांसप्रियाः। तदेतद्गन्धर्वनाम। ते च पार्थिवाः। पृथिव्यां वर्तन्ते। इह भूमौ। अन्नमन्नहेतवः। निमिष इति वायोर्नाम।

एतैर्मन्त्रैः साध्यं होमं विधत्ते—

हुतादो वा इति। पूर्वं नृषदे वडित्यनुवाके दध्ना मधुमिश्रेणावोक्षणमहुतभक्षकदेवप्रीत्यर्थमुक्तम्। इह तु हुतभक्षकदेवप्रीत्यर्थं तेनैव द्रव्येण होम उच्यते। अपि चैकेऽभिज्ञा एवमाहुः—इष्टका एवाहुतादो देवास्तत्र होमेन हुतभक्षकाणां प्रीतावप्येतासामिष्टकानां प्रीत्यर्थं होमकालेऽनुक्रमेण परितः क्रम-

णीयं, तेनैव परिक्रमणेन कमपि देवमवर्जयित्वा सर्वानप्येतावतो देवान्प्रीणाति । तदेवं होमेनानुपरिक्रमणेन च हुतादामहुतादां च सर्वेषां प्रीतिरुपपद्यते । तदिदं सर्पाहुतिमहाहुतिब्राह्मणं वातनामहोमब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—"अनूबन्ध्यावपायां हुतायामौदुम्बरीं स्रुचं घृतस्य पूरयित्वेमꣳ स्तनमूर्जस्वन्तं धयापामित्यग्नेर्विमोकं जुहोति" इति, तदिदं विधातुं मन्त्रमुत्पादयति—

इमꣳ स्तनमिति । हेऽग्ने इमं स्रुच्यवस्थितं द्रव्यविशेषं धय पिब । कीदृशमपां मातृस्थानीयानां स्तनं स्तनस्थानीयं, घृतस्य गोद्वारोदककार्यत्वात्तदीयस्तनत्वोपचारः । ऊर्जस्वन्तं रसवन्तं, प्रप्यातमतिप्रवृद्धं सरिरस्य मध्ये यथा जलस्य मध्य उत्सं प्रवाहशक्तिस्तथा प्रभूतं घृतं, मधुमन्तं माधुर्योपेतं जुषस्व सेवस्व । हे ऊर्व विस्तृताग्ने समुद्रियं समुद्रसंबन्धि सदनं तदीयस्थानमाविशस्व प्रविश ।

एतेन मन्त्रेण साध्यं होमं विधत्ते—

यो वा अग्निमिति । यो यजमानोऽग्निं युनज्मीत्यादिभिर्मन्त्रैरेतैरग्निं कर्माणि प्रयुज्य न विमुञ्चेदस्य यजमानस्याग्निः पराभवति विनश्यति । यथा लोकेऽश्वो रथे युज्यमानश्चिरमविमुच्यमानः क्षुधाक्रान्तः पराभूतः पीडितो भवति तद्वदाग्निपराभवमनु यजमानोऽपि पराभवति । तादृशोऽग्निं चित्वा लूक्षः सर्वदा रूक्षो दाहोपेतो भवत्यतो जुहुयात् । एष च होमोऽग्नेर्विमोकः । ततोऽग्निं विमुच्यास्मा अन्नं समर्पितवान्भवति ।

पुनः प्रकारान्तरेण प्रशंसति—

तस्मादाहुरिति । यस्मादत्राग्निं विमुच्यान्नं प्रदीयते तस्मात्कारणाल्लोके यश्च पुरुष एन(व)मभिवृत्तान्तं जानाति, यश्च न जानाति, तादृशाः सर्वेऽप्येवमाहुः सुहितः सुष्ठु खाद्यादिना तृप्तो वाजी सुधार्यं स्वस्योपरि धारणीयं पुरुषं पुनः पुनर्धारयित्वा गन्तव्यस्थले नीत्वा दधाति स्थापयतीति । अत्र हशब्द आबालगोपालप्रसिद्धिं दर्शयति । एवं लौकिकोक्तौ सत्यामत्राप्यग्निरेव वाज(जि)स्थानीयः। तमेवाग्निं तत्तेन विमोकहोमेन प्रीणाति । स च प्रीतोऽग्निरेनं यजमानं प्रीणयति । स च यजमानोऽतिशयेन धनवान्भवति । एतस्य च ब्राह्मणस्याऽऽम्नातेष्वनुवाकेष्वन्तर्भावासंभवादन्ते निवेशः । एवमन्यस्यापि तादृशस्य द्रष्टव्यम् ।

---

१ ख. च. °मन्त्रा° । २ क. ख. घ. ङ. अनुब° । ३ ख. घ. ङ. च. °चं पू° ।

(अश्वमेधशेषभूतप्रथमपशुसंघविधिः)

अत्र मीमांसा ।

एकादशाध्यायस्य तृतीयपादे नवमाधिकरणे चिन्तितम्—

किमग्निमोकः सर्वान्ते मुख्यान्ते वाऽग्रिमो यतः ।
योगे सर्वार्थता मैवं मुख्यार्थोऽसौ तदन्तिमः ॥

अग्निचयने योगविमोकावग्नेः श्रूयेते । अग्निं युनज्मीति मन्त्रहोमो योगः । इमं स्तनमिति मन्त्रहोमो विमोकः । स च साङ्गप्रधानविषयसर्वप्रयोगान्ते कर्तव्यः । कुतः । योगस्य सर्वार्थत्वेन मध्ये तद्विमोकासंभवादिति प्राप्ते ब्रूमः—पञ्चभिर्युनक्ति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमाप्नोतीत्यमेनं योजने यज्ञप्राप्तिवचनेन योगस्य प्रधानार्थत्वावगमात्प्रधानकर्मणोऽन्ते विमोकं कुर्यात् ॥

तत्रैव वार्तिककारमतेन चिन्तितम्—

व्यत्यस्तौ तावुभौ पक्षावुत्पत्तावविशेषतः ।
सर्वार्थत्वं गुणे भाति सर्वान्ते तद्विमोचनम् ॥

प्रधानान्ते विमोक इति यो भाष्ये सिद्धान्तः स एवात्र पूर्वः पक्षः । अग्निं युनाज्मि शवसा घृतेनेति जुहोत्यग्निमेव तद्युनक्तीत्येतद्योगस्योत्पत्तिवाक्यम् । पञ्चभिर्युनक्तीति गुणविधिः । तत्र न तावदुत्पत्तौ प्रधानगामी योग इत्यस्यार्थस्य गमको विशेषोऽस्ति । गुणविधिशेषेऽपि यज्ञशब्दो न प्रधानमात्रमाचष्टे, किंतु साङ्गम् । तस्माद्योगस्य सर्वार्थत्वाद्विमोकोऽपि सर्वान्ते कर्तव्य इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य

---

१ क. घ. ङ. °ख्यार्थस्य तदन्तिमः । अ° । २ ख. घ. ङ. °न य° । ३ च. मोचने ।

(अश्वमेधशेषभूतद्वितीयपशुसंघविधिः)

राज्ञः कुलुङ्गः सिन्धोः शिꣳशुमारो हिमवतो हस्ती (१) ॥

(इन्द्रायाष्टाविꣳशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

सर्वाहुतिर्महाहोमो मोकश्च दशमे श्रुताः ।

अथाग्निशेषमवस्थाप्याश्वमेधशेषभूता एकादशिनः पशवो विधीयन्ते । एकादशानां पशूनां समूह एकादशिनी । सा चैकैकस्मिन्ननुवाक एकैका विधीयते ।

तत्र प्रथमामेकादशिनीमाह---

इन्द्राय राज्ञ इति । अत्र चतुर्थ्या षष्ठ्या तद्धितेन च देवतासंबन्धः प्रतिपाद्यते । इन्द्राय देवानां राज्ञे सूकरो वराह आलभ्यते । वरुणायापां राज्ञे कृष्णः कृष्णमृगः । यमाय धर्माणां राज्ञ ऋश्यो मृगविशेषः । ऋषभाय गवां राज्ञे गवयो गोसदृशः सास्नारहितः । शार्दूलायाऽऽरण्यानां राज्ञे गौरो गौरमृगः, रक्त इत्येके, शुक्ल इत्यन्ये । पुरुषाणां राज्ञे प्रधानाय मर्कटो वानरः । क्षिप्रश्येनस्य क्षिप्रगतेः शकुनिराजस्य श्येनविशेषस्य वर्तिका चटकासदृशी । नीलङ्गोर्नीलप्रभस्य सर्पविशेषस्य सरीसृपाणां राज्ञे क्रिमिर्गोमयपिण्डकारी । सोमस्यौषधीनां राज्ञः कुलुङ्गश्चित्रकः कटुकस्वरः । सिन्धोः समुद्रस्य शिशुमारो ग्राहः । हिमवतः पर्वतानां राज्ञो हस्ती गजः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके द्वादशोऽनुवाकः) ।

मयुः प्राजापत्य ऊलो हलीक्ष्णो वृषदꣳ-

(अश्वमेधशेषभूततृतीयपशुसंघविधिः)

शस्ते धातुः सरस्वत्यै शारिः श्येता पुरुषवाक्स-

रस्वते शुकः श्येतः पुरुषवागारण्योऽजो नकुल-

शका ते पौष्णा वाचे क्रौञ्चः (१) ॥

(मयुस्त्रयोविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्च-
मप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः) ।

अथात्र दर्शिनीमाह—

मयुः प्राजापत्य इति । मयुः किंपुरुष इत्येके । अरण्यमयूर इत्यपरे । स प्राजापत्यः । ऊलादयस्त्रयो धातुः । ऊलः काकः । उलूक इत्यन्ये । द्विध-कर्ण इत्यपरे । हलीक्ष्णस्तृणहिंसक इत्येके । हरितचटक इत्यन्ये । वृशदंशो मार्जरः । तत्सदृश इत्येके । सरस्वत्यै शारिः शुकस्त्री । कीदृशी, श्येताऽऽरक्त-वर्णा । पुनश्च विशेष्यते—पुरुषवाक्पुरुषवद्वदितुं समर्था । सरस्वते शुकः श्येतः पुरुषवाक् । पूर्ववद्व्याख्येयम् । आरण्याजादयस्त्रयः पौष्णाः । आरण्योऽजः शरभः । नकुलः प्रसिद्धः । शका मक्षिकेत्येके । दीर्घकर्णो मृगविशेष इत्यन्ये। वाचे वाग्देवतायै क्रौञ्चो दारुणस्वनः पक्षिविशेषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदी-
यतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके
द्वादशोऽनुवाकः ॥ १२ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके त्रयोदशोऽनुवाकः) ।

अपां नप्त्रे जषो नाक्रो मकरः कुलीकय-

स्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कुषीतक

आती वाहसो दर्विदा ते वायव्या दिग्भ्यश्च-

क्रवाकः (१) ॥

---

१ क. ख. च. °ताऽर° ।

(अपामेकान्नविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्च-
मप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः) ॥

द्वयोरनुवाकयोरेकादशिनी दशिनी चेति द्वौ संघावुक्तौ । एवमुत्तरत्रापि यथायोगं द्रष्टव्यम् । अथ तृतीयं संघमाह—

अपां नप्त्र इति । अपां नप्त्रेऽपामविनाशयित्रे देवविशेषाय जषो जष-वत्तुण्डो मकरः । नाक्रादयस्त्रयोऽकूपारस्य समुद्रस्य । नाक्रो दीर्घतुण्डो ग्राहः । दीर्घपुच्छो मत्स्यविशेष इत्येके । मकरः पर्यस्तमुण्डः । कुलीकयो बहुपान्मत्स्य-विशेषः । वाचे पैङ्गराजो रक्ताक्षो भरद्वाजः । समुद्रतरङ्गचारी महापक्षीत्यन्ये । चकोर इत्यपरे । भगाय कुषीतकः समुद्रकाकः । आत्यादयस्त्रयो वायव्याः । आती कुरङ्गी । चाष इत्यन्ये । वाहसः पृष्ठे क्षुल्लशङ्खवाही जन्तुः । दर्विदा जलपक्षी । वृकुक्कुट इत्येके । दिग्भ्यो दिग्देवताभ्यः । चक्रवाकः प्रसिद्धः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वे-
दीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके चतुर्दशोऽनुवाकः) ।

बलायाजगर आखुः सृजया शयण्डकस्ते
मैत्रा मृत्यवेऽसितो मन्यवे स्वजः कुम्भीनसः
पुष्करसादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै
वाहसः (१) ॥

(बलायाष्टादश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्च-
मप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अश्वमेधशेषभूतपञ्चमपशुसंघविधिः)

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः) ।

अथ चतुर्थसंघमाह—

बलायाजगर इति । बलाय बलारूपाय देवायाजगरो महोरगः। आखुरा-दयस्त्रयो मैत्राः । आखुः प्रसिद्धः । सृजया नीलमाक्षिका । शुक्लसर्प इत्येके । नीलमहिष इत्यपरे । शयण्डकः कृकलासः । मृत्यवेऽसितः कृष्णः सर्पः । मन्यवे स्वजः सर्पविशेषो बिलादिषु यः स्वयमेव जायते । कुम्भीनसादयस्त्र-यस्त्वाष्ट्राः । कुम्भीनसः स्वापशीलः सर्पविशेषः । पुष्करसादः पुष्करसर्पः । भ्रमर इत्येके । लोहिताहिः श्वेतलोहितसर्पः । प्रतिश्रुत्कायै प्रतिश्रुत्यै वाहसः क(सोऽ)ल्पप्रमाणसर्पः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वे-दीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके पञ्चदशोऽनुवाकः) ।

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वा-घाटस्ते वनस्पतीनामेण्यह्ने कृष्णो रात्रियै पिकः क्ष्विङ्का नीलशीर्ष्णी तेऽर्यम्णे धातुः कत्कटः[1] ॥ १ ॥

(पुरुषमृगोऽष्टादश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्च-मप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः) ।

अथ पञ्चमं संघमाह—

पुरुषमृग इति । पुरुषमृगो नरमुखो मृगविशेषश्चन्द्रमसे । गोधादयस्त्रयो वनस्पतीनाम् । गोधा मुसलिका । महागोधेत्येके । कालका सरटा । दार्वाघाटो द्रुमकुट्टकः । एणी मृगी । अह्ने । कृष्णः कृष्णमृगो रात्रियै । पिकादयस्त्रयोऽ-

---

१ ख. °कुक्कुटः । ए° ।

(अश्वमेधशेषभूतपशुसंघविधिः)

धेम्णे। पिकः कोकिलः। द्विवक्ता रक्तमुखी वानरी। नीलशीर्ष्णी कृष्णशिरस्का। धातुः कल्कटो बिलवासी कर्कटः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः॥ १५॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके षोडशोऽनुवाकः)।

सौरी बलाकर्शो मयूरः श्येनस्ते गन्धर्वाणां वसूनां कपिञ्जलो रुद्राणां तित्तिरी रोहित्कुण्डृणाची गोलत्तिका ता अप्सरसामरण्याय सृमरः (१)।

(सौर्यष्टादश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके षोडशोऽनुवाकः॥ १६॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके षोडशोऽनुवाकः)।

अथ षष्ठं संघमाह—

सौरी बलाकेति। सौरी बलाका प्रसिद्धा। ऋश्यादयस्त्रयो गन्धर्वाणाम्। ते तु प्रसिद्धाः। वसूनां कपिञ्जलोऽधोनिपाती। रुद्राणां तित्तिरिः पुरुषस्वरः। रोहितादयस्तिस्रोऽप्सरसाम्। रोहिदृश्यसी। कुण्डृणाची गृहगोधिका। गोलत्तिका खञ्जरीटका। पीतशुक्लेति केचित्। अरण्यायारण्यनामकाय सृमरश्चमरः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके षोडशोऽनुवाकः॥ १६॥

---

१ ख. °रिः पर्°।

(अश्वमेधशेषभूताष्टमपशुसंघविधिः)

(अथ पञ्चमाष्टके पञ्चमप्रपाठके सप्तदशोऽनुवाकः)।

पृषतो वैश्वदेवः पित्वो न्यङ्कुः कशस्तेऽनुमत्या अन्यवापोऽर्धमासानां मासां कश्यपः क्वयिः कुटरुर्दात्यौहस्ते सिनीवाल्यै बृहस्पतये शित्पुटः (१) ॥

(पृषतोऽष्टादश ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः)।

अथ सप्तमं संघमाह—

पृषतो वैश्वदेव इति । पृषतः श्वेतबिन्दुशबलाङ्गो मृगः । पित्वादयस्त्रयोऽनुमत्यै । पित्वो व्याघ्रः । न्यङ्कुर्हरिणः। ऋक्ष इत्येके । कशान्यवापकश्यपक्वयिकुटरवो मृगविशेषाः । दात्यौहः कालकण्ठ इत्येके । पुष्करिणीवसतिरित्यन्ये । बृहस्पतये शित्पुटो मार्जारसदृशो जातिविशेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः)।

शका भौमी पान्त्रः कशो मान्थीलवस्ते पितृणामृतूनां जहका संवत्सराय लोपा कपोत उलूकः शशस्ते नैर्ऋताः कृकवाकुः सावित्रः (१) ॥

(शकाऽष्टादश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अश्वमेधशेषभूतनवमपशुसंघविधिः)

(अथ पञ्चमकाण्डे पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः) ।

अथाष्टमं संघमाह—

शका भौमीति । शका मक्षिका । भौमी भूमिरेव । पान्त्रादयस्त्रयः पितृणाम् । पान्त्रकशौ पक्षिविशेषौ । मान्थीलवो जलकुक्कुटः । ऋतूनां जहका बिलवासी क्रोष्टा । संवत्सराय लोपा श्मशानशकुनिः । कपोतादयस्त्रयो नैर्ऋताः ते च प्रसिद्धाः । कृकवाकुररण्यकुक्कुटः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठक एकोनविंशोऽनुवाकः) ।

रुरू रौद्रः कृकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्गस्तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभस्त इतरजनानामग्नये धूङ्क्ष्णा (१) ॥

(रुरुर्विंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठक एकोनविंशोऽनुवाकः) ।

अथ नवमं संघमाह—

रुरू रौद्र इति । रुरुर्मृगविशेषः । कृकलासादयस्त्रयः शरव्यायै । शरव्या बाणधारिणी देवता । कृकलासः कामरूपी । शकुनिः काकः । पिप्पका पक्षिविशेषः । हरिणः प्रसिद्धः । शार्गं आरण्यचटकः । तरक्ष्वादयस्त्रय इतरजनानाम् । तरक्षुर्व्याघ्रविशेषो गर्दभाकारः । कृष्णवर्णश्चतुरक्षः श्वा । अक्ष्णोरुपरि बिन्दुद्वयवांश्चतुरक्षः । धूङ्क्ष्णा श्वेतकाकी ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

---

१ ख. घ. ङ. च. °मिर्देवता । पा° ।

(अश्वमेधशेषभूतैकादशपशुसंघविधिः)

(अथ पञ्चमाष्टके पञ्चमप्रपाठके विंशोऽनुवाकः) ।

अलज आन्तरिक्ष उद्रो मद्गुः प्लवस्तेऽपामदित्यै हꣳससाचिरिन्द्राण्यै कीर्शा गृध्रः शितिकक्षी वार्ध्राणसस्ते दिव्या द्यावापृथिव्या श्वावित् (१) ॥

(अलजोऽष्टादश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः) ।

दशमं संघमाह—

अलज आन्तरिक्ष इति । अलजो भासः । आन्तरिक्षः प्रसिद्धः । उद्रादयस्त्रयोऽपाम् । उद्रो जलबिडालः । मद्गुर्जलकाकः । प्लवस्तस्यैवावान्तरजातिविशेषः । हंससाचिः सर्वश्वेतो हंसः । कीर्शा कुलाली शकुनिका । गृध्रादयस्त्रयो दिव्याः । गृध्रः प्रसिद्धः । शितिकक्षी पाण्डरोदरो गृध्रः । वार्ध्राणसः खड्गमृगः । श्वाविच्छल्ली सूचीरोमा ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठक एकविंशोऽनुवाकः) ।

सुपर्णः पार्जन्यो हꣳसो वृको वृषदꣳशस्त ऐन्द्रा अपामुद्रोऽर्यम्णे लोपाशः सिꣳहो नकुलो व्याघ्रस्ते महेन्द्राय कामाय परस्वान् (१) ॥

(सुपर्णोऽष्टादश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अश्वमेधशेषभूतप्रथमग्राम्यपशुसंघविधिः)

(अथ पञ्चमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः) ।

अथैकादशं संघमाह——

सुपर्णः पार्जन्य इति । सुपर्णः प्रसिद्धः । हंसादयस्त्रय ऐन्द्राः । वृकोऽरण्यश्वा । वृषदंशो मार्जारसदृशः । उद्रो जलबिडालः । लोपाशः क्रोष्टा । सिंहादयस्त्रयो महेन्द्राय । ते च प्रसिद्धाः । परस्वान्महिषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके द्वाविंशोऽनुवाकः) ।

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधोरामः सावित्रो वारुणः पेत्वः (१) ॥

(आग्नेयो द्वाविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः) ।

उक्ताः सर्व आरण्याः । अथ ग्राम्यास्त्रयः संघाः । तत्र प्रथमं संघमाह—

आग्नेय कृष्णग्रीव इति । कृष्णो वर्णो ग्रीवायां यस्य च्छागस्यासौ कृष्णग्रीवः । बभ्रुः पिङ्गलवर्णः । शितिपृष्ठः श्वेतपृष्ठः । शिल्पो बहुरूपः । कल्माषः कृष्णबिन्दुलाञ्छितः। संहितः कृष्णः (शुक्ल) कृष्णशबलः। अधोरामः श्वेतकृष्णोदरः । पेत्वो गलितरेतस्को मेषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अश्वमेधशेषभूततृतीयग्राम्यपशुसंघविधिः)

(अथ पञ्चमाष्टके पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः)।

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्हस्पत्यौ धात्रे पृषोदरः सौर्यो बलक्षः पेत्वः (१) ॥

(अश्वः षोडश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः)।

अथ द्वितीयं संघमाह—

अश्वस्तूपर इति। अश्वादयस्त्रयः प्राजापत्याः। तूपरः शृङ्गहीनः। गोमृगो गोमृग्यामुत्पन्नः। सक्थ्नोर्लोमबहुलौ लोमशसक्थौ। पृषोदरः श्वेतबिन्दुमदुदरः। बलक्षः श्वेतः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ पञ्चमाष्टके पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः)।

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः कृष्ण एकशितिपात्पेत्वः (१) ॥

(अग्नयेऽनीकवते द्वाविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

———

(अश्वमेधशेषभूततृतीयमाध्यपशुसंघविधिः)

यदेकेन प्रजापतिः प्रेणाऽनु यजुषाऽऽग्नौ विश्वकर्माऽग्न आ याहि सुवर्गाय वज्रो गायत्रेणाग्न उदधे समीचीन्द्राय मयूरा बलाय पुरुषमृगः शौरी पृषतः शका रुरुरलजः सुपर्णं अग्नियोऽश्वोऽग्नयेऽनीकवते चतुर्विंशतिः ॥ २४ ॥

यदेकेन स पार्पायानेतद्वा अग्नेः शिरो धनुस्तद्देवास्त्वेन्द्रप्येता अपां नप्त्रेऽश्वस्तूपरो द्विषष्टिः ॥ ६२ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः) ।

तृतीयं संघमाह—

अग्नयेऽनीकवत इति । रोहिताञ्जिर्लोहितलिङ्कः । अधोरामौ व्याख्यातौ । रजतनाभी शुक्लनाभी । पिशङ्गो गोरोचनवर्णौ । तूपरौ शृङ्गहीनौ । कल्माष उक्तः । एकशितिपाच्छ्वेतैकपादः । पेत्वो गलितमुष्को मेषः ।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः—

औपानुवाक्ये ये मन्त्रा आम्नातास्तानथ ब्रुवे ।
आग्नेयीस्त्रिष्टुभो होत्रे विद्याद्वायुमतीद्वयम् ॥
पीवोन्नामि(नि)ति विज्ञेयं हिरण्येति चतुर्थकम् ।
प्रजापतिस्त्वा भूस्पर्शे ह्यग्ने युक्ष्वाद्ययाहुतिः ॥
चित्रं देवेति सौरी स्याद्यास्ते या वोपजुह्वयम् ।
चित्तिं जुहोमीति होमः स्पृष्टेष्विति मचिचितः ॥
मन्त्रा हिरण्येष्टकानां विश्वकर्मेति पञ्च हि ।
प्राजापत्यादिपदतो मन्त्रभेदोऽवगम्यताम् ॥
इष्टकाः स्वयमातृण्णा निदध्याद्व्याहृतित्रयात् ।
पुनर्दिक्षु चतस्रस्ताः प्राणायेति चतुष्टयात् ॥
पदभेदान्मन्त्रभेदास्त्वा चक्षिरत्यनुपद्यते ।
अह्नां रूपाणीष्टकाः स्युरग्न आ याहिपञ्चकात् ॥

(अश्वमेधशेषभूतसृतीयग्राम्यपशुसंघविधिः)

लोकं पृणेतिमन्त्रस्य नान्तरोऽनुचरो भवेत् ।
इन्द्रं विश्वा ऋगैन्द्री स्याद्यत्ते पञ्चोपतिष्ठते ॥
इडोऽग्नयो बहुभिर्मन्त्रैः प्रयास्यन्नुपतिष्ठते ।
सामनामानि गायत्रं बृहत्तद्रथंतरम् ॥
ऋतुस्थायज्ञायज्ञियं वारवन्तीयकं तथा ।
श्यैतं प्रजापतेर्हृच्च पृष्ठं स्तोत्रार्थसाम हि ॥
पक्ष्याकारं चितं वह्निं तैरुक्तैरुपतिष्ठते ।
आत्मेष्टका उपदध्यात्प्राच्या त्वेत्यादिपञ्चभिः ॥
अग्नेर्होमः पञ्चभिः स्याद्दृभ्राद्यैर्मन्त्रभेदनम् ।
चित्यारोहे जपेद्राज्ञे यो रुद्रो निक्षिपेच्चरुम् ॥
वसवस्त्वापञ्चमन्त्रैः प्रोक्षेदाज्येन संचितम् ।
समीची सर्पहोमः स्याद्दक्षितेत्यनुषज्यते ॥
हेतयस्तु महाहोमो बातनामानुषज्यते ।
इमं स्तनं पूर्णहोम इति मन्त्रा इहेरिताः ॥
इन्द्राय राज्ञ इत्युक्ता एकादशिनीनामकाः ।
दशिन्यास्त्वथ पशवस्ते सर्वेऽप्यश्वमेधकाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे पञ्चमः प्रपाठकः॥५॥

---

१ क. °पृष्ठस्तो° ।

(कुम्भेष्टकामन्त्रणार्थमन्त्राभिधानम्)

(अथ पञ्चमाष्टके षष्ठः प्रपाठकः)

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ ।

हिर॑ण्यवर्णाः॒ शुच॑यः पाव॒काः यासु॑ जा॒तः क॒श्यपो॒ यास्विन्द्रः॑ । अ॒ग्निं या गर्भं॑ दधि॒रे विरू॑पास्ता॒ न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु । यासा॒ꣳ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑वप॒श्यञ्जना॑नाम् । म॒धु॒श्चुत॒ः शुच॑यो॒ याः पा॑व॒कास्ता॒ न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु । यासां॑ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे बहु॒धा भव॑न्ति । याः पृ॑थि॒वीं पय॑सो॒न्दन्ति॑ (१) शु॒क्रास्ता॒ न॒ आप॒ः शꣳ स्यो॒ना भ॑वन्तु । शि॒वेन॑ मा॒ चक्षु॑षा पश्यताऽऽपः शि॒वया॑ त॒नु॒वोप॑ स्पृशत॒ त्वचं॑ मे । सर्वा॑ꣳ अ॒ग्नीꣳर॑प्सु॒षदो॑ हु॒वे वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ नि ध॑त्त । यद॒दः स॑म्प्रय॒तीरहा॒वन॑दता ह॒ते । तस्मा॒दा न॒द्यो॑ नाम॑ स्थ॒ ता वो॒ नामा॑नि सिन्धवः । यत्प्रेषि॑ता॒ वरु॑णेन॒ ताः शीभ॑ꣳ स॒मव॑ल्गत (२) । तदा॑प्नो॒दिन्द्रो॑ वो य॒तीस्तस्मा॒दापो॒ अनु॑ स्थन । अ॒प॒का॒मꣳ स्यन्द॑माना॒ अवी॑वरत वो॒ हिक॑म् । इन्द्रो॑ व॒ः शक्ति॑भिर्देवी॒स्तस्मा॒द्वार्णाम॑ वो हि॒तम् । एको॑ दे॒वो अप्य॑तिष्ठ॒त्स्यन्द॑माना यथाव॒शम् । उदा॑निषुर्म॒हीरिति॒ तस्मा॑दुद॒कमु॑-

(कुम्भेष्टकामन्त्रणार्थमन्त्राभिधानम्)

च्यते । आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः । तीव्रो रसो मधुपृचाम् । (३) अरंगम आ मा प्राणेन सह वर्चसा गन् । आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्मे आसाम् । मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः । आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या सं भव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा (४)

(उन्दन्ति समवल्गत मधुपृचां मातरो द्वाविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ पञ्चमकाण्डे षष्ठः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः)

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
उक्ता वायव्यपशाद्याः पञ्चमे हि प्रपाठके ।
कुम्भेष्टकामन्त्रणादि षष्ठे मन्त्रैरुदीर्यते ॥

यदुक्तं सूत्रकारेण " हिरण्यवर्णा इत्युपहिता अभिमन्त्रयते " इति, तत्र कुम्भेष्टकाभिमन्त्रणार्थानां त्रयोदशानामृचां मध्ये प्रथमामाह—

(कुम्भेष्टकामन्त्रणार्थमन्त्राभिधानम्)

हिरण्यवर्णा इति । आपस्तावन्निर्मलत्वेन भास्वरत्वाद्धिरण्यसदृशवर्णो-पेताः । तथा शुचयः स्वयं शुद्धाः पावकाः स्नानादिना शरीरादिशुद्धिहेतवश्च । यास्वप्सु कश्यपाख्यः प्रजापतिरुत्पन्नः । यास्वप्स्विन्द्रोऽप्युत्पन्नः । अग्निं च या आपो गर्भत्वेन दधिरे । तदेतत्त्रयं शाखान्तरगतेभ्योऽर्थवादेभ्यो द्रष्टव्यम् । अन्न-प्यग्ने गर्भो अपामसीति चतुर्थकाण्डे मन्त्रान्तरं समाम्नातम् । ईदृश्यो या आप-स्ताः स्योनाः सुखकारिण्यो नोऽस्मानञ्शं भवन्तु सुखं प्रापयन्तु ।

अथ द्वितीयामाह—

यासाꣳ राजेति । वरुणाख्यो राजाऽपामधिपतिर्यासामपां मध्ये याति गूढः संचरति । किं कुर्वन्, जनानां सत्यानृते अवपश्यन्स्नानपानादौ[1] यो यथाशास्त्रमाचरति तत्सर्वमवपश्यन् याश्चाऽऽपो मधुररसं श्चोतन्ति क्षारयन्तीति मधुश्चुतः । शुचय इत्यादि पूर्ववत् । अथ तृतीयामाह—

यासां देवा इति । दिवि द्युलोके देवा यासामपां संबन्धि सारं भक्षं कृ-ण्वन्ति स्वभोज्यं कुर्वन्ति । पीयूषं हि देवैः सेव्यते, तच्चापां सारभूतम् । याश्चाऽऽ-पोऽन्तरिक्षे वृष्टिधारारूपेण बहुप्रकारा भवन्ति । याश्चाऽऽपः पृथिवीं सर्वां पयसा स्वकीयेन द्रवेणोन्दन्ति क्लेदयन्ति । शुक्रा निर्मलाः । ता न आप इत्यादि पूर्ववत् । अथ चतुर्थीमाह—

शिवेन मेति । हे आपो यूयं शिवेन चक्षुषा शान्तया दृष्ट्या मा पश्यत मामवलोकयत । तथा शिवया तनुवा शान्तेन युष्मदीयशरीरेण मे त्वचमुपस्पृ-शत । अहमप्यप्सुषदो जलेषु स्थितान्सर्वानप्यग्नीन्हुवे जुहोमि होमेन तर्पयामि । वो युष्मदीयं यद्वर्चः कान्तिर्यच्च बलं यदप्योजो बलहेतुरष्टमो धातुस्तत्सर्वं मयि निधत्त स्थापयत ।

अथ पञ्चमीमाह—

यदृदः संप्रयतीरिति । यद्यस्मात्कारणाददो द्युलोकस्थानात्संप्रयतीः सम्य-क्प्रकर्षेण गच्छन्त्यो हे आपो यूयम् । अहिशब्दो मेघनामधेयम् । यस्मिन्हते युष्माभिस्ताडिते सत्यनदत नादं कृतवत्यः । प्रवाहगतपाषाणेष्विव मेघेषु जला-घातेन शब्दो जायते । यस्मान्नादं कृतवत्यस्तस्माद्रा समन्तात्सर्वेष्वपि स्थानेषु नद्यो नाम स्थ नदीति नामधेयं प्राप्ताः । हे सिन्धवः स्यन्दनशीला आपो वो युष्माकं ता नामानि तादृशानि निर्वचनसाध्यानि नामानि विद्यन्ते ।

---

१ ख. °दौ यद्यथा° ।

(कुम्भेष्टकामन्त्रणार्थमन्त्राभिधानम्)

अथ षष्ठीमाह—

यत्प्रेषिता इति। हे आपो यद्यस्मात्कारणाद्वरुणेन प्रेषितास्ता यूयं शीभं समवल्गत शुभं यथा भवति तथा सम्यग्वल्गनवन्नृत्तं हर्षेण कृतवत्यस्तत्तदानीं यतीः प्रसरन्तीर्वो युष्मानिन्द्र उत्सुकः सन्द्रष्टुमाप्नोत्तस्मात्कारणादाप्यन्त इति युष्मस्याऽऽप इति नामधेयं प्राप्यानुस्थन सर्वेषामनुकूलाः स्थ।

अथ सप्तमीमाह—

अपकाममिति। देवीर्हे आपो देव्योऽपकामं स्यन्दमानाः प्रयोजनविशेषमनपेक्ष्य स्वभावत एव प्रवहन्तीर्वो युष्मानिन्द्रः परितोषादवीवरत वृतवान्। स्यन्दनेऽपि युष्माकं न साधनान्तरापेक्षा किं तु वः शक्तिभिर्युष्मदीयशक्तिवशादेव स्यन्दनं, हिकमित्यव्ययं प्रसिद्धिवाचकम्। उदकस्य स्वशक्त्यैव स्यन्दनं सर्वलोकप्रसिद्धमित्यर्थः। यस्मादिन्द्रेण वृतास्तस्माद्वो युष्माकं वारित्येतन्नाम हितं संपन्नम्। अथाष्टमीमाह—

एको देवो अपीति। यथावशं स्वेच्छयैव स्यन्दमाना अप एको देव इन्द्रोऽप्यतिष्ठदध्यतिष्ठत्स्वाधीनाः कृतवान्। इन्द्रेणाधिष्ठितास्ता आपो महीर्महत्यः प्रभूताः सत्य उदानिषुरुत्कर्षेण चेष्टितवत्यः। तस्मादुदानादुदकमिति नामोच्यते।

अथ नवमीमाह—

आपो भद्रा इति। एता आपो भद्राः कल्याणरूपा आप इदाप एव घृतमासुर्गोशरीरद्वारा घृतरूपेण परिणताः। ता आप इत्यादेश्य आप एवाग्नीषोमौ देवौ बिभ्रति धारयन्ति। अग्निं या गर्भमित्यग्निधारणं पूर्वमेवोक्तम्। सोमधारणमप्यमृतकारणद्वारा द्रष्टव्यम्। मधुपृचां माधुर्ययुक्तानामपां रसः सारांशस्तीव्रोऽस्यन्तस्वादुररंगमोऽलं संपूर्णं यथा भवति तथा गच्छति प्राप्नोति सर्वजनपुष्टिकारीत्यर्थः। तादृशो रसः प्राणेन श्वासवायुना वर्चसा बलेन सह मां प्रत्यागत्यागच्छतु यावदपां रसोऽन्नादिरूपेण शरीरे तिष्ठति तावत्प्राणो नातिगच्छति। बलं च न विनश्यति। अथ दशमीमाह—

आदित्पश्यामीति। आदिदनन्तरमेव पश्यामि अपां रसे मच्छरीरमागते सति तदानीमेव चक्षुषा द्रष्टुं शक्तोऽस्मि। उत वा शृणोमि अपि च श्रोतुमपि शक्तोऽस्मि। आसामपां घोषो नाद आगच्छति मच्छरीरे वर्तते। स एव घोषो नोऽस्माकं वाक्। हे हिरण्यवर्णास्तेजस्विन्य आपो यदा वो युष्माकं सेवयाऽ-

तृप्तमहं तृप्तोऽभवं तर्हि तस्मिन्कालेऽमृतस्य भेजानो मन्ये पीयूषं सेवितवानस्मीति तर्कये। अथैकादशीमाह—

आपो हि ष्ठेति। हिशब्द एवकारार्थः प्रसिद्ध्यर्थो वा। आपो यूयमेव मयोभुवः स्थ सुखयितृयो भवत। स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम्। तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवद्यिरसानुभवार्थं दधातन स्थापयत। किंच महे महते रणाय रमणीयाय चक्षसे दर्शनाय दधातनास्मान्परतत्त्वसाक्षात्कारयोग्यान्कुरुतेत्यर्थः। अथ द्वादशीमाह—

यो वः शिवतम इति। वो युष्माकं शिवतमः शान्ततमः सुखैकहेतुर्यो रसोऽस्ति। इहास्मिन्कर्मणि नोऽस्मान्। तस्य भाजयत तं रसं प्रापयत। तत्र दृष्टान्तः—उशतीरिव मातरः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयस्तन्यरसं शिशुं पाययन्ति तद्वत्। अथ त्रयोदशीमाह—

तस्मा अरमिति। यस्य रसस्य क्षयाय क्षयेण निवासेन जिन्वथ यूयं प्रीता भवथ तस्मै रसाय वो युष्मानरं गमामालं भृशं प्राप्नुमः। किंच हे आपो यूयं नोऽस्माञ्जनयथ प्रजोत्पादकान्कुरुत।

कल्पः—"दिवि श्रयस्वेति बार्हस्पत्यं नैवारं पयसि चरुं मध्ये कुम्भेष्टकानामुपदधाति" इति पाठस्तु—

दिवि श्रयस्वेति। हे नैवारचरो दिवि श्रयस्व द्युलोक आश्रितो भव। अन्तरिक्षेऽपि यतस्व प्रयत्नवान्भव। पृथिव्या संभव संयुक्तो भव। ब्रह्मवर्चसमसि तत्साधनत्वात्तद्रूपमसि। अतो ब्रह्मवर्चसाय त्वामत्रोपदधामि।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः)।

अपां ग्रहान्गृह्णात्येतद्वाव राजसूयं यदेते ग्रहाः सवोऽग्निर्वरुणसवो राजसूयमग्निसवश्चित्यस्ताभ्यामेव सूयतेऽथो उभावेव लोकावभि

(कुम्भेष्टकोपधानविधिः)

जयति यश्च राजसूयेनेजानस्य यश्चाग्निचित आपो भवन्त्यापो वा अग्नेर्भ्रातृव्या यदपोऽ-ग्नेरधस्तादुपदधाति भ्रातृव्याभिभूत्यै भवत्या-त्मना पराऽस्य भ्रातृव्यो भवत्यमृतम् (१) वा आपस्तस्मादद्भिरवतान्तमभि षिञ्चन्ति नाऽऽर्तिमार्छति सर्वमायुरेति यस्यैता उपधी-यन्ते य उ चैना एवं वेदान्नं वा आपः पशव आपोऽन्नं पशवोऽन्नादः पशुमान्भवति यस्यैता उपधीयन्ते य उ चैना एवं वेद द्वादश भव-न्ति द्वादश मासाः संवत्सरः संवत्सरेणै-वास्मै (२) अन्नमव रुन्धे पात्राणि भवन्ति पात्रे वा अन्नमद्यते सयोन्येवान्नमव रुन्ध आ द्वादशात्पुरुषादन्नमत्त्यथो पात्रान्न छिद्यते यस्यैता उपधीयन्ते य उ चैना एवं वेद कुम्भाश्च कुम्भीश्च मिथुनानि भवन्ति मिथु-नस्य प्रजात्यै प्र प्रजया पशुभिर्मिथुनैर्जायते यस्यैता उपधीयन्ते य उ (३) चैना एवं वेद शुग्वा अग्निः सोऽध्वर्युं यजमानं प्रजाः शुचाऽर्पयति यदप उपदधाति शुचमेवास्य शमयति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानः शाम्यन्ति प्रजा यत्रैता उपधीयन्तेऽपां वा एतानि हृदयानि यदेता आपो यदेता अप उपदधाति दिव्याभिरेवैनाः सꣳ सृजति वर्षुकः

पर्जन्यः (४) भवति यो वा एतासामाय-
तनं क्लृप्तिं वेदाऽऽयतनवान्भवति कल्पतेऽ-
स्मा अनुसीतमुप दधात्येतद्वा आसामायतन-
मेषा क्लृप्तिर्य एवं वेदाऽऽयतनवान्भवति कल्प-
तेऽस्मै द्वंद्वमन्या उप दधाति चतस्रो मध्ये
धृत्या अन्नं वा इष्टका एतत्खलु वै साक्षादन्नं
यदेष चरुर्यदेतं चरुमुपदधाति साक्षात् (५)
एवास्मा अन्नमव रुन्धे मध्यत उप दधाति
मध्यत एवास्मा अन्नं दधाति तस्मान्मध्यतोऽ-
न्नमद्यते बार्हस्पत्यो भवति ब्रह्म वै देवानां
बृहस्पतिर्ब्रह्मणैवास्मा अन्नमव रुन्धे ब्रह्मवर्च-
समसि ब्रह्मवर्चसाय त्वेत्याह तेजस्वी ब्रह्म-
वर्चसी भवति यस्यैष उपधीयते य उ चैन-
मेवं वेद (६) ॥

अमृतमस्मै जायते यस्यैता उपधीयन्ते य उ पर्जन्य उपदधाति
साक्षात्सप्तचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः)।
कुम्भेष्टकामन्त्रणार्था मन्त्राः प्रथम ईरिताः ॥

अथ द्वितीये तदिष्टकोपधानं विधत्ते। यदुक्तं सूत्रकारेण—" कुम्भं कुम्भीं चाद्भिः पूरयित्वा शर्म च स्थ वर्म च स्थ देवस्य वः सवितुः प्रसवे मधुमतीः सादयामीति पुरस्तादनुसीतमुपधाय ज्योतिषे वामिति हिरण्यशल्कौ प्रत्येकस्मिन्नेव-मुत्तरा उत्तरैर्मन्त्रैः प्रतिदिशमनुसीतं चतस्रो मध्ये" इति, तदिदमुपधानं विधत्ते—

१ क. °त्यस्यत्ये° २ ख. ङ. °चरे° ।

(कुम्भेष्टकोपधानविधिः)

अपां ग्रहानिति । गृह्यन्त आप एष्विति ग्रहा जलाधाराः कुम्भाः कुम्भ्यश्च । ते चाद्भिः पूरितत्वादपां ग्रहास्तान्कुम्भकुम्भीरूपान्गृह्णाति । ग्रहणेनोपधानमुपलक्ष्यते । यस्यैता उपधीयन्त इत्युपसंहारात् । राजसूये ग्रहसद्भावासत्साम्यमापादयितुमिह ग्रहिधातुना व्यवहारः । य एते कुम्भकुम्भीरूपा अपां ग्रहा एतदेव राजसूयस्वरूपं फलेन तत्सदृशत्वात् । योऽयं चीयमानोऽग्निः सोऽयं सवः सूयतेऽभिषिच्यते यजमानोऽस्मिन्नित्यभिषेकयुक्तो यज्ञः सवस्तत्सदृशोऽयमग्निः । यदेतद्राजसूयाख्यं कर्म सोऽयं वरुणसवः । वरुणो हि कदाचिद्राजसूयं कृत्वा तत्राभिषिक्तः । यस्तु चित्यः सोऽयमग्निसवः । अस्मिन्नप्यग्नावभिषेको विद्यते । अतः कुम्भीष्टकोपधाने सति ताभ्यां वरुणसवाग्निसवाभ्यामुभाभ्यां सूयतेऽयं यजमानोऽनुष्ठितवान्भवति । अपि च राजसूयेनेष्टवतो यो लोकोऽग्निचितश्च यो लोकस्तावुभौ लोकावेतदिष्टकोपधानेनाभिजयत्येव ।

कुम्भेषु कुम्भीषु च जलस्थापनं विधत्ते—

आपो भवन्तीति । जलेनाग्निशान्तेरपामग्निशत्रुत्वम् । अतश्चीयमानस्याग्नेरधस्ताद्भूमौ कुम्भकुम्भीगतानामपामुपधाने सति भ्रातृव्याभिभूतिर्भवति । उपधाता स्वयमैश्वर्यवान्भवति । भ्रातृव्यः पराभवति । किं चैता आपोऽमृतमेवात्र तस्योदकजन्यत्वात् । यस्मादमृतं तस्मादवतान्तमत्यन्तग्लानिमापन्नं मूर्छितं मूर्छानिवारणाय शीतलाभिरद्भिरभिषिञ्चन्ति ।

एतदुपधानं तद्वेदनं च प्रशंसति—

नाऽऽर्तिमार्छतीति । प्रकारान्तरेणापः प्रशंसति—

अन्नं वा आप इति । अन्नस्योदकजन्यत्वात्पशूनां चोदकपोष्यत्वादन्नरूपत्वं च । क्षीराद्यन्नहेतुत्वात्पशूनामप्यन्नत्वम् । अतोऽपामुपधाता वेदिता चान्नवान्पशुमांश्च भवति । जलपात्राणां संख्यां विधत्ते—

द्वादश भवन्तीति । उपधेयानामपामाधारान्विधत्ते—

पात्राणि भवन्तीति । पात्राणि कुम्भकुम्भीरूपाणि । पात्रे कांस्यादिमये जनैरन्नं भक्ष्यते पच्यते च । अतः पात्रस्यान्नयोनित्वात्तत्सहितमेवान्नमाप्नोति । किंचोपधाता वेदिता च पात्रसंख्यया स्वात्मपुत्रपौत्रादिद्वादशपुरुषपर्यन्तादन्नसमृद्धो भवति । अपि च पात्राद्गृहोपकरणसंघातात्कदाचिदपि न विच्छिद्यते ।

पात्राणां परिमाणविशेषं विधत्ते—

कुम्भाश्च कुम्भीश्चेति। कुम्भाः पुरुषसदृशाः प्रौढा घटाः। कुम्भ्यो योषित्समाना अल्पाः। अतो मिथुनसंपत्त्या प्रजोत्पादनाय भवति। उपधातृवेदितारौ मिथुनरूपाः प्रजा उत्पादयतः। प्रकारान्तरेण तदुपधानं प्रशंसति—

शुग्वा अग्निरिति। अयमग्निः शुग्वै संतापहेतुरेव। अतः सोऽग्निरध्वर्युप्रभृतीन्संतापेन योजयति। अपामुपधानेनाग्नेः संतापहेतुत्वं शमयति। यस्मिन्कर्मण्येता इष्टका उपधीयन्ते न तत्राध्वर्युर्हिंसत्ये नापि यजमानः[1]। प्रजाश्च सर्वबाधोपशमयुक्ता भवन्ति। पुनः प्रकारान्तरेण प्रशंसति—

अपां वा इति। एताः पात्रगता या आप एतान्यब्देवतानां हृदयस्थानानि अत एताऽऽसामुपधावेष्टकारूपोपेता अपो दिव्याभिरद्भिः संयोजयति। ततः पर्जन्यो वर्षणशीलो भवति॥ अथोपधानस्थानं विधत्ते——

यो वा एतासामिति। आयतनं स्थानम्। क्लृप्तिः सामर्थ्यम्। तदुभयं यो वेद स प्रौढगृहाद्यायतनवान्भवति। एतदर्थं च सर्वं भोग्यजातं समृद्धं भवति। अतोऽभिज्ञोऽनुसीतमुपदध्यात्, एकैकस्यां दिशि या लाङ्गलपद्धतयस्ता अनुसृत्योपदध्यात्। एतत्सीतासमीपमेवैतासां कुम्भेष्टकानां स्थानम्। तत्रावस्थितिरेवैतासां सामर्थ्यमुक्तम्॥ वेदनफलमुपसंहरति——

य एवं वेदेति। उपधाने प्रकारविशेषं विधत्ते——

द्वंद्वमन्या इति। पूर्वदिग्वर्तिनीषु तिसृषु सीतासु कुम्भं कुम्भीं चेति द्वंद्वम्। एवं दिगन्तरेष्वपि। तदिदमुच्यते—द्वंद्वमन्या इति। द्वादशानां मध्ये दिक्चतुष्टयेऽष्टौ गताः। अथावशिष्टाश्चतस्रो मध्ये स्थापयेत्। तच्च धृत्यै दार्ढ्याय भवति॥

अथ दिवि श्रयस्वेतिमन्त्रसाध्यं चरूपधानं विधत्ते——

अन्नं वा इष्टका इति। इष्टका अन्नहेतुत्वादन्नं, चरुः साक्षादेवान्नमतश्चरूपधानेन व्यवधानं विनैव पुरुषमन्नं प्राप्नोति॥ उपधानस्थानं विधत्ते——

मध्यत उपेति। इष्टकानां मध्ये चरुस्थापनं यत्तद्यजमानस्य मध्य उदरेऽन्नं स्थापितं भवति। मध्यमे वयसि भूयिष्ठमन्नमद्यते॥ चरोर्देवतां विधत्ते——

बार्हस्पत्यो भवतीति। ब्रह्मणैव ब्राह्मणवृत्त्यैव याजनादिना न तु सेवादिनेत्यर्थः। मन्त्रे ब्रह्मवर्चसशब्दद्वयस्य तात्पर्यं दर्शयति——

ब्रह्मवर्चसमसीति। तेजः कान्तिः। ब्रह्मवर्चसमध्ययनादिसंपत्तिः॥

---

1 ख. भवन्ति।

(भूतेष्टकाद्यभिधानम्)

अत्र मीमांसा ।

द्वितीयाध्यायस्य तृतीयपादे सप्तमाधिकरणे चिन्तितम्—

चरुर्भवति नैवार उपधत्ते चरुं त्विति ।
यागः स्यादुपधानं वा यागः शेषोक्तदेवतः ॥
यागत्वानिश्चये शेषो नापेक्ष्योऽतो यजिः कुतः ।
किं तूपधानमात्रत्वं यावदुक्तं चरोः स्थितम् ॥

अग्नौ श्रूयते—"नैवारश्चरुर्भवति" इति, "चरुमुपदधाति" इति च । तत्र नैवारचरुद्रव्यको यागो विधीयते । न चात्र देवताया अभावः । "बृहस्पतेर्वा एतदन्नं यन्नीवाराः" इति वाक्यशेषेण देवतासिद्धेः । उपधानं तु यागोपयुक्तस्य प्रतिपत्तिः स्विष्टकृद्वदिति प्राप्ते ब्रूमः—यागविधौ निश्चिते सति पश्चाद्देवतायामपेक्षितायां वाक्यशेषबलाद्देवताक्लृप्तिः । इह तु देवताकल्पनेन यागविधित्वनिश्चय इत्यन्योन्याश्रयः । तस्मादिहोपधानमात्रं विधीयते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः) ।

भूतेष्टका उप दधात्यत्रात्र वै मृत्युर्जायते यत्रयत्रैव मृत्युर्जायते तत एवैनमव यजते तस्मादग्निचित्सर्वमायुरेति सर्वे ह्यस्य मृत्यवोऽवेष्टास्तस्मादग्निचिन्नाभिचरितवै प्रत्यगेनमभिचारः[1] स्तृणुते सूयते वा एष योऽग्निं चिनुते देवसुवामेतानि हवींषि भवन्त्येतावन्तो वै देवानाꣳ सवास्त एव (१) अस्मै सवान्प्र यच्छन्ति त एनꣳ सुवन्ते सवोऽग्नि-

---

१ ख. °गस्यानि° ।

वरुणसवो राजसूयं ब्रह्मसवश्चित्यो देवस्य त्वा सवितुः प्रसव इत्याह सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरभि षिञ्चत्यन्नस्यान्नस्याभि-षिञ्चत्यन्नस्यान्नस्यावरुद्ध्यै पुरस्तात्प्रत्यञ्चमभि-षिञ्चति पुरस्ताद्धि प्रतीचीनमन्नमद्यते शीर्ष-तोऽभि षिञ्चति शीर्षतो ह्यन्नमद्यत आ मुखा-दन्ववस्रावयति (२) मुखत एवास्मा अन्नाद्यं दधात्यग्नेस्त्वा साम्राज्येनाभि षिञ्चामीत्याहैष वा अग्नेः सवस्तेनैवैनमभि षिञ्चति बृहस्प-तेस्त्वा साम्राज्येनाभि षिञ्चामीत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि षिञ्चतीन्द्रस्य त्वा साम्राज्येनाभि षिञ्चामीत्याहेन्द्रियमेवा-स्मिन्नुपरिष्टाद्दधात्येतत् (३) वै राजसूयस्य रूपं य एवं विद्वानग्निं चिनुत उभावेव लोका-वभि जयति यश्च राजसूयेनेजानस्य यश्चाग्नि-चित इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं वीर्यं पराऽपतत्तद्देवाः सौत्रामण्या समभरन्त्सूयते वा एष योऽग्निं चिनुतेऽग्निं चित्वा सौत्राम-ण्या यजेतेन्द्रियमेव वीर्यꣳ संभृत्याऽऽत्मन्ध-त्ते (४) ॥

(त एवान्ववस्रावयत्येतदष्टाचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(भूतेष्टकाद्यभिधानम्)

(अथ पञ्चमकाण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः)।

कुम्भेष्टकाश्चरुश्चेति द्वितीये द्वयमीरितम्।

अथ तृतीये भूतेष्टकादिकमुच्यते। यदुक्तं सूत्रकारेण—" प्रसवाय त्वोपयामाय त्वा काटाय त्वाऽर्णवाय त्वा धर्णसाय त्वा द्रविणाय त्वा सिन्धवे त्वा समुद्राय त्वा सरस्वते त्वा विश्वव्यचसे त्वा सुभूताय त्वाऽन्तरिक्षाय त्वेति द्वादश भूतेष्टकाः " इति। एते च मन्त्राः शाखान्तरगताः। तत्साध्यमुपधानं विधत्ते—

भूतेष्टका उपेति। देशकालनिमित्तविशेषानपेक्षयात्रात्रेति वीप्सा। सर्पव्याघ्रचोराकुलदेशा मृत्युहेतवः। संध्यामध्यरात्रादिर्यक्षराक्षसादिप्रयुक्तमृत्युकालः दुराहारभोजनादीनि मृत्युनिमित्तानि। भूतेष्टकोपधानेन तत एव देशप्रयुक्तात्कालप्रयुक्तान्निमित्तप्रयुक्ताच्च सर्वस्मादपि मृत्योरेनं यजमानमपनयति। तस्मादयमग्निचित्स्वस्य प्राप्तमायुः सर्वमेव प्राप्नोति। यस्मादस्य सर्वेऽप्यपमृत्यवो विनाशिताः। किंचायमग्निचिदभिचारविषयोऽपि न भवति। एवं सति यो मूर्खोऽभिचरति एनं मूर्खं सोऽभिचारः प्रत्यङ्मुखो भूत्वा हिनस्ति।

यदुक्तं सूत्रकारेण—" अग्नीषोमीयस्य पशुपुरोडाशमष्टौ देवसुवां हवींष्यनु निर्वपति समानं तु स्विष्टकृदिडम् " इति, तदिदं विधत्ते—

सूयते वा एष इति। यो यजमानोऽग्निं चिनुते स एष देवैः सूयते प्रेर्यते। अतः प्रेरणाय हवींषि निर्वपेत्। अग्नये गृहपतये पुरोडाशमित्यादिराजसूयाम्नातानि देवसुवां हवींषि। तत्र श्रुता येऽग्न्यादयो देवा एतावन्त एव देवानां मध्ये प्रेरकाः। त एव देवा अस्मै यजमानाय स्वकीयाः सर्वा अनुज्ञाः प्रयच्छन्ति। तेन चानुज्ञाप्रदानेनैनं यजमानं प्रेरयन्ति।

यदुक्तं सूत्रकारेण—" दक्षिणं प्रत्यपि पक्षमौदुम्बरीमासन्दीं प्रतिष्ठाप्य तस्यां कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य तस्मिन्नासीनं यजमानमग्निमन्वारब्धं संपातैरभिषिञ्चति " इति, तदिदं विधातुं प्रस्तौति—

सवोऽग्निरिति। अभिषेकयुक्तो यागः सव इत्युक्तम्। स च द्विविधो वरुणसवो ब्रह्मसवश्च। राजकर्तृ[क]त्वाद्राजसूयं वरुणसवः। वरुणो हि राजाभिमानी देवः। चित्योऽग्निस्तु ब्राह्मणैरप्यनुष्ठेयत्वाद्ब्रह्मसवः। अग्निर्ब्राह्मणाभिमानी देवः। अतः सवत्वादयमभिषेकयोग्य इत्यर्थः।

मन्त्रपूर्वकमभिषेकं विधत्ते—

देवस्य त्वेति । ब्रह्मणा मन्त्रेण, प्रतिपाद्याभिरिति शेषः ।

सर्वौषधिरसमभिषेकद्रव्यत्वेन विधत्ते—

अन्नस्यान्नस्येति । प्रकारविशेषं विधत्ते—

पुरस्तात्प्रत्यञ्चमिति । पूर्वस्यां दिशि पश्चिमाभिमुखोऽवस्थाय प्रत्यञ्चं स्वाभिमुखं यजमानमभिषिञ्चेत् । लोके हि पुरस्तात्पात्रेऽवस्थितमन्नं स्वाभिमुखत्वेनाद्यते । शिर आरभ्याभिषिञ्चेत् । अन्नमपि शिरोदेशावस्थिते मुखे भुज्यते ।

गुणान्तरं विधत्ते—

आ मुखादन्ववेति । शिर आरभ्याऽऽनुलोम्येन मुखपर्यन्तमवस्रावयेन्न त्वधः । मन्त्रेष्वग्निबृहस्पतीन्द्रशब्दतात्पर्यं व्याचष्टे—

अग्नेस्त्वा साम्राज्येनेति । एष ओषधिरसोऽग्नेः सवोऽग्निना प्रेरितः । अतोऽग्निशब्दमुच्चारयन्नाग्निसंबन्धेन तेनैव रसेनाभिषिञ्चति । एष वै बृहस्पतेः सव एष वा इन्द्रस्य सव इत्यप्यनुसंधेयम् । एतेऽभिषेकमन्त्राः शाखान्तर आम्नाताः । इह ब्राह्मणेन व्याख्याताः । राजसूयसाम्येनाभिषेकं प्रशंसति—

एतद्वै राजसूयस्येति । एतदभिषेचनमेवाग्नेश्चित्यस्य राजसूयस्य स्वरूपम् । एवंविदश्चिन्वानस्योभयफलं भवति । अतश्चयनाङ्गत्वेन सौत्रामणीं विधत्ते—

इन्द्रस्य सुषुवाणस्येति । सोममभिषुतवत इन्द्रस्येन्द्रियं सोमोपद्रवपापेन दशधा भूत्वा पतितमभूत् । तदेतादिन्द्रियं देवाः सौत्रामण्या स्वाद्वीं त्वेत्यादिग्रन्थप्रतिपाद्येन यागेन सम्यक्संपादितवन्तः । एवं सत्यत्रापि योऽग्निं चिनुत एषोऽपि सोमाभिषवे प्रेर्यते । तस्मादयमपीन्द्रियसामर्थ्यसंपादनाय सौत्रामण्याख्यं यागमनुतिष्ठेत् । सौत्रामण्याश्चयनाङ्गत्वं न बोध्यते, किंतु कालविधिरयम् । तस्मादिदं वाक्यं प्रकरणादुत्कृष्टव्यम् ॥

अथ मीमांसा ।

चतुर्थाध्यायस्य तृतीयपादे विंशेऽधिकरणे चिन्तितम्—

आग्निं चित्वा यजेत्सौत्रामण्येत्यङ्गेष्टिरीदृशी ।
अङ्गिकाले स्वकाले वा स्यादाद्योऽन्याङ्गवन्मतः ॥
निर्वृत्ते चयनादौ तु कर्मान्तरविधानतः ।
स्वकाले चोदकप्राप्ते तदनुष्ठानमास्थितम् ॥

---

१ ख. च. °न तेन ते° ।

(होमाभिधानम्)

अग्निं चित्वा सौत्रामण्या यजेत, वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र सौत्रामणीबृहस्पतिसवयोरङ्गत्वं पूर्वमुक्तम्। तच्चाङ्गमाङ्गिकालेऽङ्गिना सह प्रयोक्तव्यमितरेषामङ्गानां तथा प्रयुज्यमानत्वादिति चेन्मैवम्। क्त्वाप्रत्ययेन पूर्वकालवाचिना साङ्गे चयनादौ निवृत्ते सति पश्चात्कर्मान्तरत्वेन सौत्रामण्यादेर्विहितत्वात्। यद्यङ्गिना सहैकप्रयोगः स्यात्तदा क्त्वाप्रत्ययप्रापितः पूर्वोत्तरकालविभागो बाध्येत। न ह्यङ्गिना सह प्रयोक्तव्यानामुखासंभरणादीनां चयने निर्वृत्ते पश्चाद्विधानं श्रुतम्। ततः पृथक्प्रयोगेऽवश्यंभाविनि सति स्वस्वचोदकप्रापिते काले तदनुष्ठानं युक्तम्। सौत्रामण्या इष्टिप्रकृतिकत्वात्पर्वकालश्चोदकप्राप्तः। चयनेन सहैव प्रयोगे तु पर्वण्युखासंभरणादिविधानादन्यस्मिन्दिने सौत्रामणी प्रसज्येत। तथा बृहस्पतिसवस्य ज्योतिष्टोमविकृतित्वाद्वसन्तकालश्चोदकप्राप्तः। वाजपेयेन सह प्रयोगैक्ये शरदि वाजपेयस्य विहितत्वाद्बृहस्पतिसवोऽपि शरदि प्रसज्येत। तस्मादतिदिष्टे पर्वणि वसन्ते[च] तदनुष्ठानम्। ननु सर्वत्राङ्गापूर्वैः प्रधानापूर्वं जनयितव्यम्। इह तु पूर्वकालीनेन साङ्गप्रधानानुष्ठानेन फलापूर्वस्य निष्पन्नत्वादुत्तरकालीनमङ्गं निरर्थकमिति चेन्न। तस्यैवापूर्वस्यानेनाङ्गेन प्राबल्यदशायाः कल्पनीयत्वात्। तस्मान्नाङ्गिनः कालेऽनुष्ठानं, किंतु स्वकाल इति स्थितम्। पूर्वानुवाकोक्तकुम्भेष्टकाचरूपधानस्य प्राणभृद्भ्योऽपानभृद्भ्यश्चोर्ध्वभावित्वादिदं ब्राह्मणमभिमन्त्रणमन्त्रसहितं पशुर्वा एष यदग्निरित्यनुवाकान्ते द्रष्टव्यम्। भूतेष्टकोपधानं तु वालखिल्योपधानादूर्ध्वं भवति। अभिषेकस्त्वग्निर्वै देवानामभिषिक्त इत्यस्मात्पूर्वं द्रष्टव्यः। सौत्रामणीब्राह्मणं तु कृत्स्नाद्ब्राह्मणादूर्ध्वं द्रष्टव्यम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः)।

सजूरब्दोऽयावभिः सजूरुषा अरुणीभिः सजूः सूर्य एतशेन सजोषावश्विना दꣳसोभिः

---

१ क. घ. ङ. °ष्टिविकृतित्वा°।

सजूरग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा संवत्सरो वा अब्दो मासा अर्यावा उषा अरुणीः सूर्य एतश इमे अश्विना संवत्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतꣳ संवत्सरं पशवोऽनु प्र जायन्ते संवत्सरेणैवास्मै पशून्प्र जनयति दर्भस्तम्बे जुहोति यत् (१) वा अस्या अमृतं यद्वीर्यं तद्दर्भास्तस्मिन्जुहोति प्रैव जायतेऽन्नादो भवति यस्यैवं जुह्वत्येता वै देवता अग्नेः पुरस्ताद्भागास्ता एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात्प्रति दधात्यनन्धो भवति य एवं वेदाऽऽपो वा इदमग्रे सलिलमासीत्स प्रजापतिः पुष्करपर्णे वातो भूतोऽलेलायत्सः (२) प्रतिष्ठां नाविन्दत स एतदपां कुलायमपश्यत्तस्मिन्नग्निमचिनुत तदियमभवत्ततो वै स प्रत्यतिष्ठद्यां पुरस्तादुपादधात्तच्छिरोऽभवत्सा प्राची दिग्यां दक्षिणत उपादधात्स दक्षिणः पक्षोऽभवत्सा दक्षिणा दिग्यां पश्चादुपादधात्तत्पुच्छमभवत्सा प्रतीची दिग्यामुत्तरत उपादधात् (३) स उत्तरः पक्षोऽभवत्सोदीची दिग्यामुपरिष्टादुपादधात्तत्पृष्ठमभवत्सोर्ध्वा दिगियं वा अग्निः पञ्चेष्टकस्तस्माद्यदस्यां खनन्त्यभीष्टकां तृन्दन्त्यभि शर्कराꣳ सर्वा वा इयं वयोभ्यो नक्तं दृशे दीप्यते तस्मादिमां वयाꣳसि नक्तं

(होमाभिधानम्)

नाध्यासते य एवं विद्वानग्निं चिनुते प्रत्येव (४) तिष्ठत्यभि दिशो जयत्याग्नेयो वै ब्राह्मणस्तस्माद्ब्राह्मणाय सर्वासु दिक्ष्वर्धुकꣳ स्वामेव तद्दिशमन्वेत्यपां वा अग्निः कुलायं तस्मादापोऽग्निꣳ हारुकाः स्वामेव तद्योनिं प्र विशन्ति (५) ॥

(यदेलिलायत्स उत्तरत उपादधादेव द्वात्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः)।

भूतेष्टकाभिषेकादि तृतीये समुदीरितम् ॥

अथ चतुर्थे होमो विधीयते । यदुक्तं सूत्रकारेण—" सजूरब्दोऽयावभिरिति दर्भस्तम्बे पञ्चाऽऽहुतीर्जुहोति " इति, तमिमं विधातुं मन्त्रानुत्पादयति——

सजूरब्दोऽयावभिरिति । अब्दः संवत्सरः । अयावा मासाः । स च संवत्सरस्तैर्मासैः सह समानप्रीतिः । अत्र सर्वेषु मन्त्रेषु घृतेन स्वाहेत्यनुषज्यते । तस्मै मासंसहिताय संवत्सराय घृतेन द्रव्येण स्वाहा जुहोमि । उषा येयमुषःकालदेवता सेयमरुणीभी रक्तवर्णाभिः प्रभाभिः सजूः समानप्रीतिः । तामुद्दिश्य घृतेन स्वाहा जुहोमि । सूर्यो देव एतशेन स्वकीयाश्वेन सजूः समानप्रीतिः । तमुद्दिश्य घृतेन स्वाहा जुहोमि । अश्विना यावेतावश्विनौ तौ दंसोभिर्दर्शनैर्व्याधिनिराकरणव्यापारैः सजोषौ परस्परं समानप्रीती । तावुद्दिश्य घृतेन जुहोमि । वैश्वानरः सर्वमनुष्यप्रियो योऽग्निः स इडाभिः पशुभिः सजूः समानप्रीतिः । तमुद्दिश्य घृतेन जुहोमि ॥ मन्त्रान्व्याचष्टे——

संवत्सरो वा इति । मन्त्रागतस्याब्दशब्दस्य संवत्सर एवार्थः । अयावशब्देन मासा अभिधीयन्ते । उषःशब्दादयश्चत्वारः प्रसिद्धाः । इमे द्यावापृथिव्यावश्विशब्देन विवक्षिते । अग्निर्वैश्वानर इत्यनेन संवत्सरो विवक्षितः । इडाशब्देन पशवो विवक्षिताः । घृतशब्देनापि तत्कारणत्वात्पशव एव विवक्षिताः ।

तात्पर्यार्थस्तु गर्भभूताः पशवः संवत्सरमनुसृत्य प्रजायन्ते । अत एतन्मन्त्रपाठे-नास्मै यजमानाय संवत्सरकालेन पशूनुत्पादयति ॥ अथ होमं विधत्ते—

दर्भस्तम्बे जुहोतीति । अस्याः पृथिव्याः संबन्धि यदमृतं स्वादुद्रव्यं, यच्च तत्संबन्धि वीर्यं सामर्थ्यं तदुभयमेवैते दर्भाः । अतस्तस्मिन्नमृते वीर्ये दर्भरूपे हुतवान्भवति । तेन होमेन प्रजा उत्पादयत्येव । यस्य यजमानस्य कर्मण्येवं जुह्वति स यजमानो न केवलं प्रजोत्पादकः किं त्वन्नादश्च भवति । एता एव मन्त्रोक्ताः संवत्सरमासादयः सर्वा देवता अग्नेरपि पूर्वभागिनोऽतस्ताः प्रीणयत्येव । किं च पूर्वकालीनेन होमेनाग्नेश्चक्षुरेव संपादयति । तदेवं दर्भस्तम्बहोमो देवताः कालश्च प्रशस्ताः ॥ अथ वेदनं प्रशंसति—

अनन्धो भवतीति । अथ चितियोग्या भूमिर्बहुधा स्तूयते, तत्र तावदादौ भूमिनिष्पत्तिप्रकारं दर्शयति—

आपो वा इदमिति । यदिदं जगदिदानीं दृश्यते तच्च सर्वमुत्पत्तेः पूर्वमाप एवाऽऽसीन्न तु देवमनुष्यादिकम् । तस्मिन्न(तास्व)प्सु पृथिव्यादिभूतान्तरमेलनं वारयितुं सलिलमिति विशेष्यते । शुद्धजलमेवाऽऽसीदित्यर्थः । तदानीं प्रजापतिः स्वशरीरमवस्थापयितुं मूर्तस्य कस्यचिदाधारस्याभावात्स्वयं वायुरूपोऽभूत्तदुदकमध्यवर्तिनि कस्मिंश्चित्पद्मपत्रे समाश्रितः । तस्य चलत्वात्स्वयं च वायुरूपत्वादलेलायदितस्ततो डोला(ल)यमानोऽभूत् । तादृशः कुत्रापि स्थिरां स्थितिं नालभत । स पुनराधारं पर्यालोचयन्नपां मध्ये कुलायं शैवालमपश्यत् । तस्मिञ्शैवालेऽग्निमिष्टकाभिश्चितवान् । सोऽयमिष्टकाचितोऽग्नीरियं दृश्यमाना भूमिरभवत् । तत ऊर्ध्वं स प्रजापतिस्तस्यां भूमौ प्रतिष्ठितोऽभूत् ॥

चयनेन भूम्युत्पत्तिप्रकारं प्रपञ्चयति—

यां पुरस्तादिति । स प्रजापतिर्यां प्रौढामिष्टकां स्वस्य पुरस्तादुपादधात्तदिष्टकारूपं चीयमानस्याग्नेः शिरस्थानमभवत् । लोके तु भूम्येकदेशरूपा पूर्वा दिक्संपन्ना । एवं दक्षिणाद्यूर्ध्वान्तेषु योजयितव्यम् ॥

भूमेश्चित्याग्निरूपत्वं शास्त्रीयलौकिकदृष्टिभ्यां दृढी करोति—

इयं वा अग्निरिति । येयं भूमिरस्ति सेयमेव यः पञ्चभिरिष्टकाभिश्चितोऽग्निः । तस्मादग्नित्वाद्यद्यनभिज्ञाः प्राणिनोऽस्यां भूमौ क्वचित्खनन्ति तदानीं ते

---

१ ख. च. सेयं प॰ ।

(केषांचिद्धविषामभिधानम्)

मूर्खाः प्रजापतिनोपहितामिष्टकामभितो हिंसन्ति चूर्णी कुर्वन्ति । तथा येयं शर्करा तेनोपहिता तामप्यभितृन्दन्ति सर्वतश्चूर्णयन्ति, तथाविधः प्रत्यवायस्तेषां भवतीत्यर्थः । सेयं शास्त्रीयदृष्टिः । अथ लौकिकदृष्टिरुच्यते—वयोभ्यो दृशे पक्षिणां दृष्टौ भूमिः सर्वाऽपि रात्रावग्निवद्दीप्ता भवति । यस्मादेवं तस्माद्रात्रौ पक्षिणो भूमिं नाऽऽश्रयन्ति, किंतु वृक्षाग्राण्याश्रयन्ति । तस्माच्छास्त्रीयलौकिकदृष्टिभ्यामियं भूमिरग्निरेव ॥ एतद्वेदनं प्रशंसति—

य एवं विद्वानिति । अथ ब्राह्मणद्वारा सर्वदिगुपेताया भूमेरग्नित्वं द्रढयति—

आग्नेयो वा इति । अग्निब्राह्मणयोः प्रजापतिमुखजत्वसंबन्धेन ब्राह्मण आग्नेयः । यस्मादयमग्निसंबधस्तस्मादाग्निरूपभूम्यवयवरूपासु सर्वास्वपि दिक्षु ब्राह्मणस्य समृद्धिशीलं जीवनं भवति । स्वदेश इव परदेशेष्वपि देवदत्तः शास्त्राभिज्ञः पूज्यते । अयं हि स्वकीयां दिशमनु गच्छति । तस्माद्युक्तमेतत् ॥

इदानीं लौकिकजलद्वारा पुनरप्यग्नित्वं द्रढयति——

अपां वा अग्निरिति । योऽयं भूमिरूपोऽग्निः सोऽयं नदीकूपादिगतानामपां कुलायं स्थानम् । भूमाववस्थितत्वाद्योनिश्चापां भूमिरूपोऽग्निरेव । यस्मादग्निकार्या आपस्तस्मान्महतो गृहादिदाहिनोऽग्नेरपहरणाय मनुष्यैः सेचिता आपस्तमग्निमपहरन्त्यः स्वयमपि शुष्यन्ति । यस्मादेवाग्निरूपां स्वयोनिं प्रविशन्ति । तस्मादवगम्यते जलकारणाग्निरूपेयं भूमिरिति । अत्रोक्तस्य होमस्य वेदिविमानात्पूर्वभावित्वात्पुरुषमात्रेणेत्यनुवाकात्पूर्वमिदं ब्राह्मणं द्रष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः) ।

संवत्सरमुख्यं भृत्वा द्वितीये संवत्सर आग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालं तृतीये संवत्सरेऽभिजिता यजेत

(केषांचिद्धविषामभिधानम्)

(अथ पञ्चमकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः) ।

क्षेमानात्पुरा होमश्चतुर्थे समुदीरितः ॥

अथ पञ्चमे कानिचिद्धवींषि विधीयन्ते । पूर्वस्मिन्प्रपाठके संवत्सरत्र्यहषडह-द्वादशाहाभिधारणपक्षाश्चत्वारोऽभिहिताः । तत्र तापश्चितामयनाख्यस्य संवत्सर-सत्रस्याङ्गभूते चयने संवत्सरमुख्यधारणं नियतम् ।

अत एव सूत्रकार आह—“तापश्चितेऽग्नौ संवत्सरं दीक्षा संवत्सरमुपसदः पुरस्तादुपसदामाग्नेयमष्टाकपालमिति पञ्च” इति, तदिदं सूत्रोक्तहविःपञ्चकं विधत्ते—

संवत्सरमुख्यमिति । यदप्युक्तं सूत्रकारेण—“तृतीये संवत्सरेऽभिजिता विश्वजिता वा यजेत सर्ववेदसं दद्याति” इति, तत्राऽऽद्यं पक्षं विधत्ते—

तृतीये संवत्सर इति । अभिजिदिति सोमयागविशेषः ।

तत्र पञ्चसु हविःषु प्रथमहविः प्रशंसति—

यदष्टाकपाल इति । गायत्रीपादस्याष्टाक्षरत्वं प्रसिद्धम् । प्रातःसवनं च गायत्रीछन्दसा निष्पाद्यत्वाद्गायत्रम् । गायत्र्या सहाग्नेरुत्पन्नत्वात्तदाग्नेयमपि । अतस्तेन हविषा प्रातःसवनफलं गायत्रीछन्दोदेवतां च प्राप्नोति ।

इतराणि चत्वारि हवींष्यभिजिदाख्यं सोमयागं च क्रमेण प्रशंसति—

यदेकादशकपाल इति । अत्र सर्वत्र हविष्प्रशंसा देवताप्रशंसाऽभि-जिद्यागप्रशंसा च विस्पष्टा । अथोख्यधारणं पञ्चहविर्युक्तचयनमभिजिदाख्यमेकाहं च क्रमेण प्रशंसति—

यत्संवत्सरमुख्यामिति । यद्यप्यत्राभिजिदेकाहो न तु संवत्सरसाध्यमयनं तथाऽपि तापश्चितामयनेऽङ्गभूतो योऽग्निस्तदर्थः संवत्सरोख्यधारणं संवत्सरोपस-दश्च, तेऽभिजिदङ्गेऽप्यतिदिश्यन्ते । तस्मादयमङ्गभूतोऽग्निर्वनातिदेशार्थं ताप-श्चित इत्युच्यते । पञ्च हवींष्यभिजिदङ्गभूतेऽग्नौ विधीयन्ते ।

तदिदं पञ्चहविर्युक्तं चयनं प्रकारान्तरेण प्रशंसति—

एतं वै पर इति । परआट्णारनिदिषः कश्चिदृषिः । सोऽयमट्णारस्य पुत्रः । कक्षीवानन्य ऋषिः । स पोशिजः पुत्रः । वीतहव्योऽन्य ऋषिः । स च श्रायसः

---

१ ख. घ. ङ. च. क्षेत्रं मातं पुरा° । २ क. घ. ङ. °दः पर° । ३ ख. °यत्रीं छन्दो दे° । ४ ख. ° श्च. सोऽभि° । घ. ङ. च. °श्च. साभि° । ५ ख. इयते । त° ।

(केषांचिद्धविषामभिधानम्)

(अथ पञ्चमकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः) ।

क्षेत्रमानात्पुरा होमश्चतुर्थे समुदीरितः ॥

अथ पञ्चमे कानिचिद्धवींषि विधीयन्ते । पूर्वस्मिन्प्रपाठके संवत्सरस्य द्वादशाहाभिधारणपक्षाश्चत्वारोऽभिहिताः । तत्र तापश्चितामयनाख्यस्य संवत्सरसत्रस्याङ्गभूते चयने संवत्सरमुख्यधारणं नियतम् ।

अत एव सूत्रकार आह—"तापश्चितेऽग्नौ संवत्सरं दीक्षा संवत्सरमुपसदः पुरस्तादुपसदामाग्नेयमष्टाकपालमिति पञ्च" इति, तदिदं सूत्रोक्तहविःपञ्चकं विधत्ते—

संवत्सरमुख्यमिति । यदप्युक्तं सूत्रकारेण—"तृतीये संवत्सरेऽभिजिता विश्वजिता वा यजेत सर्ववेदसं ददाति" इति, तत्राऽऽद्यं पक्षं विधत्ते—

तृतीये संवत्सर इति । अभिजिदिति सोमयागविशेषः ।

तत्र पञ्चसु हविःषु प्रथमहविः प्रशंसति—

यदष्टाकपाल इति । गायत्र्या अष्टाक्षरत्वं प्रसिद्धम् । प्रातःसवनं च गायत्रीछन्दसा निष्पाद्यत्वाद्गायत्रम् । गायत्र्या सहाग्नेरुत्पन्नत्वादाग्नेयमपि । अतस्तेन हविषा प्रातःसवनफलं गायत्रीछन्दोदेवतां च प्राप्नोति ।

इतराणि चत्वारि हवींष्यभिजिदाख्यं सोमयागं च क्रमेण प्रशंसति—

यदेकादशकपाल इति । अत्र सर्वत्र हविष्प्रशंसा देवताप्रशंसाऽभिजिद्यागप्रशंसा च विस्पष्टा । अथोख्यधारणं पञ्चहविर्यकचयनमभिजिदाख्यमेकाहं च क्रमेण प्रशंसति—

यत्संवत्सरमुख्यमिति । यद्यप्ययमभिजिदेकाहो न तु संवत्सरसाध्ययनं तथाऽपि तापश्चितामयनेऽङ्गभूतो योऽग्निस्तदर्थः संवत्सरोख्यधारणं संवत्सरादूर्ध्वं, येऽभिजिदङ्गेऽध्यापिदरयन्ते । तस्मादयमङ्गभूतोऽग्निर्यनातिदेशार्थं तापश्चित इत्युच्यते । पञ्च हवींष्यभिजिदङ्गभूतेऽग्नौ विधीयन्ते ।

तदिदं पञ्चहविर्विशेषं चयनं प्रकारान्तरेण प्रशंसति—

एतं वै पर इति । परसंज्ञो नियतः कश्चिद्राजा । सोऽयमट्णारस्य पुत्रः । कक्षीवानृषिः । स चोशिजः पुत्रः । वीतहव्योऽप्यृषिः । स च श्रायसः

---

१ ख. ध. ङ. च. क्षेत्रं मातुं पुरा° । २ क. ध. ङ. °नः प° । ३ ख. °यत्रीच्छन्दो दे° । ४ ख. °श्व. सोऽपि । ध. ङ. च. °श्व. सामि° । ५ ग. इयत । त

(पूर्वोक्तविधिप्रशंसा)

पुत्रः । त्रसदस्युरन्यः । स च पुरुकुत्सस्य पुत्रः । त एते प्रजाकामाः सन्तस्त-मेतं संवत्सरधारणेन पञ्चहविर्भिश्चोपेतमग्निं चित्वा प्रत्येकं सहस्रं पुत्रानलभन्त ।

अथैतस्य चयनस्य फलं दर्शयति—

प्रथते प्रजयेति । पूर्वोक्ता महर्षयो यां मात्रां सहस्रपुत्ररूपैश्वर्यप्रमाणमग-च्छन्, तां मात्रामयमप्येतमग्निं चिन्वानः प्राप्नोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-र्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः) ।

प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वाऽतिष्ठत्तं देवा बिभ्यतो नोपाऽऽयन्ते छन्दोभिरात्मानं छादयित्वोपाऽऽयन्तच्छन्दसां छन्दस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते छन्दोभिरेवाऽऽत्मानं छादयित्वाऽग्निमुप चरत्यात्मनोऽहिꣳसायै देवनिधिर्वा एष नि धीयते यदग्निः (१) अन्ये वा वै निधिमगुप्तं विन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्या अथो खल्वाहुर्नाऽऽक्रम्येति नैर्ऋत्युखा यदाक्रामेन्निर्ऋत्या आत्मानमपि दध्यात्तस्मान्नाऽऽक्रम्यां पुरुषशीर्षमुप दधाति गुप्त्या अथो यथा ब्रूयादेतन्मे गोपायेति तादृगेव तत् । (२) प्रजापतिर्वा अथर्वाऽग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थान्ये-

(पूर्वोक्तविधिप्रशंसा)

तꣳ ह बाव तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थ-
भिरिति यदिष्टकाभिरग्निं चिनोति सात्मानमे-
वाग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य
एवं वेद शरीरं वा एतदग्नेर्यच्चित्य आत्मा
वैश्वानरो यच्चिते वैश्वानरं जुहोति शरीरमेव
सꣳस्कृत्य (३) अभ्यारोहति शरीरं वा एत-
द्यजमानः सꣳ स्कुरुते यदग्निं चिनुते यच्चिते
वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्याऽऽत्मनाऽ-
भ्यारोहति तस्मात्तस्य नाव घ्नन्ति जीवन्नेव
देवानप्येति वैश्वानर्यर्चा पुरीषमुप दधातीयं
वा अग्निर्वैश्वानरस्तस्यैषा चितिर्यत्पुरीषमग्नि-
मेव वैश्वानरं चिनुत एषा वा अग्नेः प्रिया तनू-
र्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे (४) ॥

(अग्निस्तत्सꣳस्कृत्याग्नेर्दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठ-
प्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमेऽभिजितोऽङ्गं यच्चयने तद्विशेषितम् ।

अस्य च ब्राह्मणस्य पूर्वशेषत्वाभावान्न तत्रान्तर्भावः, किं त्वन्ते निवेशः ।
अथ षष्ठे पूर्वप्रकरणोक्तानेव विधीन्कानिचि (न्कांश्चि) दनूद्य प्रशंसति ।
तत्राश्मन्नूर्जमिति परिषिञ्चतीत्यनुवाके कार्ष्णी उपानहावुपमुञ्चत इति यद्वि-
हितं तस्य प्रशंसां दर्शयति—

प्रजापतिरग्निमिति । यदा प्रजापतिरग्निं चितवांस्तदा सोऽग्निः क्षुरपविर्भूत्वा

केनाप्यगम्योऽतिष्ठत्। क्षुरधारासमानधारा यस्य वज्रस्य सोऽयं वज्रः क्षुरपविः। तथाविधवज्रवदत्युग्र इत्यर्थः। तं तादृशमग्निं दृष्ट्वा देवा भीताः सन्तस्तत्समीपं न प्राप्ताः।

ततः प्रतीकारं विचार्य च्छन्दोयुक्तैर्मन्त्रैः स्वशरीरमाच्छाद्य मन्त्रजपेन रक्षां कृत्वा वह्निसमीपमागताः। छादयन्त्येभिरिति व्युत्पत्त्या छन्दस्त्वं संपन्नम्। तेषां च च्छन्दसां वेदेऽन्तर्भूतत्वाद्वेद एव तद्रूपम्। कृष्णाजिनं च वेदस्य स्वरूपम्। ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णो रूपं कृत्वेत्युक्तत्वात्। तस्मात्कृष्णाजिननिर्मिते उपानहावुपमुञ्चेत। तथा सति च्छन्दोभिरेव स्वशरीरमाच्छाद्याग्निरुपचरणात्स्वस्य हिंसा न भवति। यद्यपि मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत्कृष्णाजिनमिति प्रशंसाऽपि तत्रैव कृता, तथाऽपि तस्या एवायं प्रपञ्च इत्यविरोधः।

एषां वा एतल्लोकानामित्यनुवाके यद्विहितं मध्ये पुरुषशीर्षमुप दधाति सर्वार्थत्वायोखायामपि दधातीति, तदेतत्पूर्वोत्तरपक्षाभ्यां प्रशंसितुं पूर्वपक्षं तावद्दर्शयति—

देवनिधिर्वा इति। योऽयं चीयमानोऽग्निः सोऽयं देवानां निधिस्थानीयः। एवं सति लोके यो निधिरगुप्तो भवति तं निधिमन्ये वा विरोधिनो लभन्ते। स्वयं वा कदाचित्तदीयस्थानविस्मरणेन तं निधिं न प्रजानाति। अतो दोषद्वयपरिहाराय पूर्वमुपहितामुखां स्वपादेनाऽऽक्रामेत्। तथा सति यजमानः स्वात्मानमेव निधेरधिकं पालकं करोति। तच्च रक्षणाय भवति। आक्रमणेन स्वबुद्धौ दृढीकृतत्वान्न कदाचिद्विस्मरति। स्वेन रक्षितत्वादेव वैरिणोऽपि तं निधिं न लभन्ते। अथ सिद्धान्तं दर्शयति—

अथो खल्वाहुरिति। अभिज्ञाः खलु तं पक्षमपनाद्यैवमाहुः—पादेन सेयमुखा नाऽऽक्रम्येति। तत्रायं हेतुः—इयमुखा राक्षसदेवताया निर्ऋतेः संबन्धिनी अत उखाया आक्रमणे निर्ऋत्यै स्वशरीरं समर्पयेत्। तस्मात्सर्वथा नाऽऽक्रमणीया। यदि निधेर्गुप्तिरपेक्षिता तर्हि पुरुषशीर्षमुखायामुपरि स्थापयेत्। तथा सति यथा लोके कंचित्पुरुषं रक्षकं निधिसमीपेऽवस्थाप्य मदीयमेतद्द्रव्यं गोपायेति स्वामी ब्रूयात्तादृगेव तत्पुरुषशिरःस्थापनं द्रष्टव्यम्।

---

१ ख. च. °मुञ्चते। त°।

(पूर्वोक्तविधिप्रशंसा)

पञ्चमप्रपाठके य एवं विद्वानग्निं चिनुत ऋध्नोत्येवेति यश्चयनविधि रुक्तस्तं पुनः प्रशंसति—

प्रजापतिर्वा इति । अत्र किंचिद्रूपकं परिकल्प्यते । अस्ति कश्चिदथर्वाख्य ऋषिः । तस्य च पुत्रो दध्यङ्नामा । दधीचोऽस्थीनि कचिच्छत्रुहननायाऽऽयुधत्वं प्राप्तानि । तत्सर्वमत्र संपाद्यते । योऽयमग्नेश्चेता प्रजापतिः स एवाथर्वा । चीयमानश्चाग्निस्तत्पुत्रो दध्यङ् । इष्टकाश्चास्थीनि । तमेतमेवार्थमभिप्रेत्य कश्चिदृषिर्मन्त्रस्तत्सर्वमनुवदति । मन्त्रस्य च प्रतीकमिदमिन्द्रो दधीचो अस्थभिरिति । स च मन्त्रोऽन्यत्रैवमाम्नातः—"इन्द्रो दधीचो अस्थभिः । वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव" इति । तदेवमिष्टकानामस्थिरूपत्वाभिधाने सति सशरीरोऽग्निश्चितो भवति । वेदनं प्रशंसति—

सात्माऽमुष्मिन्निति । प्राचीमनु प्रदिशं प्रेहि विद्वानित्याहेत्यनुवाके यद्विहितं द्वादशकपालो वैश्वानरो भवतीति तत्प्रशंसति—

शरीरं वा इति । यश्चितिनिष्पाद्योऽग्निस्तदिदमग्निदेवतायाः शरीरम् । वैश्वानरश्च शरीरावस्थितो जीवात्मा । तथा सति चितेऽग्नौ वैश्वानरं पुरोडाशं जुहोतीति यत्तेनाग्निदेवतायाः शरीरमेव संस्कृत्य पश्चादारूढो भवति ।

तस्यैतस्य वैश्वानरपुरोडाशस्य चोदकप्राप्तमवदानं निषेधति—

शरीरं वा इति । यजमानोऽग्निं चिनुत इति यत्तेनासौ स्वशरीरमेव संस्करोति । एवं सति चितेऽग्नौ वैश्वानरपुरोडाशं जुहोतीति यत्तेन स्वशरीरमेव संस्कृत्य तस्मिञ्शरीरे जीवरूपेणाऽऽरूढो भवति । तस्मात्तस्य जीवात्मस्थानीयस्य पुरोडाशस्यावदानं न कुर्यात् । तदकरणे च स्वयं जीवन्नेव देवान्प्राप्नोति ।

यावती वै पृथिवीत्यनुवाके पुरीषेणाभ्यूहतीति यद्विहितं तत्र पृष्टो दिवीत्येतामृचमन्यत्राऽऽम्नातां विनियुङ्क्ते—

वैश्वानर्यर्चेति । पृष्टो दिवीतिमन्त्रप्रतिपाद्यो यो वैश्वानरोऽग्निः स भूमिस्वरूप एव । पुरीषं च चितिस्वरूपम् । अतः पुरीषोपधानेन भूमिरूपं वैश्वानराग्निमेव चितवान्भवति । किंच, वैश्वानरशब्दोदितः सर्वपुरुषहितकारी यो विग्रह एषैवाग्नेः प्रिया तनूः । ततो वैश्वानरमन्त्रेणोपधाने सत्यग्नेः प्रियामेव तनुवं प्राप्नोति । एतानि च ब्राह्मणवाक्यानि विधिशेषत्वात्तद्विधिसमीप एव द्रष्टव्यानि ।

(दीक्षाविकल्पविधिः)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः)।

अग्नेर्वै दीक्षया देवा विराजमाप्नुवन्तिस्रो रात्रीर्दीक्षितः स्यात्त्रिपदा विराड्विराजमाप्नोति षड्रात्रीर्दीक्षितः स्यात्षड्वा ऋतवः संवत्सरः संवत्सरो विराड्विराजमाप्नोति दश रात्रीर्दीक्षित स्याद्दशाक्षरा विराड्विराजमाप्नोति द्वादश रात्रीर्दीक्षितः स्याद्द्वादश मासाः संवत्सरः संवत्सरो विराड्विराजमाप्नोति त्रयोदश रात्रीर्दीक्षितः स्यात्त्रयोदश (१) मासाः संवत्सरः संवत्सरो विराड्विराजमाप्नोति पञ्चदश रात्रीर्दीक्षितः स्यात्पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरो विराड्विराजमाप्नोति सप्तदश रात्रीर्दीक्षितः स्याद्द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरो विराड्विराजमाप्नोति चतुर्विंशतिꣳ रात्रीर्दीक्षितः स्याच्चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरो विराड्विराजमाप्नोति त्रिꣳशतꣳ रात्रीर्दीक्षितः स्यात् (२) त्रिꣳशदक्षरा विराड्वि-

(दीक्षाविकल्पविधिः)

राजमाप्नोति मासं दीक्षितः स्याद्यो मासः स संवत्सरः संवत्सरो विराड्विराजमाप्नोति चतुरो मासो दीक्षितः स्याच्चतुरो वा एतं मासो वसवोऽग्निमरुस्ते पृथिवीमाऽजयन्गायत्रीं छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाऽजयंस्त्रिष्टुभं छन्दो द्वादशाऽऽदित्यास्ते दिवमाऽजयञ्जगतीं छन्दस्ततो वै ते व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां तस्माद्द्वादश मासो भृत्वाऽग्निं चिन्वीत द्वादश मासाः संवत्सरः संवत्सरोऽग्निश्चित्यस्तस्याहोरात्राणीष्टका आप्तेष्टकमेनं चिनुतेऽथो व्यावृतमेव गच्छति श्रैष्ठ्यं समानानाम् (३) ॥

(स्यात्त्रयोदश त्रिंशतः रात्रीर्दीक्षितः स्याद्वै तेऽष्टाविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठ-प्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठे प्रशंसाः कथितास्तत्तद्विध्यनुवादतः ।

अथ सप्तमे दीक्षाविकल्पान्विधातुं प्रस्तौति—

अग्नेर्वै दीक्षयेति । मौण्ड्यमौनादिनियमस्वीकाररूपा दीक्षा । चीयमानस्याग्नेः संबन्धिन्या तादृश्या दीक्षया देवा विराजं प्राप्ताः । विराट्शब्दः प्रशस्तं छन्दोविशेषं ब्रूते । तेन च विशिष्टं राज्यमुपलक्ष्यते । तद्राज्यं प्राप्ता इत्यर्थः । अतो विधास्यमानेषु दीक्षाकालविकल्पेषु सर्वत्र विराट्प्राप्तिरुपन्यस्यते ।

तानेतान्विकल्पितपक्षान्विधत्ते—

तिस्रो रात्रीर्दीक्षित इति । त्रिरात्रषड्रात्रदशरात्रद्वादशरात्रत्रयोदशरात्रप-

(अन्वारोहणाद्यभिधानम्)

श्चदशरात्रसप्तदशरात्रचतुर्थ्यतिरात्रत्रिंशद्रात्रमासचतुर्मासाष्टमासद्वादशमासरूपा-स्त्रयोदश पक्षा विकल्पिताः । दशाक्षरैस्त्रिभिः पादैरुपेतं विराडाख्यं छन्दः । अतस्त्रित्वसंख्यया तत्प्राप्तिः । षट्संख्यानामृतूनां संवत्सरावयवत्वेन संवत्सर-स्वरूपत्वात्संवत्सरस्य च षट्त्रिंशद्भिर्दिनदशकैर्निष्पाद्यत्वाद्दशसंख्यायाश्च विराट्-पादाक्षरगतत्वात्संवत्सरद्वारा तत्प्राप्तिः । एवं सर्वत्र योज्यम् । अधिकमासेन सह त्रयोदश मासाः । सावनमासस्य त्रिंशद्रात्रनियमेऽपि चान्द्रमासस्य तन्नि-यमाभावात्तदपेक्षया पृथङ्मासोपन्यासः । वसवो मासचतुष्टयमुख्याग्निं भूत्वा पृथिवीं गायत्रीछन्दोदेवतां च वशीकृतवन्तः । रुद्रास्तु मासाष्टकं भूत्वाऽन्तरिक्षं त्रिष्टुप्छन्दोदेवतां च वशीकृतवन्तः । आदित्यास्तु मासद्वादशकं भूत्वा द्युलोकं जगतीछन्दोदेवतां च वशीकृतवन्तः । एतेषु पक्षेषु संवत्सरपक्षस्यात्यन्तप्रशस्त-त्वादादित्या इतरेभ्यो व्यावृत्ता प्राप्य देवाना मध्ये श्रैष्ठ्यं प्राप्ताः ।

अत एतमेव पक्षमादरेण पुनः प्रशंसति—

तस्माद्द्वादशेति । द्वादश मासानुपस्थानकाले नैरन्तर्येणोख्याग्निं भूत्वाऽग्निं चिनुयात् । मासद्वादशकस्य संवत्सररूपत्वाच्चित्याग्निरपि धारणद्वारा संवत्सरात्मकः । तस्य संवत्सरात्मनोऽग्नेरिष्टका एवाहोरात्राणि । ततः संवत्सर-धारणेन संपूर्णत्वेन प्राप्तेष्टकाग्निमग्निं चितवान्भवति । अपि चेतरेभ्योऽग्निचिद्भ्यो व्यावृत्तः समानाना मध्ये श्रैष्ठ्यं प्राप्नोति । यद्यपि तस्मात्संवत्सरं भार्य इत्यादौ संवत्सरातिरात्रषड्रात्रद्वादशरात्रपक्षा विहितास्तथाऽप्यर्थवादसंबन्धार्थमत्र पुनरु-पन्यासः । एतच्च ब्राह्मणमाग्नावैष्णवविधित्सत्वड्भिर्दीक्षयतीत्यनुवाकसमीपे द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदी-यतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके

सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः) ।

सुवर्गाय वा एष लोकाय चीयते यद॒ग्निस्तं

यन्नान्वारोहेत्सुवर्गाल्लोकाद्यजमानो हीयेत पृ-

(अन्वारोहणाद्यभिधानम्)

थिवीमाऽक्रमिषं प्राणो मा मा हासीदन्तरिक्ष-
माऽक्रमिषं प्रजा मा मा हासीद्दिवमाऽक्रमि-
षꣳ सुवरगन्मेत्याहैष वा अग्नेरन्वारोहस्तेनैवै-
नमन्वारोहति सुवर्गस्य लोकस्य समष्ट्यै यत्प-
क्षसंमितां मिनुयात् (१) कनीयाꣳसं यज्ञ-
क्रतुमुपेयात्पापीयस्यस्याऽऽत्मनः प्रजा स्याद्वे-
दिसंमितां मिनोति ज्यायाꣳसमेव यज्ञक्रतु-
मुपैति नास्याऽऽत्मनः पापीयसी प्रजा भवति
साहस्रं चिन्वीत प्रथमं चिन्वानः सहस्रसं-
मितो वा अयं लोक इममेव लोकमभि
जयति द्विषाहस्रं चिन्वीत द्वितीयं चिन्वानो
द्विषाहस्रं वा अन्तरिक्षमन्तरिक्षमेवाभि जयति
त्रिषाहस्रं चिन्वीत तृतीयं चिन्वानः (२)
त्रिषाहस्रो वा असौ लोकोऽमुमेव लोकमभि
जयति जानुदघ्नं चिन्वीत प्रथमं चिन्वानो
गायत्रियैवेमं लोकमभ्यारोहति नाभिदघ्नं
चिन्वीत द्वितीयं चिन्वानस्त्रिष्टुभैवान्तरिक्षम-
भ्यारोहति ग्रीवदघ्नं चिन्वीत तृतीयं चिन्वानो
जगत्यैवामुं लोकमभ्यारोहति नाग्निं चित्वा
रामामुपेयादयोनौ रेतो धास्यामीति न द्वितीयं
चित्वाऽन्यस्य स्त्रियम् (३) उपेयान्न तृतीयं
चित्वा कां चनोपेयाद्रेतो वा एतन्नि धत्ते
यदग्निं चिनुते यदुपेयाद्रेतसा व्यृध्येताथो

(अन्वारोहणाद्यभिधानम्)

खल्वाहुरप्रजस्यं तद्यन्नोपेयादिति यद्रेतः सिचा-वुपदधाति ते एव यजमानस्य रेतो बिभृतस्त-स्मादुपेयाद्रेतसोऽस्कन्दाय त्रीणि वाव रेताꣳसि पिता पुत्रः पौत्रः (४) यद्द्वे रेतःसिचा-वुपदध्याद्रेतोऽस्य वि च्छिन्द्यात्तिस्र उप दधाति रेतसः संतत्या इयं वाव प्रथमा रेतःसिग्वाग्वा इयं तस्मात्पश्यन्तीमां पश्यन्ति वाचं वदन्तीमन्तरिक्षं द्वितीया प्राणो वा अन्तरिक्षं तस्मान्नान्तरिक्षं पश्यन्ति न प्राण-मसौ तृतीया चक्षुर्वा असौ तस्मात्पश्यन्त्यमूं पश्यन्ति चक्षुर्यजुषेमां च (५) अमूं चोप दधाति मनसा मध्यमामेषां लोकानां क्लृ-प्त्या अथो प्राणानामिष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्याह स्तुतशस्त्रे एवैतेन दुहे पिता मातरिश्वाऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुः सोमो विश्वविन्नेता नेषद्बृहस्प-तिरुक्थामदानि शꣳसिषदित्याहैतद्वा अग्ने-रुक्थं तेनैवैनमनु शꣳसति (६) ॥

(मिथुनपात्तृतीयं चिन्वानः स्त्रियं पौत्रश्च वै सप्त च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठ-प्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अन्वारोहणाद्यभिधानम्)

(अथ पञ्चमकाण्डे षष्ठप्रपाठकेऽष्टमोऽनुवाकः) ।

दीक्षाकालविकल्पा ये ते सप्तम उदीरिताः ।

अथाष्टमेऽन्वारोहणादिकमुच्यते ।

यदुक्तं सूत्रकारेण—" नमस्ते हरसे शोचिष इति द्वाभ्यामग्निमधिरोहति पृथिवीमाक्रमिषमित्येतैर्यजमानः " इति, तद्विधिमिहोन्नयति—

सुवर्गाय वा इति । योऽयं चीयमानोऽग्निरेष सुवर्गलोकार्थं चीयतेऽतस्त-स्यान्वारोहाभावे सुवर्गाद्धीयेत तन्मा भूदिति पृथिवीमित्यादिभिरन्वारोहेदिति विधिरुन्नेयः । मन्त्रार्थस्तु—यजमानोऽहं पृथिवीं पादेनाऽऽक्रमिषमतः प्राणो मां मा परित्यजतु । अन्तरिक्षाक्रमणेन पुत्रादिप्रजा मा परित्यजतु । दिव आक्र-मणेन स्वर्गं प्राप्नुमः । एतन्मन्त्रपाठ एवाग्नेरन्वारोहहेतुः । अतस्तेनैवान्वारोहति । तच्च स्वर्गप्राप्त्यै भवति । अथ यूपैकादशिन्यां कंचिद्विशेषं विधत्ते—

यत्पक्षसंमितामिति । पक्षदैर्घ्यपरिमित एव देशे यद्येकादशिनीमवस्थाप-येत्तदानीमत्यल्पं यज्ञक्रतुं प्राप्नुयात् । अस्य यजमानस्य स्वकीया प्रजा पापी-यसी च भवेत् । अतः पक्षपरिमाणादधिके वेदिप्रमाणयुक्तदेशे यूपान्तरालानि विलिख्यैकादशिनीं मिनुयात् । तथा सति प्रभूतमेव यज्ञक्रतुं प्राप्नोति । अस्य प्रजा च पापीयसी न भवति । पूर्वस्मिन्प्रपाठके वज्र एकादशिनीत्यत्र प्रकृतिभूते चयने पश्वेकादशिनीपक्षेऽप्येक एव यूपो न तु यूपैकादशिनीत्युक्तम् । इह तु चयनविकृतिषु यूपैकादशिन्यभ्युपगम्यत इत्यविरोधः ।

अथ पञ्चस्वपि चितिषु संभूयेष्टकासंख्यां विधत्ते—

साहस्रं चिन्वीतेति । सहस्रसंख्याकानामिष्टकानां समूहः साहस्रम् । अथवा सहस्रसंख्याकाभिरिष्टकाभिर्निष्पाद्योऽग्निः साहस्रः । यः प्राथमिकमग्निं चिन्वीत स तु साहस्रं कुर्यात् । द्वितीयवारं चिन्वानो द्विगुणम् । तृतीयवारं चिन्वानस्त्रिगुणम् । पृथिव्यन्तरिक्षद्युलोकाश्चोत्तरोत्तरभूयस्त्वात्तत्तच्चितिसंमिताः । अतस्तैश्चयनैस्तत्प्राप्तिः । पक्षद्वयेऽपि क्रमेणोर्ध्वपरिमाणं विधत्ते—

जानुदघ्नं चिन्वीतेति । तथा प्रथमद्वितीयतृतीयचितीनामुत्तरोत्तरमौन्नत्यम् । अत एव गायत्रीत्रिष्टुब्जगतीनामुत्तरोत्तरमक्षराधिक्यम् । अतः क्रमेण गायत्र्या-दिद्वारा लोकत्रयमधिरोहति । त्रिविधचयने क्रमेण नियमविशेषान्विधत्ते—

नाग्निं चित्वेति । यः प्राथमिकमग्निचयनं करोति स रामां नोपेयात् ।

स्वकीयासु भार्यासु मध्ये रमणीयेयमिति मत्वा कामुको न प्रवर्तेत । पुत्रार्थं तस्यामीप्सितानुज्ञा । रामोपगमनाभावेऽयं हेतुः—अयोनौ पुत्रोत्पत्त्यनुपयुक्तायां वृथैव रेतः स्थापयिष्यामीति तन्मा भूदित्यनुपगमनम् । द्वितीयचयनानुष्ठायी सार्ववर्णिकविवाहोपेतोऽन्यस्य वर्णान्तरस्य दुहितरं नोपेयात् । सवर्णायामीप्सितस्यानुज्ञा । तृतीयचयनानुष्ठायी सवर्णामसवर्णां रमणीयां पुत्रार्थिनीं वा कामपि नोपेयात् । तत्रायं हेतुः—आग्निं चिनुत इति यत्तदेतद्रेतसो गुप्तत्वेन स्थापनम् । तथा सत्युपगमने रेतसा वियुक्तो भवति ।

अभिगमनपक्षं दूषयित्वा सर्वत्र गमनमभ्यनुजानाति—

अथो खल्वाहुरिति । अभिज्ञाः खल्वेवमाहुः—अनुपगमनमप्रजस्यं प्रजोत्पादनहेतुर्न भवति । न चोपगमने रेतोहानिः शङ्कनीया । विराड्ज्योतिरित्यादिमन्त्राभ्यां रेतःसिचाविष्टके अनेनोपहिते । तस्मात्ते एवास्य यजमानस्य रेतः पालयतः । अतो रेतसो विनाशाभावाय प्रजोत्पत्त्यर्थमुपेयात् । साहस्रादिविधीनामाम्नातब्राह्मणोक्तावप्यवकाशाभावात्सर्वान्ते निवेशः । पूर्वस्य त्वन्वारोहणविधेर्नमस्ते हरस इत्याद्यधिरोहणादूर्ध्वभावित्वादश्मन्नूर्जमिति परि षिञ्चतीत्यनुवाकान्ते निवेशः । पूर्वस्मिन्प्रपाठके यद्विराजावुपदधातित्यादिना रेतःसिचो विधानमुक्तम् । तत्रैव कंचिद्विशेषं विधत्ते—

त्रीणि वावेति । योऽयं पितेदानीं वर्तते सोऽतीतस्य कस्यचिद्रेतः । अस्य पितुः पुत्रो रेतः । पौत्रस्तु पुत्रस्य रेतः । एवं पितृपुत्रपौत्राणां त्रीणि रेतांसि । तथा सति द्वयोरेव रेतःसिचोरुपधाने सत्यवशिष्टं रेतो विच्छिन्द्यात् । तस्मात्तिस्रो रेतःसिच उपदध्यात् । तच्च रेतःसंतत्यै संपद्यते । तिस्रोऽपि रेतःसिचः क्रमेण प्रशंसति—

इयं वाव प्रथमेति । या प्रथमा रेतःसिक्सा भूमिरेव प्राथम्यसाम्यात् । भूमिश्च वागुपिण्यधोवृत्तित्वसाम्यात् । आस्ये हि वाग्वृत्तित्वे नासिकायां प्राणस्तत उपरि चक्षुस्ततो वाचोऽधोवृत्तित्वम् । यस्माद्भूमिवाचावधोवृत्तित्वेन समानरूपे तस्माल्लोकेऽपि नानाविधसस्यादिपूर्णामिमां भूमिं मातृरूपेण पश्यन्ति । तथा विद्वत्सभायां सम्यग्वदन्तीं वाचं पश्यन्त्याद्रियन्ते । येयं द्वितीया रेतःसिक्सा चान्तरिक्षरूपा मध्यमत्वसाम्यात् । तच्चान्तरिक्षं प्राणस्वरूपं प्राणस्यापि वाक्चक्षुषोर्मध्यवर्तित्वात् । यस्मादन्तरिक्षप्राणयोः साम्यं तस्मादमूर्तमन्तरिक्षं चक्षुषा

(अन्वारोहणार्थमभिधानम्)

न पश्यन्ति । प्राणं च नासिकासंचारिणं चक्षुषा न पश्यन्ति । येयं तृतीया रेतःसिक्सा सा द्युलोकस्वरूपोपरिवर्तित्वसाम्यात् । सा च द्यौश्चक्षुःस्वरूपा । चक्षुरपि हि वाक्प्राणाभ्यामूर्ध्वं वर्तते । यस्माद्द्युचक्षुषोः साम्यं तस्माल्लोके जनाः सूर्यचन्द्रनक्षत्राद्युपलक्षितामम् दिवं प्रत्यक्षेण पश्यन्ति । चक्षुरपि शुक्लकृष्णकनीनिकोपेतं परकीयमुखस्थं प्रत्यक्षतः पश्यन्ति ।

तदेवं विस्तः प्रशस्य तासु कंचिद्विशेषं विधत्ते—

यजुषेमां चामूमिति । विराड्ज्योतिरधारयदिति यजुषोच्चारितेनेमां प्रथमां रेतःसिचमुपदध्यात् । तथा सम्राड्ज्योतिरधारयदिति यजुषोच्चारितेनामूं तृतीयां रेतःसिचमुपदध्यात् । स्वराड्ज्योतिरधारयदित्येतद्यजुरनुच्चार्य मनसा स्मृत्वा मध्यमां रेतःसिचमुपदध्यात् । अयं च प्रकार एषां पृथिव्यादिलोकानां स्वस्वव्यापारसामर्थ्याय संपद्यते । अपि च वाक्प्राणचक्षुराख्यानां प्राणानामपि स्वस्वव्यापारसामर्थ्याय संपद्यते । तदिदं रेतःसिचां ब्राह्मणं यद्विराजावुपदधातीत्यनेन सह स्वयमातृण्णामुप दधातीत्यनुवाके द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—" एकादश समिष्टयजूंषि जुहोति नवाऽऽध्वरिकाणि हुत्वेष्टो यज्ञो भृगुभिरिति दशमैकादशे जुहोति " इति, तदेतद्धिधातुं मन्त्रावुत्पादयति—

इष्टो यज्ञ इति । भृगुभिर्भृगुसमानैर्ऋत्विग्भिर्वसुभिर्निवासहेतुभिर्देवैश्चेष्टोऽयं यज्ञ आशीर्दा यजमानस्य फलप्रदोऽस्तु । सोऽयमेको मन्त्रः । हे यज्ञ तस्य तादृशस्य भृगुभिरिष्टस्य ते तव द्रविणा फलभूतानि धनानीह कर्माणि भक्षीय भजे यथाऽऽप्नुयाम् । सोऽयं द्वितीयो मन्त्रः । एतन्मन्त्रसाध्यं होमविधिमुन्नयति—

इत्याहेति । इत्युक्तमन्त्रद्वयं होमकाले पठेत् । तेन स्रुवशास्त्रे उभे अपि दुग्धवान्भवति । तदिदं ब्राह्मणमन्ते द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—" पिता मातरिश्वेति संचितोक्थेन होताऽनुशंसति होतर्यकामयमानेऽध्वर्युः " इति, तत्र मन्त्रमुत्पाद्य विधत्ते—

पिता मातरिश्वेति । पिता पालको मातरिश्वा वायुराच्छिद्रा पदा विनाशरहितानि स्थानानि धा दधातु संपादयतु । तथोशिजः कमनीया महर्षयोऽच्छिद्राः स्वयं विनाशरहिताः सन्तः पदानि स्थानानि अनुतक्षुः सम्यक्संपादयन्तु । विश्ववित्सर्वज्ञो नेता जगतः प्रवर्तकः सोमो नेषन्नयतु तानि प्रापयतु । बृह-

स्पतिश्चोक्थामदानि शस्त्राणि हर्षकारणानि शंसिषच्छंसात्विरयेतादृशं मन्त्रं पठेत्। एतदेव मन्त्रस्वरूपमग्नेः प्रियमुक्थं शस्त्रम्। तेनैव मन्त्रपाठेनैनमग्निमनु क्रमेण शंसति। एतच्च ब्राह्मणं गायत्रादिसामोपस्थानेन सह विकर्षणादूर्ध्वं द्रष्टव्यम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके नवमोऽनुवाकः)।

सूयते वा एषोऽग्नीनां य उखायां भ्रियते यदधः सादयेद्गर्भाः प्रपादुकाः स्युरथो यथा सवात्प्रत्यवरोहति तादृगेव तदासन्दी सादयति गर्भाणां धृत्या अप्रपादायाथो सवमेवैनं करोति गर्भो वा एष यदुख्यो योनिः शिक्यं यच्छिक्यादुखां निरूहेद्योनेर्गर्भं निर्हण्यात्षडुद्यामꣳ शिक्यं भवति षोढाविहितो वै (१) पुरुष आत्मा च शिरश्च चत्वार्यङ्गान्यात्मन्नेवैनं बिभर्ति प्रजापतिर्वा एष यदग्निस्तस्योखा चोलूखलं च स्तनौ तावस्य प्रजा उप जीवन्ति यदुखां चोलूखलं चोपदधाति ताभ्यामेव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे संवत्सरो वा एष यदग्निस्तस्य त्रेधाविहिता इष्टकाः प्राजापत्या वैष्णवीः (२) वैश्वकर्मणीरहोरात्राण्येवास्य प्राजापत्या यदुख्यं बिभर्ति प्राजापत्या एव तदुप धत्ते यत्समिध आदधाति वैष्णवा

(आसन्द्याद्यभिधानम्)

वै वनस्पतयो वैष्णवीरेव तद्रूपं धत्ते यदिष्टकाभिरग्निं चिनोतीयं वै विश्वकर्मा वैश्वकर्मणीरेव तद्रूपं धत्ते तस्मादाहुस्त्रिवृदग्निरिति तं वा एतं यजमान एव चिन्वीत यदस्यान्यश्चिनुयाद्यत्तं दक्षिणाभिर्न राधयेदग्निमस्य वृञ्जीत योऽस्याऽग्निं चिनुयात्तं दक्षिणाभी राधयेदग्निमेव तत्स्पृणोति (३) ॥

(षोढाविहितो वैष्णवीरन्यो विꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके नवमोऽनुवाकः) ।

अन्वारोहादिविषयो ह्यष्टमे समुदीरिताः ।

अथ नवम आसन्द्यादिकमभिधीयते । विष्णुमुखा वै देवा इत्यस्मिन्ननुवाके चतसृभिः सादयतीति यद्विहितं तत्र सादनाधारं विधत्ते—

सूयते वा इति । योऽयमग्निरुखायां धार्यत एषोऽग्निरन्येषामग्नीनां मध्ये सूयतेऽभिषिच्यत ईश्वरत्वं प्राप्नोतीत्यर्थः । यद्येतादृशमग्निमधो भूमौ सादयेत्तदानीं प्राणिनां गर्भा भूमौ प्रपादुकाः पतिताः स्युः। अपि च यथा लोके सवादैश्वर्यपदात्प्रत्यवरोहति भ्रश्यति तादृगेव तदधः सादनम् । तस्मादासन्दीमासादयति महत्यामासन्द्यामुख्यं स्थापयेत् । तच्च स्थापनं प्राणिगर्भधारणाय पतनराहित्याय च भवति । अपि चैनं सवमभिषिक्तमीश्वरमेव करोति । एतच्च सादनविधिसमीप एव द्रष्टव्यम् ॥

न ह स्म वै पुराऽग्निरित्यनुवाके यद्विहितं षडुद्यामं शिक्यं भवतीति तदेतदनूद्य प्रशंसति—

गर्भो वा एष इति । योऽयमुख्योऽग्निः स गर्भस्थानीयः । शिक्यं च योनिस्थानीयम् । यदि शिक्यादुखां निरूहेन्निर्गमयेद्विस्तृतेनोद्यामराहित्येनाधः पातयेदित्यर्थः। तदा योनेः सकाशाद्गर्भं निःशेषेण हतवान्भवति । अतस्तस्य-

(बहुधा चयनप्रशंसा)

रिहाराय शिक्यं षड्भिरुद्यामैरूर्ध्वंमसुतरज्जुविशेषैर्युक्तं कर्तव्यम् । लोके पुरुषः षोढाविहितः षड्भिरवयवैरुपेतः । आत्मा मध्यशरीरमेकोऽवयवः शिरो द्वितीयोवयवो द्वौ हस्तौ द्वौ पादाविति चत्वार्यङ्गानि । अतः षडुद्यामे सति षडवयवयुक्तस्वशरीर एवैनमग्निं धारयति । एतच्च वाक्यं षडुद्यामविधिसमीपे द्रष्टव्यम् ॥

एषां वा एतल्लोकानामित्यनुवाके यदुखामुपदधातीति विहितं यच्च स्वयमातृण्णामित्यनुवाक उलूखलमुपदधातीति विहितं तदुभयमत्र सह प्रशंसति—

प्रजापतिर्वा एष इति । यश्चीयमानोऽग्निरेष प्रजापतिस्वरूपस्तेन चितत्वात् । उखोलूखलयोः फलसाधनत्वात्स्तनसादृश्यम् । एतदनुष्ठानजन्यं फलं प्रजा उपजीवन्ति । एतदुपधानेन यजमानोऽपि स्वर्गे तत्फलं दुहे । एतच्चोदाहृतयोरनुवाकयोरेकत्र द्रष्टव्यम् ॥ अथोरूपधारणसमिदाधानेष्टकोपधानानि प्रशंसति—

संवत्सरो वा इति । योऽयं चीयमानोऽग्निः स एव संवत्सरधारणात्संवत्सरात्मकः । तस्य च संवत्सररूपस्याग्नेः संबन्धिन्य इष्टकास्त्रेधा विहितास्त्रिप्रकाराः संपादिताः । कास्ता इति ता उच्यन्ते—प्राजापत्या वैष्णव्यो वैश्वकर्मण्यश्च । यान्येतान्यहोरात्राणि तान्येवास्य संवत्सररूपस्याग्नेः प्रजापतिनिर्मितत्वात्प्राजापत्या द्रष्टव्याः । अथोरूपधारणेन प्राजापत्या उपहिता भवन्ति । तदेवं प्राजापत्यादिभिस्तिसृभिर्निष्पादितत्वादग्निस्त्रिगुण इत्यभिज्ञा आहुः ॥

अथोपधानकर्तारं विधत्ते—

तं वा एतमिति । यजमान एव चयनस्य कर्ता नाध्वर्युः । यद्यध्वर्युः कुर्यात्तदानीमध्वर्योर्दक्षिणाभिः परितोषाभावे सत्यग्निं नाशयेत् । अथ स्वयमशक्तोऽध्वर्युणा कारयेत्तदा तं दक्षिणाभिस्तोषयेत्तेनाग्निमेव तोषयति । यदिदं ब्राह्मणद्वयं मन्त्रव्याख्यान्ते मध्येऽवकाशाभावेन निवेशनीयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके दशमोऽनुवाकः) ।

प्रजापतिरग्निमचिनुतर्तुभिः संवत्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं

(बहुधा चयनप्रशंसा)

वर्षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन
मध्यं ब्रह्मणा वा अस्य तत्पूर्वार्धमचिनुत
क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशोत्तरं
पक्षमाशया मध्यं य एवं विद्वानग्निं चिनुत
ऋतुभिरेवैनं चिनुतेऽथो एतदेव सर्वमव (१)
रुन्धे शृण्वन्त्येनमग्निं चिक्यानमत्त्यन्नꣳ रोचत
इयं वाव प्रथमा चितिरोषधयो वनस्पतयः
पुरीषमन्तरिक्षं द्वितीया वयाꣳसि पुरीषमसौ
तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा
पुरीषं यजमानः पञ्चमी प्रजा पुरीषं यत्त्रि-
चितीकं चिन्वीत यज्ञं दक्षिणामात्मानं प्रजा-
मन्तरियात्तस्मात्पञ्चचितीकश्चेतव्य एतदेव
सर्वꣳ स्पृणोति यत्तिस्रश्चितयः (२) त्रिवृद्ध्य-
ग्निर्यद्द्वे द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो
भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति
पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति
दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव
पुरुषस्तꣳ स्पृणोत्यथो दशाक्षरा विराडन्नं
विराड्विराज्येवान्नाद्ये प्रति तिष्ठति संवत्सरो
वै षष्ठी चितिर्ऋतवः पुरीषꣳ षट्चितयो
भवन्ति षट्पुरीषाणि द्वादश सं पद्यन्ते द्वादश
मासाः संवत्सरः संवत्सर एव प्रति ति-
ष्ठति (३) ॥

(बहुधा चयनप्रशंसा)

रिहाराय शिक्यं षड्भिरुद्यामैरूर्ध्वंमसुतरज्जुविशेषैर्युक्तं कर्तव्यम् । लोके पुरुषः षोढाविहितः षड्भिरवयवैरुपेतः । आत्मा मध्यशरीरमेकोऽवयवः शिरो द्वितीयोवयवो द्वौ हस्तौ द्वौ पादाविति चत्वार्यङ्गानि । अतः षडुद्यामे सति षडवयवयुक्तस्वशरीर एवैनमग्निं धारयति । एतच्च वाक्यं षडुद्यामविधिसमीपे द्रष्टव्यम् ॥

एषां वा एतल्लोकानामित्यनुवाके यदुखामुपदधातीति विहितं यच्च स्वयमातृण्णामित्यनुवाक उलूखलमुपदधातीति विहितं तदुभयमत्र सह प्रशंसति—

प्रजापतिर्वा एष इति । यश्चीयमानोऽग्निरेष प्रजापतिस्वरूपस्तेन चितत्वात् । उखोलूखलयोः फलसाधनत्वात्स्तनसादृश्यम् । एतदनुष्ठानजन्यं फलं प्रजा उपजीवन्ति । एतदुपधानेन यजमानोऽपि स्वर्गे तत्फलं दुहे । एतच्चोदाहृतयोरनुवाकयोरेकत्र द्रष्टव्यम् ॥ अथोखाधारणसमिदाधानेष्टकोपधानानि प्रशंसति—

संवत्सरो वा इति । योऽयं चीयमानोऽग्निः स एव संवत्सरधारणात्संवत्सरात्मकः । तस्य च संवत्सररूपस्याग्नेः संबन्धिन्य इष्टकास्त्रेधा विहितास्त्रिप्रकाराः संपादिताः । कास्ता इति ता उच्यन्ते—प्राजापत्या वैष्णव्यो वैश्वकर्मण्यश्च । यान्येतान्यहोरात्राणि तान्येवास्य संवत्सररूपस्याग्नेः प्रजापतिनिर्मितत्वात्प्राजापत्या द्रष्टव्याः । अथोखाधारणेन प्राजापत्या उपहिता भवन्ति । तदेवं प्राजापत्यादिभिस्तिसृभिर्निष्पादितत्वादग्निस्त्रिगुण इत्यभिज्ञा आहुः ॥

अथोपधानकर्तारं विधत्ते—

तं वा एतमिति । यजमान एव चयनस्य कर्ता नाध्वर्युः । यद्यध्वर्युः कुर्यात्तदानीमध्वर्योर्दक्षिणाभिः परितोषाभावे सत्यग्निं नाशयेत् । अथ स्वयमशक्तोऽध्वर्युणा कारयेत्तदा तं दाक्षिणाभिस्तोषयेत्तेनाग्निमेव तोषयति । यदिदं ब्राह्मणद्वयं मन्त्रव्याख्यान्ते मध्येऽवकाशाभावेन निवेशनीयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके दशमोऽनुवाकः) ।

प्रजापतिरग्निमचिनुतर्तुभिः संवत्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं

(बहुधा चयनप्रशंसा)

वर्षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन मध्यं ब्रह्मणा वा अस्य तत्पूर्वार्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशोत्तरं पक्षमाशया मध्यं य एवं विद्वानग्निं चिनुत ऋतुभिरेवैनं चिनुतेऽथो एतदेव सर्वमव (१) रुन्धे शृण्वन्त्येनमाग्निं चिक्यानमत्त्यन्नꣳ रोचत इयं वाव प्रथमा चितिरोषधयो वनस्पतयः पुरीषमन्तरिक्षं द्वितीया वयाꣳसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषं यत्त्रि-चितीकं चिन्वीत यज्ञं दक्षिणामात्मानं प्रजा-मन्तरियात्तस्मात्पञ्चचितीकश्चेतव्यं एतदेव सर्वꣳ स्पृणोति यत्तिस्रश्चितयः (२) त्रिवृद्ध्य-ग्निर्यद्द्वे द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्तꣳ स्पृणोत्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रतितिष्ठति संवत्सरो वै षष्ठी चितिर्ऋतवः पुरीषꣳ षट्चितयो भवन्ति षट्पुरीषाणि द्वादश संपद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रति ति-तिष्ठति (३) ॥

(बहुधा चयनप्रशंसा)

(अत्र चितंयः पुरीषं पञ्चदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठ-
प्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके दशमोऽनुवाकः) ।

आसन्ग्युग्याममुख्यानि नवमे वर्णितानि हि ॥

अथ दशमे चयनं बहुधा प्रशस्यते । तत्र वसन्ताद्यृतुद्वारा प्रशंसामाह—

प्रजापतिरग्निमिति । अत्र संवत्सरो दृष्टान्तः । ऋतुभिर्यथा संवत्सरो निष्पाद्यते तथाऽग्निमप्यृतुभिः प्रजापतिरचिनुत । ऋतुमयोऽयं यज्ञ इति संकल्प एव चयनम् । तत्र वसन्तः शिरोभागः । एवं दक्षिणपक्षादयो योज्याः ॥

अथ ब्राह्मणादिरूपत्वं संकल्पेन प्रशंसति—

ब्राह्मणा वा इति । आशा मानसी तृष्णादिः[1] । अथ वेदनं प्रशंसति—

य एवं विद्वानिति । यो यजमान एवं वसन्ताद्यात्मकत्वं ब्राह्मणात्मकत्वं च विद्वांस्तथैव सर्वदा भावयन्नग्निं चिनुते स प्रजापतिवदृतुभिर्ब्राह्मणादिभिश्च चितवान्भवति । अपि चैतदृतूनां ब्राह्मणादीनां च स्वरूपं सर्वमधीनं करोति । किं चाग्निं चितवन्तमेनं यजमानं सर्वे जनाः शृण्वन्ति, अग्निचित्कपिला सत्री-त्यादिस्मृतिविषयत्वेन सर्वत्र प्रसिद्धो भवतीत्यर्थः । किं चान्नं समृद्धं स्वादु च सर्वदाऽस्ति । अपि च सर्वेभ्यो रोचते प्रीतिविषयो भवति ॥

अथ चितिपञ्चकं पुरीषपञ्चकं च भूम्यादिरूपेण प्रशंसति—

इयं वाव प्रथमेति । येयं प्रथमा चितिः सा भूमिरेव । यच्च तस्या उपरि प्रसारितं पुरीषं तदोषधिवनस्पतिस्वरूपम् । एवमुत्तरत्रापि द्रष्टव्यम् ॥

अत्र शाखान्तरगतं चितित्रयपक्षं निराकृत्य स्वकीयं चितिपञ्चकपक्षं स्थापयति—

यत्त्रिचितीकमिति । चतुर्थचितितत्पुरीषयोर्यज्ञदक्षिणारूपत्वमुक्तम् । पञ्चमचितितत्पुरीषयोर्यजमानप्रजारूपत्वम् । एवं सति त्रिचितिपक्षे यज्ञादीनामन्तरायः स्यात् । तस्मात्पञ्चचितियुक्त एवाग्निश्चेतव्यः । तथा सत्येतद्भूम्यादिकं यज्ञादिकं च सर्वमपि प्रीणयत्येव ॥

---

१ क. घ. ङ. च. तृष्णादि ।

(अष्टादशिपशुप्रथमसंघाभिधानम्)

आद्यं चितित्रयमुत्तरद्वयं च विभज्य प्रशंसति—

यत्तिस्रश्चितय इति। या एता आद्यास्तिस्रश्चितयस्ताभिरग्नेस्त्रैगुण्यं संपादितं भवति। त्रैगुण्यं च प्राजापत्यादिभिरिष्टकाभिः पूर्वमुक्तम्। ये चोत्तरे द्वे चिती ताभ्यां द्विपाद्यजमानः प्रतिष्ठितो भवति॥ अथ समूहरूपेण प्रशंसति—

पञ्च चितय इति। पुरुषस्य दशाक्षरत्वं छिद्राभिप्रायेण द्रष्टव्यम्। यानि शिरसि सप्त च्छिद्राणि ये चाधो द्वे छिद्रे या च नाभिस्तानि सर्वाणि यावज्जीवमविनाशादक्षराणीत्युच्यन्ते। एतदेवाभिप्रेत्य तत्र तत्राऽऽम्नायते—"सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ। नव वै पुरुषे प्राणा नाभिर्दशमी" इति। अतो दशसंख्यया पुरुषं साकल्येन प्रणियाति। किंच विराड्द्वाराऽन्ने प्रतितिष्ठति।

अथ षष्ठचितिं वत्पुरीषं च प्रशंसति—

संवत्सरो वा इति। अत्र सर्वत्र प्रशंसारूपत्वात्संवत्सरादिरूपतायां न विस्मेतव्यम्॥

अथ सर्वं मिलित्वा प्रशंसति—

षट्चितय इति। तदेतद्ब्राह्मणं सर्वान्ते द्रष्टव्यम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके दशमोऽनुवाकः॥ १०॥

(अथ पञ्चमाष्टके षष्ठप्रपाठक एकादशोऽनुवाकः)।

रोहि॑तो धू॒म्ररो॑हितः क॒र्कन्धु॑रोहित॒स्ते प्रा॑जा॒पत्या॒ ब॒भ्रुर॑रु॒णब॑भ्रुः शु॒कब॑भ्रु॒स्ते रौ॒द्राः श्येतः॑ श्येता॒क्षः श्येत॑ग्रीव॒स्ते पि॑तृदे॒वत्या॒स्ति॒स्रः कृ॒ष्णा व॒शा वा॑रु॒ण्य॑स्ति॒स्रः श्वे॒ता व॒शाः सौ॒र्यो॑ मै॑त्रा-बार्हस्प॒त्या धू॒म्रल॑लामास्तूप॒राः (१)॥

---

१ क. घ. ङ °ञ्चौ प्रा० न°।

(अष्टादशिपशुद्वितीयसंघाभिधानम्)

(रोहितः षड्विंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठक एकादशोऽनुवाकः) ।

चयनस्य प्रशंसाऽत्र दशमे बहुधेरिता ।
अथाष्टादशिनामानः पशवो ह्याश्वमेधिकाः ॥

अष्टादशसंख्याकानां पशूनामेकैकः संघातः । तत्रास्मिन्नेकादशेऽनुवाके प्रथमं संघमाह—'

रोहितो धूम्ररोहित इति । पूर्वप्रपाठक इन्द्राय राज्ञे सूकर इत्यादौ जातिभेदा उक्ता इह तु वर्णभेदा उच्यन्ते । रोहितो लोहितवर्णः । धूम्ररोहितोऽस्पष्टलोहितः । कर्कन्धुरोहितः सौवीरवर्णः । त एते त्रयः प्राजापत्याः प्रजापतिदेवताकाः । एवमुत्तरत्राप्येकैकस्य देवस्य त्रयस्त्रयो विज्ञेयाः । बभ्रुः पाण्डुरकपिलः । अरुणबभ्रू रक्तकपिलः । शुकबभ्रुर्हरितशुकसमानवर्णः । श्येतोऽरक्तकवर्णः, शुक्लरक्त इत्येके । श्येताक्षोऽरक्तदृष्टिः । श्येतग्रीवः प्रसिद्धः । वित्त इत्यादिकं स्पष्टम् । धूम्रललामा धूम्रवर्णपुण्ड्राः । तूपराः शृङ्गहीनाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके द्वादशोऽनुवाकः) ।

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर्वशा मैत्रिय ऐन्द्राबार्हस्पत्या अरुणललामास्तूपराः (१) ॥

(अष्टादशिषष्ठुलतीयसंघाभिधानम्)

(पृश्निः पञ्चविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके द्वादशोऽनुवाकः)।

अथ द्वितीयं संघमाह—

पृश्निस्तिरश्चीनपृश्निरिति। पृश्निः शुक्लबिन्दुचित्रश्चित्रवर्णः। तिरश्चीनपृश्निस्तिर्यक्प्रवृत्तपृश्निवर्णः। एतेनोर्ध्वपृश्निर्व्याख्यातः। कल्माषवर्णः। लोहितोर्णी लोहितलोमा। बलक्षी शुक्लावयवा। पृषती शुक्लबिन्दुभिश्चित्रा। स्थूलपृषती स्थूलशुक्लबिन्दुभिश्चित्रा। क्षुद्रपृषती सूक्ष्मशुक्लबिन्दुभिरुपेता। श्यामाः श्यामवर्णाः। रोहिणी रोहितवर्णाः। अरुणललामाः संध्यावर्णपुण्ड्राः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके त्रयोदशोऽनुवाकः)।

शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्त ऐन्द्रवायवाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः श्यामललामास्तूपराः (१)॥

(शितिबाहुः पञ्चविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अष्टादशिपशुचतुर्थसंघाभिधानम्)

(अथ पञ्चमकाण्डे षष्ठप्रपाठके त्रयोदशोऽनुवाकः) ।

तृतीयं संघमाह—

शितिबाहुरिति । शितिः शुक्लो बाह्वेकदेशो यस्यासौ शितिबाहुः । अन्यतःशितिबाहुर्यस्यैकस्य शितित्वं ततोऽन्यत्रैकदेशे शितित्वं यस्य सोऽन्यतःशितिस्तादृशो बाहुर्यस्य स तथोक्तः । समन्तशितिबाहुः सर्वशुक्लबाहुः । शितिरन्ध्रः शुक्लच्छिद्रः । अन्यतःशितिरन्ध्रसमन्तशितिरन्ध्रौ च पूर्ववत् । शुद्धवालः शुक्लपुच्छावयवः । सर्वशुक्लवालः शुक्लसर्वपुच्छः । मणिवालः शुक्लाशुक्लचितवालः । शिल्पाः नानावर्णाः । श्येन्यः शुक्लवर्णाः । श्यामललामाः श्यामवर्णपुण्ड्राः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके चतुर्दशोऽनुवाकः ।)

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः शितिककुच्छितिपृष्ठः शितिभसत्त ऐन्द्राबार्हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिध्मा वशा वैश्वकर्मण्यास्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णाः श्येतललामास्तूपराः) १) ॥

(उन्नतः पञ्चविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके चतुर्दशोऽनुवाकः) ।

अथ चतुर्थं संघमाह—

उन्नत ऋषभो वामन इति । उन्नत उन्नतपृष्ठः । ऋषभो युवा । वामनो ह्रस्वाङ्गः । शितिः शुक्लः ककुदस्य स तथोक्तः । शितिपृष्ठः श्वेतपृष्ठः । शिति-

(अष्टादशिपशुषट्कसंघाभिधानम्)

भसच्छुक्लजघनः। शितिपात्स्पष्टम्। शित्योष्ठः श्वेतोष्ठः। शितिभ्रुः श्वेतभ्रुः। सिध्माः सिध्मलाङ्गाः पादे सिताः श्वैत्याङ्कितदेहाः। पृषोदराः पृषन्त्युदरे यासां ताः पृषोदराः श्येतललामाः स्पष्टाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ पञ्चमाष्टके पञ्चदशोऽनुवाकः)।

कर्णास्त्रयो यामाः सौम्यास्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो नकुलास्तिस्रो रोहिणीस्त्र्यव्यस्ता वसूनां तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाꣳ सोमैन्द्रा बभ्रुललामास्तूपराः (१) ॥

(कर्णास्त्रयोविꣳशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके पञ्चदशोऽनुवाकः)।

पञ्चमं संघमाह--

कर्णास्त्रयो यामा इति। कर्णाश्छिन्नकर्णाः यामा यमदेवत्याः। श्वितिंगाः श्वेतपादाः। यविष्ठाय युवतमाय। नकुला नकुलवर्णाः। त्र्यव्यः सार्धवर्षाः। रोहिणीर्लोहितवर्णाः। दित्यौह्यो द्विवर्षाः। अरुणा अरुणवर्णाः। बभ्रुललामाः पिङ्गलपुण्ड्राः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके षोडशोऽनुवाकः)।

शुण्ठास्त्रयो वैष्णवा अधीलोधकर्णास्त्रयो

(अष्टादशिपञ्चसप्तमसंख्याभिधानम्)

विष्णव उरुक्रमाय लप्सुदिनस्त्रयो विष्णव उरुगायाय पञ्चावीस्तिस्र आदित्यानां त्रिवत्सास्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरललामास्तूपराः (१) ॥

(शुण्ठा विंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके षोडशोऽनुवाकः) ।

षष्ठं संघमाह--

शुण्ठास्त्रयो वैष्णवा इति । शुण्ठा अवेष्टितकर्णाः । अल्पकाया इत्येके । अधीलोधकर्णाः कर्णोपरिप्ररूढकर्णाः उरुक्रमाय विस्तीर्णपादाय । लप्सुदिनो लम्बमानपुच्छः । उरुगायायोरुभिर्महर्षिभिर्गीतव्याय । पञ्चाव्योऽर्धतृतीयवर्षाः । त्रिवत्सास्त्रिवत्सराः । गौरललामाः स्पष्टाः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके सप्तदशोऽनुवाकः) ।

इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्रायाधिराजाय त्रयः शितिककुद इन्द्राय स्वराज्ञे त्रयः शितिभसदस्तिस्रस्तुर्यौह्यः साध्यानां तिस्रः पष्ठौह्यो विश्वेषां देवानामाग्नेन्द्राः कृष्णललामास्तूपराः (१) ॥

(इन्द्राय राज्ञे द्वाविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अष्टादशिपशुनवमसंघाभिधानम्)

(अथ पञ्चमकाण्डे षष्ठप्रपाठके सप्तदशोऽनुवाकः)।

सप्तमं संघमाह—

इन्द्राय राज्ञ इति। शितिपृष्ठशितिककुच्छितिभसच्छन्दा व्याख्याताः। तुर्यौहः सार्धचतुर्वर्षाः। साध्यानां देवविशेषाणाम्। पष्ठौहश्चतुर्वर्षाः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके सप्तदशोऽनुवाकः॥ १७॥

(अथ पञ्चमाष्टके षष्ठप्रपाठकेऽष्टादशोऽनुवाकः)।

अदि॑त्यै॒ त्र॒यो॑ रोहि॒तै॒ता इ॑न्द्रा॒ण्यै त्र॒यः॑ कृ॒ष्णै॒ताः कु॒ह्वै॑ त्र॒यो॑ऽरु॒णै॒तास्ति॒स्रो धे॒नवो॑ रा॒कायै॒ त्र॒यो॑ऽन॒ड्वाहः॑ सिनीवा॒ल्या आ॑ग्नावै॒ष्ण॒वा रो॑हि॒तल॑लामास्तूप॒राः (१)॥

(अदित्या अष्टादश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठकेऽष्टादशोऽनुवाकः)।

अष्टमं संघमाह—

अदित्यै त्रय इति। एता हरिता हरितवर्णास्ते च रोहितेनान्यतरकेन युक्ता रोहितैताः। कृष्णेन युक्ताः कृष्णैताः। ईषद्रक्तेन युक्ता अरुणैताः। धेन्वादयः प्रसिद्धाः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

(अथ पञ्चमाष्टके एकोनविंशोऽनुवाकः)।

सौ॒म्यास्त्र॒यः॑ पि॒शङ्गाः॒ सोमा॑य॒ राज्ञे॒ त्र॒यः॑ सा॒र॒ङ्गाः पा॒र्जन्या॒ नभो॑रूपास्ति॒स्रो॑ऽजा म॒ल्हाः

(अष्टादशिपशुदशमसंघाभिधानम्)

इन्द्राण्यै तिस्रो मेष्य आदित्या द्यावापृथिव्या

मालङ्गास्तूपराः (१) ।

(सौम्या एकान्नविꣳशतिः) ।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां पञ्चमाष्टके

षष्ठप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठक एकोनविंशोऽनुवाकः) ।

नवमं संघमाह—

सौम्यास्त्रयः पिशङ्गा इति । पिशङ्गा गोरोचनवर्णाः । सारङ्गाः सारङ्गवर्णाः । पार्जन्याः पर्जन्यदेवत्याः । नभोरूपा अञ्जनवर्णाः । मल्हा गलस्तनाः । मालङ्गा महाकायाः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके विंशोऽनुवाकः) ।

वारुणास्त्रयः कृष्णललामा वरुणाय राज्ञे

त्रयो रोहितललामा वरुणाय रिशादसे त्रयोऽ-

रुणललामाः शिल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयः

सर्वदेवत्या ऐन्द्रासुराः श्येतललामा-

स्तूपराः (१) ॥

(वारुणा विꣳशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके

षष्ठप्रपाठके विंशोऽनुवाकः ॥ २० ॥

दशमं संघमाह—

वारुणास्त्रय इति । रिशानां लोकहिंसकानां नाशयित्रे ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(द्वंद्विपश्वभिधानम्)

(अथ पञ्चमाष्टके षष्ठप्रपाठक एकविंशोऽनुवाकः) ।

सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविन्द्राग्निभ्यामोजोदाभ्यामुष्टाराविन्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहावव्वी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायव आरोहणवाहावनड्वाहौ वारुणी कृष्णे वशे अराड्यौ दिव्यावृषभौ परिमरौ (१) ॥

(सोमाय स्वराज्ञे चतुस्त्रिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठक एकविंशोऽनुवाकः) ।

एवमेतैर्दशभिरनुवाकैरष्टादशिनः पशव आम्नाताः । अथैकेनानुवाकेन द्वंद्विनः पशूनाह—

सोमाय स्वराज्ञ इति । अनोवाहौ शकटवहनसमर्थावनड्वाहौ बलीवर्दौ । ओजोदाभ्यामष्टमधातुप्रदातृभ्यामुष्टारौ शकटवाहिनोः सहकारित्वेन पुरोगामियुगवोढारौ । सीरवाहौ लाङ्गलवाहिनावव्वी अविसदृशौ ह्रस्वावनड्वाहावित्यर्थः। भूमेर्धेनुद्वयम् । दिशां वडबाद्वयम् । पुनर्भूमेर्धेनुद्वयम् । विराड्देवतायाः पुरुषी मनुष्यस्त्रियौ । पुनर्भूमेर्धेनुद्वयम् । आरोहणवाहौ मनुष्यारोहणार्थं निर्मितं शकटं वहन्तौ बलीवर्दौ । पूर्वं तु धान्यादिवाहिशकटार्थावुक्तौ । अत्र तु राजकुमारादिविमोदार्थशकटवाहिनावित्यर्थः । वरुणस्य तु कृष्णमृगजातीये स्त्रियौ वन्ध्ये । द्युदेवतायास्त्वराड्यावुच्छ्रितशृङ्गौ । ऋषभौ सेचकौ । परिमरावुभयतो मरणयुक्तौ । यस्य पशोरग्रजोऽपि मृतोऽनुजोऽपि मृतस्तादृशौ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(क्रतुपशुविधानम्)

(अथ पञ्चमाष्टके षष्ठप्रपाठके द्वाविंशोऽनुवाकः)।

एकादश प्रातर्गव्याः पशव आ लभ्यन्ते छगलः कल्माषः किकिदीविर्विदीगयस्ते त्वाष्ट्राः सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विनस्ते विशालयूप आ लभ्यन्ते (१)॥

(एकादश पञ्चविꣳशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके द्वाविंशोऽनुवाकः)।

अथोत्तमेऽह्नि अतिरात्रेऽनुष्ठेयान्काँश्चित्पशूनाह—

एकादश प्रातर्गव्या इति । तृतीयेऽह्नि प्रातःकाले गोजातीया एकादश पशवः । ते च देवताविशेषस्यानुक्तत्वात्प्राजापत्याः । छगलादयस्त्रयस्त्वाष्ट्राः । छगलश्छागार्भकः । स च कल्माषः कृष्णवर्णामिश्रः । किकिदीविस्तित्तिरिः । विदीगयः कुक्कुटविशेषः । एते च तस्मिन्नेवाहन्यालभ्याः । सौरीः सूर्यदेवताकाः । अनूबन्ध्याश्चरमकालीनाः पशवः । ताश्च वशा वन्ध्याः श्वेताः श्वेतवर्णा नवसंख्याकाश्च भवन्ति । पुनरप्याग्नेयादयस्त्रयः पशव आलभ्यन्ते । ते च त्रयो मध्यम यूपेऽतिविस्तृतत्वाद्विशालाख्ये यूप आलभ्यन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठकेऽद्वाविंशोऽनुवाकः ॥ २२ ॥

(अथ पञ्चमाष्टके षष्ठप्रपाठके त्रयोविंशोऽनुवाकः)।

पिशङ्गास्त्रयो वासन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृ-

(ऋतुपश्वभिधानम्)

पृश्निसक्थास्त्रयो हैमन्तिका अवलिप्तास्त्रयः शैशिराः संवत्सराय निवक्षसः (१) ॥

(पिशङ्गा विꣳशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

हिरण्यवर्णा अपां ग्रहान्भूतेष्टकाः सजूः संवत्सरमुख्यं प्रजापतिः स क्षुरपविरग्नेर्वै दीक्षया सुवर्गाय तं प्रच्च सुयेतं प्रजापतिर्क्रतुभी रोहितः पृश्निः शितिबाहुरुन्नतः कर्णाः शुण्ठा इन्द्रायादित्यै सौम्या वारुणाः सोमायैकादश पिशङ्गास्त्रयोविꣳशतिः ॥ २३ ॥

हिरण्यवर्णा भूतेष्टकाश्छन्दो यत्कर्मीया३सं त्रिवृद्वेषमियं ददे वारुणाश्चतुःपञ्चाशत् ॥ ५४ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके षष्ठः प्रपाठकः ॥ ६ ॥

(अथ पञ्चमकाण्डे षष्ठप्रपाठके त्रयोविंशोऽनुवाकः)।

अथर्तुपशूनाह—

पिशङ्गास्त्रय इति । पिशङ्गा गोरोचनवर्णाः । सारङ्गाः सारङ्गवर्णाः । पृषन्तो विजातीयविन्दुयुक्ताः । पृश्नयः श्वेताः । पृश्निसक्थाः कटिभागे श्वेतवर्णाः । अवलिप्ताः संकीर्णवर्णाः वसन्ताद्य (द्या ऋ) तवस्तेषाम् । संवत्सरदेवतायास्तु निवक्षसो निम्नेन वक्षसा युक्तः ॥

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः—

कुम्भेष्टकामन्त्रणार्था हिरण्येति त्रयोदश ।
दिवीति चरुमादध्यादेवस्येत्यभिषेचनम् ॥ १ ॥
सजूराहुतयः पञ्च घृतेनेत्यनुषज्यते ।
पृष्टो वैश्वानरी योऽत्र पुरीषं स्थापयेच्चया ॥ २ ॥

---

१ क. यक्ताः । २ ख. ङ. च. याज्ञे । घ. याजे । ३ क. घ. ङ. °नया । अ° ।

(चितिस्पर्शाद्यभिधानम्)

अन्वारोहोच्चितिं स्वामी पृथिवीमाक्रमीत्यतः ।
इष्टो पशुस्तस्य ते द्वे सामिष्टयजुषी मते ॥ ३ ॥
पिता मातेतिमन्त्रेण चित्यग्निमनुशंसति ।
अश्वमेधस्य पशवो रोहिताद्या उदीरिताः ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥

(अथ पञ्चमाष्टके सप्तमः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान्भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान्भवत्याग्नेय्या गायत्रिया प्रथमां चितिमभि मृशेत्त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्च्यते वसीयान्भवतीडायै वा एषा विभक्तिः पशव इडा पशुभिरेनम् (१) चिनुते यो वै प्रजापतये प्रतिप्रोच्याग्निं चि-

(चितिस्पर्शाद्यभिधानम्)

नोति नाऽऽर्तिमार्छत्यश्वावभितास्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिणस्तावालभ्येष्टका उप दध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः साक्षादेव प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्छत्येतद्वा अह्नो रूपं यच्छ्वेतोऽश्वो रात्रियै कृष्ण एतदह्नः (२) रूपं यदिष्टका रात्रियै पुरीषमिष्टका उपधास्यञ्छ्वेतमश्वमभिमृशेत्पुरीषमुपधास्यन्कृष्णमहोरात्राभ्यामेवैनं चिनुते हिरण्यपात्रं मधोः पूर्णं ददाति मधव्योऽसानीति सौर्या चित्रवत्याऽवेक्षते चित्रमेव भवति मध्यंदिनेऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति (३) ॥

(एनमेवदह्नोऽष्टाचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ पञ्चमकाण्डे सप्तमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
उपानुवाक्यं यत्प्रोक्तं द्वयोः पञ्चमषष्ठयोः।
ततोऽवशिष्टं तत्सर्वं सप्तमेऽत्राभिधीयते ॥ २ ॥

तत्राऽऽदौ तावन्मन्त्रविशेषैश्चितीनामभिमर्शनं विधत्ते—

यो वा अयथेति । यस्याश्चितेर्या देवता तामतिक्रम्य चयनमयथादेवतमनतिक्रमणं यथादेवतम् । अतो यथादेवतमनुष्ठानायाऽऽग्नेयगायत्र्यादिभिस्तां तां चितिमभिमृशेत् । अग्ने देवाꣳ इहाऽऽ वहेत्याग्नेयी गायत्री । अगन्म महा मनसा यविष्ठमिति त्रिष्टुप् । मेधाकारमिति जगती । मनुष्वत्त्वा निधीमहीत्यनुष्टुप् अग्निर्हि वाजिनमिति पङ्क्तिः । ता एता नाचिकेतचयनप्रकरणे यत्ते चितमित्यनुवाके समाम्नास्यमानत्वात्तत्रैव व्याख्यास्यन्ते । एवमभिमर्शने सति नोक्तदोषः कश्चिदप्यस्ति ।

एकैकचितिस्पर्शने योऽयं मन्त्रविभागस्तमिमं प्रशंसति—

इडायै वा इति । विभक्तिर्गायत्र्यादिमन्त्रविभागः । स चात्रेडार्थं क्रियते । इडा हि नाम पशवः, पशवो वा इडेति श्रुत्यन्तरात् । गायत्र्यादिच्छन्दांसि च पशुस्वरूपाणि । पशवो वै छन्दाꣳसीति श्रुत्यन्तरात् । अतो गायत्र्यादिरूपैः पशुभिरेनमग्निं चितवान्भवति । एतच्च ब्राह्मणं पशुर्वा एष यदग्निरित्यनुवाके प्रथमचित्यवसाने द्रष्टव्यम्। अथोपधानेऽश्वस्पर्शनं विधत्ते—

यो वै प्रजापतय इति । प्रजापतिरग्निं प्रति स्रष्टृत्वात्प्रथमं चेतृत्वाच्चाग्नेः स्वामी । अतस्तस्मै कथयित्वा तदनुज्ञया चयने कृते सति न विनाशं प्राप्नोति । अतः कथनीयम् । पार्श्वयोर्द्वावश्वाववस्थाप्य तौ स्पृष्ट्वा पश्चादुपदध्यात् । एतदश्वाख्यं शरीरं प्रजापतेः स्वरूपं, प्रजापत्यक्षिजन्यत्वेन तस्य प्राजापत्यत्वात् । अतोऽश्वस्पर्शनमेव प्रजापतये कथनं तेनासौ न विनश्यति ।

तत्र स्पर्शने विषयव्यवस्थां विधत्ते—

एतद्वा अह्नो रूपमिति । श्वेतोऽश्व इष्टकाश्चेत्युभयमह्नो रूपम् । अत इष्टका उपधास्यञ्श्वेतमभिमृशेत् । कृष्णोऽश्वः पुरीषं चेत्युभयं रात्रेः स्वरूपम् । तत्स्वरूपे वर्णसाम्यं हेतुः । यदा पुरीषमुपधास्यति तदा कृष्णमभिमृशेत् । एवं सत्यहोरात्राभ्यामेवैनमग्निं चितवान्भवति । एतच्च ब्राह्मणमग्ने तव श्रवो वय इत्यनुवाके द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—" दक्षिणाकाले हिरण्यपात्रं मधोः पूर्णं शतमानस्य कृतं चित्रं देवानामित्यवेक्ष्याश्वेनावघ्राप्य ब्रह्मणे ददाति " इति, तत्र दानं विधत्ते—

हिरण्यपात्रमिति । परलोके मधुभाग्यद्रव्ययुक्तो भविष्यामीत्यभिप्रेत्य मधुना पूर्णं सुवर्णपात्रं दद्यात् । दाता च दानात्पूर्वकालीनमवेक्षणं विधत्ते—

(ऋषभेष्टकाभिधानम्)

सौर्या चित्रवत्येति। मध्याह्नस्य दक्षिणाकालत्वात्तदानीं दातुर्मार्द्रो मधुपूर्णं पात्रं मन्त्रेणावेक्षेत। चित्रं देवानामित्येषा सौरी चित्रशब्दयुक्ता च। तयाऽवेक्षणे सति चित्रमेवैश्वर्यं प्राप्नोति। अवेक्षणादूर्ध्वं घ्रापणं विधत्ते—

अश्वमव घ्रापयतीति। योऽयं चित्रवत्या प्रतिपाद्य आदित्यः स एव परमैश्वर्योपेतत्वादिन्द्रः, प्रजानां परिपालकत्वात्प्रजापतिः। अवघ्रातोऽश्वः प्राजापत्यः। अतोऽश्वावघ्रापणेन तं प्रजापतिमिन्द्रमादित्यमेव साक्षात्समृद्धं करोति। तदिदं ब्राह्मणमन्त्रे द्रष्टव्यम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः)।

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम्। अस्थूरिणो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा सꣳ शिशाधि। पशवो वा एते यदिष्टकाश्चित्यांचित्यामृषभमुप दधाति मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय तस्माद्यूथेयूथ ऋषभः। संवत्सरस्य प्रतिमां यां त्वा राञ्युपासते। प्रजाꣳ सुवीरां कृत्वा विश्वमायुर्व्यश्नवत्। प्राजापत्याम् (१) एतामुप दधातीयं वावैषैकाष्टका यदेवैकाष्टकायामन्नं क्रियते तदेवैतयाऽव रुन्ध एषा वै प्रजापतेः कामदुघा तयैव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे येन देवा ज्योतिषोर्ध्वा उदायन्येनाऽऽदित्या वसवो येन रुद्राः। येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति। सुवर्गाय

वा एष लोकाय (२) चीयते यद॒ग्निर्येन देवा ज्योतिषोर्ध्वा उ॒दाय॒न्नित्यु॒ख्यꣳ समिन्ध इष्टका एवैता उप॑ धत्ते वानस्प॒त्याः सु॑वर्गस्य लोक॑स्य सम॑ष्ट्यै श॒तायु॑धाय श॒तवी॑र्याय श॒तोत॑येऽभि- मा॒तिषाहे॑ । श॒तं यो नः श॒रदो॒ अजी॑ता॒निन्द्रो॑ नेषदति॑ दु॒रिता॒नि विश्वा॑ । ये च॒त्वारः॑ प॒थयो॑ दे॒वयाना॑ अन्त॒रा द्यावा॑पृथि॒वी वि॒यन्ति॑ । तेषा॒ं यो अज्या॑निम॒जीति॑मा॒वहा॒त्तस्मै॑ नो दे॒वाः (३) परि॑ द॒त्तेह सर्वे॑ । ग्री॒ष्मो हे॑म॒न्त उ॒त नो॑ व॒सन्तः॑ श॒रद्व॒र्षाः सु॑वि॒तं नो॑ अस्तु । तेषा॑- मृ॒तूना॑ꣳ श॒तशा॑रदानां निवा॒त ए॑षा॒मभ॑ये स्याम । इ॒दु॒व॒त्स॒राय॑ परिवत्स॒राय॑ संवत्स॒राय॑ कृणुता बृ॒हन्नमः॑ । तेषा॑ं व॒यꣳ सु॑म॒तौ य॒ज्ञिया॑ना॒ं ज्योग॑- जी॒ता अहताः स्याम । भ॒द्रान्नः॒ श्रेयः॒ सम॑- नैष्ट दे॒वास्त्वया॑ऽव॒सेन॒ सम॑शीमहि त्वा । स नो॑ म॒यो॒भूः पि॑तो (४) आ वि॑श॒स्व॒ शं तो॒काय॑ त॒नुवे॑ स्यो॒नः । अज्या॑नि॒रे॒ता उप॑ दधात्ये॒ता वै दे॒वता॒ अप॑राजिता॒स्ता ए॒व प्र वि॑शति॒ नैव जीय॑ते ब्रह्मवादिनो॑ वद॒न्ति यद॑र्धमा॒सा मासा॑ ऋ॒तव॑ः संवत्स॒र ओष॑धीः प॒चन्त्य॒थ कस्मा॑द॒- न्याभ्यो॑ दे॒वता॑भ्य आग्रय॒णं निरु॑प्यत॒ इत्ये॒ता हि त॒द्दे॒वता॑ उ॒दज॑यन्य॒दृ॒तुभ्यो॑ नि॒र्वपे॑द्दे॒वता॑भ्यः सम॑दं द॒ध्यादा॑ग्रय॒णं नि॒रुप्यै॒ता आहु॑तीर्जुहो- त्यर्ध॒मा॒सा॒नेव॒ मासा॑नृ॒तून्त्संवत्स॒रं प्री॑णाति॒ न

(ऋषभेष्टकाद्यभिधानम्)

देवताभ्यः समदं दधाति भद्रान्नः श्रेयः सम-
नैष्ट देवा इत्याह हुताद्याय यजमानस्यापं-
राभावाय (५) ॥

(प्राजापत्यां लोकायं देवाः पितो दध्यादाग्रयणं पञ्चविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तम-
प्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके द्वितीयोऽनुवाकः) ।

चितिस्पर्शादिकं त्वाद्येऽनुवाकेऽत्र समीरितम् ।

अथ द्वितीये ऋषभेष्टकादिकमभिधीयते । यदुक्तं सूत्रकारेण—" त्वामग्ने वृषभमित्यृषभमुपधाय " इति, तदिदं विधातुं मन्त्रमुत्पादयति—

त्वामग्ने वृषभमिति । हेऽग्ने वृषभं कामानां वर्षितारं चेकितानं सर्वज्ञं युवानं नित्यतरुणं त्वां जनयन्प्रजोत्पादकं कुर्वन्नहं पुनरुपागां भूयो भूयः प्राप्नोमि । नोऽस्माकं गार्हपत्यानि गृहपतिकर्माण्यस्थूरि सन्तु । स्थूरिशब्दः सारवाची । अस्थूरीणि साररहितानि सन्तु । विग्मेनोज्ज्वलेन ब्रह्मणा ब्रह्मवर्चसेन नोऽस्मान्संशिशाधि सम्यगनुशिष्टान्कुरु । एतन्मन्त्रसाध्यमुपधानं विधत्ते—

पशवो वा इति । या एता अन्या इष्टकास्ताः सर्वा गोरूपाः । अतो यज्ञे तासां मिथुनभावायैतामृषभाख्यामिष्टकामुपदध्यात् । यस्मादत्रै [कै] कस्यां चित्यामृषभमु (उ) पधीयते तस्माल्लोकेऽप्येकैकस्मिन्गोयूथ एकैक ऋषभस्तिष्ठति । सर्वचितिष्वपेक्षितत्वादिदं ब्राह्मणं प्रथमचित्यन्ते द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—' संवत्सरस्य प्रतिमामिति प्राजापत्याम् ' इति, तदिदं विधातुं मन्त्रमुत्पादयति—

संवत्सरस्येति । हे रात्रि एकाष्टकारूपे यां त्वा प्रतिमां प्रतिनिधिरूपां सर्वे यजमाना उपासते सेवन्ते, ' एषा वै संवत्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एतां रात्रिं वसति ' इति ह्यन्यत्राऽऽम्नातम् । तां त्वां कृत्वेहोपधाय सुवीरां शोभनभृत्योपेतां प्रजां पुत्रादिरूपां विश्वमायुः कृत्स्नमप्यायुष्यं व्यश्नवद्विशेषेण व्याप्नोति । एतन्मन्त्रसाध्यमुपधानं विधत्ते—

प्राजापत्यामिति । एकाष्टकायाः संवत्सररूपप्रजापतिपत्नीत्वात्तद्रूपेयमि-

ष्टका प्राजापत्या, तामेतामुपदध्यात् । एषा चैकाष्टकेयमेव भूमिस्वरूपा । तथा सति भूमिरूपायामेतस्यामेकाष्टकायां यदन्नं संपाद्यते तत्सर्वं प्राप्नोति । किंचे-यमेकाष्टका संवत्सररूपस्य प्रजापतेः कामधेनुः । अतस्तयैव यजमानोऽमुष्मि-ल्लोके [अग्निं] कामान्दुहे दुग्धे । एतच्च नक्षत्रेष्टकाब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—“ येन देवा ज्योतिषोर्ध्वा उदायन्निति प्रादेशमात्रैः काष्ठैरुलूखमुपसमिन्धे ” इति, तदिदं विधातुं मन्त्रमुत्पादयति—

येन देवा ज्योतिषेति । देवाः सर्वे येन ज्योतिषाऽग्निनोर्ध्वा उपरितनलो-कवर्तिन उदायन्नुत्कर्षं प्राप्ताः । तथाऽऽदित्याः वसवश्च येनोदायन्रुद्राश्च येनाग्निनोदायन्, अङ्गिरसो महर्षयो येनाग्निना महिमानमानशुः स्वकीयं सामर्थ्यं प्राप्तास्तेनाग्निना यजमानोऽयं स्वस्ति क्षेममेतु प्राप्नोतु ।

तमिमं मन्त्रं विनियुङ्क्ते—

सुवर्गाय वा एष इति । अस्याग्नेः स्वर्गार्थं चीयमानत्वात्स्वर्गस्थसर्वदेवप्र-तिपादकेन मन्त्रेणेन्धने सति याभिः समिद्भिरिध्यते ताः सर्वा वानस्पत्या इष्टका एवोपहिता भवन्ति । तच्च स्वर्गप्राप्त्यै संपद्यते । एतच्च “विष्णुमुखा वै देवाः” इत्यनुवाके द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—“ शतायुधाय शतवीर्यायेति पञ्चाज्यानीः प्रतिदिशमेकां जुहोति ” इति, तत्र प्रथमामाह—

शतायुधायेति । य इन्द्रो नोऽस्माञ्शतं शरदः शतसंख्याकान्संवत्सरान-जीवाञ्जीवतोऽपि व्याधितस्करादिना यथा जिताः पीडिता न भवन्ति तथा नेतुं समर्थः । किं कृत्वा, विश्वा दुरितान्यति सर्वाणि पापान्यतिक्रम्य यानि पापान्यस्मा-भिः कृतानि तानि सर्वाणि विनाश्य । सर्वेभ्यश्चाप्यायुष्य-स्मान्केनाप्यनुपद्रुतान्करोतीत्यर्थः । तस्मा इन्द्राय नमोऽस्त्वित्यध्याहारः । की-दृशाय, शतसंख्याकान्यायुधानि वज्रधनुरादीनि यस्यासौ शतायुधस्तस्मै । शत-संख्याकानि वीर्याणि युद्धेषु विजयरूपाणि यस्यासौ शतवीर्यस्तस्मै । शतसं-ख्याका ऊतयोऽस्मद्रक्षणानि यस्यासौ शतोतिस्तस्मै । अभिमातिषाहे[अभिमाति]पाप्मानं सहतेऽभिभवतीत्यभिमातिषाट् तस्मै । अथ द्वितीयामाह—

ये चत्वारः पथय इति । द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्ये ये चत्वारः पथयो मार्गा वियन्ति विविधं गच्छन्ति प्रवर्तन्ते । कीदृशा मार्गाः, देवयाना देवानां यानं गमनं येषु ते देवयानाः । देवा हि देवलोकपितृलो-

(ऋषभेष्टकाद्यभिधानम्)

कब्रह्मलोकमनुष्यलोकविषयेषु मार्गेषु विस्रम्भेण संचरन्ति । तेषां मार्गाणां य इन्द्रोऽज्यानिमजीतिमावहात्, रक्षःप्रभृतिभिरनुपद्रवोऽजीतिः । सा चाजीति-रज्यानिः कदाचिदपि हानिरहिता, तादृशीमजीतिमावहति तेषु मार्गेषु गच्छता-मस्माकं नित्यमनुपद्रवं संपादयतीत्यर्थः । तस्मा इन्द्राय हे सर्वे देवा इह कर्मणि नोऽस्मान्परिदत्तायं यजमानः सर्वेषु मार्गेषु रक्षणीय इत्येवमस्मानिन्द्राय सम-र्पयत । अथ तृतीयामाह—

ग्रीष्मो हेमन्त इति । यो ग्रीष्माख्य ऋतुः स नोऽस्मान्प्रति सुवितमस्तु शोभनगतिं प्राप्नोतु । स्वकालोचितभोग्यद्रव्यप्रदोऽस्त्वित्यर्थः । एवं हेमन्तादिषु योज्यम् । शतशारदानामस्मदायुषि शतसंवत्सरसंबन्धिनां तेषामेषां ग्रीष्मादीना-मृतूनामनुग्रहाद्वयं निवाते वाताद्युपद्रवरहितेऽभये भयरहिते स्थाने स्याम सुखे-नावस्थिता भवेम । अथ चतुर्थीमाह—

इदुवत्सरायेति । प्रभवादिसंवत्सराणां पञ्चके चतुर्थ इदुवत्सरः । द्वितीयः परिवत्सरः। प्रथमः संवत्सर एतच्च तत्पञ्चकात्स्याप्युपलक्षणम् । हे ऋत्विग्यजमाना इदुवत्सरादिरूपाय कालाय बृहन्मयः कृणुतात्यन्तभक्तिपुरःसरं नमस्कारं कुरुत । यज्ञियानां यज्ञनिष्पादकानां तेषां संवत्सरविशेषाणां सुमतावनुग्रहबुद्धौ सत्यां वयं सर्वे ज्योक्चिरमजीताः केनाप्यवशीकृता अहता अमारिताश्च स्याम भवेम ।

अथ पञ्चमीमाह—

भद्रान्नः श्रेय इति । हे देवा भद्रात्कल्याणादस्मत्कर्मसाधनभूताच्छ्रे-योऽधिकं प्रशस्तं फलं नोऽस्मान्समनैष्ट सम्यक्प्रापयत । तथा चित्याग्नौ हूय-मान हे सोम त्वयाऽवसेन त्वदीयेन रक्षणेन वयं त्वां समशीमहि सम्यग्व्याप्नु-याम । हे पितो अग्रभूत सोम स त्वं मयोभूः सुखस्य भावयिता सन्नोऽस्माना-विशस्व प्रविश, तोकायास्मदपत्याय शं सुखं कुरु, तनुवे शरीराय स्योनः सुखप्रदो भव ।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

अज्यानीरेता इति । अज्यानिशब्दोपेतैर्मन्त्रैरुपधेया इष्टका अज्यानयस्ता [एता] उपदध्यात् । एतैर्मन्त्रैः प्रतिपाद्या या इन्द्रादिदेवता एताः सर्वा देवताः काप्यपराजिताः । अयं यजमानस्ता एव देवताः प्रविशति, केनाप्य-न्येनं शत्रुणा नैव जीयते । एतदपि नक्षत्रेष्टकाब्राह्मणसमीपे द्रष्टव्यम् ।

अथाऽऽग्रयणप्रस्तावे यदुक्तं सूत्रकारेण—'निरुप्तं हविरुपसन्नमप्रोक्षितं भवत्यथ पञ्चाज्यानीर्जुहोति शतायुधाय शतवीर्यायेति' इति, तदिदं विधत्ते—

ब्रह्मवादिनो वदन्तीति। ब्रह्मवादिनः परस्परमेवं विचारयन्ति—अर्धमासमासर्तुसंवत्सररूपा देवता ओषधीनां परिपाकं संपादयन्ति। एवं सति ता देवता उपेक्ष्यान्याभ्य इन्द्राग्न्यादिभ्यो देवताभ्य आग्रयणाख्यं नूतनधान्यरूपं हविः कस्मात्कारणान्निरुप्यत इति। तत्राभिज्ञा एवमुत्तरमाहुः—यस्मादेता इन्द्राग्न्यादयो देवता इतरैर्दैवतैः सह समयं कृत्वा तत्र तत्रौषधिविषय उत्कर्षेण जयं प्राप्ताः, तस्मादिन्द्राग्न्यादिभ्यो निर्वापो युक्तः। एतच्च राजसूयप्रकरण आग्रयणविधौ स्पष्टमाम्नातम्—'देवा वा ओषधीष्वाजिमयुः। ता इन्द्राग्नी उदजयताम्'। इति। एवं सति जेतॄनिन्द्राग्न्यादीनुपेक्ष्य यद्यृतुमासादिदेवताभ्यो निर्वपेत्तदानीमेतासां तासां च देवतानां कलहं संपादयेत्। एवं तर्ह्योषधिपरिपाकहेतूनामृतुमासादिदेवतानां परितोषः कथमिति चेच्छ्रूयताम्। इन्द्राग्न्यादिभ्य आग्रयणं निरुप्य शतायुधायेत्येता अन्यान्याहुतीर्मासादिदेवताभ्यो जुहुयात्। तेनार्धमासादिदेवताः प्रीणयति; ततो देवतानां कलहं न करोति। यदपि सूत्रकारेणाऽऽग्रयणप्रस्तावे विहितं 'भद्रान्नः श्रेयः समनैष्ट देवा इति यजमानभागं प्राश्नाति, इति, तं विधिं मन्त्रव्याख्यानरूपार्थवादेनोन्नयति—

भद्रान्नः श्रेय इति। यजमानो भक्षणकाले भद्रादित्यादिमन्त्रं पठेत्। अयं च मन्त्रो हुतशेषस्यादनाय समर्थः। अशीमहीतिमन्त्रलिङ्गात्। हुतभक्षणेन यजमानः पराभूतो न भवति। एतच्च ब्राह्मणमाग्रयणविधिसमीपे नेतव्यम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके

द्वितीयोऽनुवाकः॥ २॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः)।

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः। यो नः पुरस्ताद्दक्षिणतः पश्चादुत्तरतोऽघायुरभिदासत्येतꣳ सोऽश्मानमृच्छतु।

(वज्रिणीष्टकोपधानविधिः)

देवासुराः संयत्ता आसन्तेऽसुरा दिग्भ्य आऽबाधन्त तान्देवा इष्वा च वज्रेण चापानुदन्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षुप (१) दधाति देवपुरा एवैतास्तनूपानीः पर्यूहतेऽग्नाविष्णू सजोषसे मा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् । ब्रह्मवादिनो वदन्ति यन्न देवतायै जुह्वत्यथ किंदेवत्या वसोर्धारेत्यग्निर्वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धाराऽऽग्नावैष्णव्यर्चा वसोर्धारां जुहोति भागधेयेनैवैनौ समर्धयत्यथो एताम् (२) एवाऽऽहुतिमायतनवतीं करोति यत्काम एनां जुहोति तदेवाव रुन्धे रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोराऽन्या शिवाऽन्या यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति यद्वसोर्धारां जुहोति यैवास्य शिवा तनूस्तां तेन प्रीणाति यो वै वसोर्धारायै (३) प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन्ब्रह्मौदनं पचेत्तं ब्राह्मणाश्चत्वारः प्राश्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायामेवैनां तनुवां प्रति ष्ठापयति चतस्रो धेनूर्दद्यात्ताभिरेव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे (४) ॥

(उपैतां धारायै षट्चत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः) ।

द्वितीय ऋषभादीनामुपधानादिकं श्रुतम् ।

अथ तृतीये वज्रिणीष्टकोपधानं विधातुं मन्त्रानुत्पादयति—

इन्द्रस्य वज्रोऽसीति । इष्टकास्थानीय हेऽश्मंस्त्वमिन्द्रस्य वज्रोऽसि वज्रसमानोऽसि । कीदृशस्त्वं, वार्त्रघ्नो वैरिघाती, नोऽस्माकं तनूपाः शरीरस्य पालकः, प्रतिस्पशो रोगाद्यनिष्टस्य विनाशयिता । किंच, यः शत्रुरयं पापमस्मदुपद्रवमिच्छतीत्यघायुस्तथाविधः सन्पुरस्तात्पूर्वस्यां दिशि नोऽस्मानभिदासति हिनस्ति स शत्रुरेतमस्मानमुपधीयमानं पाषाणमृच्छतु प्राप्नोतु, पाषाणं प्राप्य स्वयमेव व्याधितो भवत्वित्यर्थः । दक्षिणत इत्यादिभिस्त्रिभिः पर्यायैर्मन्त्रा भिद्यन्ते । तेषु त्रिष्वप्यवशिष्टमनुषञ्जनीयम् । तैरेतैश्चतुर्भिर्मन्त्रैः साध्यमुपधानं विधत्ते—

देवासुराः संयत्ता इति । यदा देवासुरा युद्धोद्यतास्तदानीमसुराश्चतसृभ्यो दिग्भ्य आगत्य सर्वतो बाधितवन्तः । तानसुरान्देवा इष्वा वज्रसदृशेन पाषाणेन चापानुदन्त । ततो यजमानो भ्रातृव्यापनोदनाय वज्रिणीरुपदध्यात् ।

तस्य चोपधानस्य चितेर्बहिर्देशं विधत्ते—

दिक्षूप दधातीति । या एता वज्रिण्यस्ता देवपुरा एव देवानामिन्द्रादीनां पुरस्थानीया एव । तनूपानीरस्मच्छरीरस्य पालयित्रीः । एतादृशीः परिवः स्थापयति । एतदपि नक्षत्रेष्टकाब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

यत्पूर्वं विहितं वसोर्धारां जुहोतीति, तदेतदनूद्य विशेषं वक्तुमाम्नातमपि मन्त्रं पुनः पठति—

अग्नाविष्णू इति । हेऽग्नाविष्णू इमा गिरोऽस्माभिः प्रयुक्ताः स्तुतिरूपा वाचः सजोषसा वां परस्परं समानप्रीतियुक्तौ युवां वर्धन्तु परितोषयन्तु । युवां च द्युम्नैर्धनैर्वाजेभिरन्नैश्च सहितावागतमिहाऽऽगच्छतम् । तमिमं मन्त्रं विनियुङ्क्ते—

ब्रह्मवादिनो वदन्तीति । अत्र ब्रह्मवादिन एवं विचारयन्ति—वसोर्धाराया मन्त्रे वाजश्च मे प्रसवश्च म इत्येवं फलप्रार्थनैव प्रतीयते, न तु काचिद्देवता

(वज्रिणीष्टकोपधानविधिः)

प्रतिपाद्यते। विधिवाक्येऽप्याज्यधारारूपं द्रव्यमेव प्रतीयते, न तु काचिद्देवता। एवं सति होतारो देवताये यस्मान्न जुह्वति तस्मात्किंदेवत्येयं वसोर्धारेत्येवं प्रश्नः। तत्राभिज्ञा उत्तरमेवमाहुः—विधिवाक्यगतेन वसुधा(सोर्धा)राशब्देनैव द्रव्यदेवतासंबन्धः प्रतीयते। वासयतीति व्युत्पत्त्या वसुरग्निस्तस्येयमाज्यधारा वसोर्धारा। एवं विष्णावपि योज्यम्। यद्यप्येतौ देवौ वाजश्च म इत्यादिना न प्रतीयते तथाऽप्यनयर्चा प्रतीयेते। तस्माद्देवतया वसोर्धारां जुहुयात्। तथा सत्युचितेन भागेनैतौ तोषयति। अपि चैतामाहुतिं देवतारूपाधारवतीं करोति। किं च, यत्फलं कामयित्वा जुहोति तत्प्राप्नोति। प्रकारान्तरेणैतां प्रशंसति—

रुद्रो वा एष इति। शतरुद्रीयहोमेनोग्रतनोः शान्तावपि शिवा(व)तनोः प्रीत्यर्थोऽयं वसोर्धाराहोम इत्यस्य प्रशंसा। यं विशेषं विधातुमयं प्रस्तावः कृतस्तं विशेषं विधत्ते—

यो वै वसोरिति। यो यजमानो वसोर्धारायाः प्रतिष्ठाप्रकारं वेद स प्रतितिष्ठत्येव। काऽसौ तस्याः प्रतिष्ठेत्युच्यते—होमावशिष्ट आज्ये ब्रह्मौदनं पक्त्वा ब्राह्मणानां प्राशनं यत्सैव प्रतिष्ठा। ब्राह्मणस्य सर्वपुरुषप्रियत्वेन वैश्वानररूपत्वाद्वैश्वानरस्य चाग्निप्रियशरीरत्वात्तस्मिन्नेव प्रियशरीरे तमग्निं प्रतिष्ठापयति। यदुक्तं सूत्रकारेण—"यदाज्यमुच्छिष्येत तस्मिन्ब्रह्मौदनं पक्त्वा चतुरो ब्राह्मणान्भोजयेच्चतुःशरावं वौदनं पक्त्वा तद्दध्यन्नं भोजयेत्प्राशितवभ्द्यश्चतस्रो धेनूर्दद्यात्" इति, तच्च दानं विधत्ते—चतस्रो धेनूरिति।

अत्र मीमांसा।

तृतीयाध्यायस्य षष्ठपादे द्वादशाधिकरणे चिन्तितम्—

अस्वण्डादीष्टकाधर्माश्चित्रिण्यादिषु नोचिताः।
सन्ति वा वाक्यमध्यत्वानारभ्योक्तं ततो न ते॥
प्रकृतापूर्वसंबन्धात्तादृशादपि वाक्यतः।
अस्वण्डत्वादयोऽप्यस्याश्चित्रिण्यादिषु सन्ति ते॥

अथारभ्य श्रूयते—"चित्रिणीरुपदधाति" इति, 'वज्रिणीरुपदधाति' इति च। अग्निप्रकरणे चेष्टकानां धर्माः श्रुताः—'अस्वण्डामकृष्णां कुर्यात्' इति। पूर्वमांधदाभ्ययोरुत्पत्तिवाक्यस्यानारभ्याधीतत्वेऽपि विनियोगवाक्यं

१ ख. घ. ङ. च. °राज्ञमोद°।

प्रकरणाधीतम्। तच्च चित्रिण्यादिनामकानामिष्टकाविशेषाणां विनियोजकं वाक्यमप्यनारभ्याधीतम्। तच्च चित्यन्तरे ताश्चित्रिणीर्विनियुङ्क्ते। अखण्डत्वादिधर्मास्तु षण्णां चितीनां मध्ये प्रथमचितावाम्नाताः। तस्मात्ते चित्रिण्यादिषु नोचिता इति प्राप्ते ब्रूमः—यद्यप्युत्पत्तिविनियोजकवाक्ययोरन्यतरस्यापि प्रकरणपाठो नास्ति तथाऽपि 'य एवं विद्वानग्निं चिनुते' इति प्रकृतं यदेतदग्न्यपूर्वं तत्संबन्धित्वेनैव चित्रिण्यादयोऽप्यप्रकरणपठितेनापि वाक्येन विनियुज्यन्ते। अखण्डत्वादयश्चाग्निसाधनभूतेष्टकाधर्मा न तु प्रथमचितिधर्माः। तस्मादग्निसाधनभूतासु चित्रिण्यादीष्टकास्वपि ते सन्ति।

पञ्चमाध्यायस्य तृतीयपादे सप्तमाधिकरणे चिन्तितम्—

चित्रिण्यादेरुत्तमायामुपधानं पुराऽथवा।
अव्यवायादुत्तमायां मध्यमायां तु वाक्यतः॥

उत्तमायां पञ्चम्यां चितौ चित्रिण्यादेरनारभ्याधीताया इष्टकाया उपधानं युक्तम्। तथा सति प्रकरणाधीतानां क्लृप्तक्रमाणामिष्टकानां परस्परव्यवधानं न प्रसज्येतेति चेन्मैवम्। 'यां कांचिद्ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितौ' इति वाक्येनानारभ्याधीतेन ब्राह्मणेन विहितानामिष्टकानां मध्यमचितौ निवेशः। तत्रैवान्यच्चिन्तितम्—

लोकंपृणात ऊर्ध्वं स्याच्चित्रिण्युत ततः पुरा।
बादरायणदृष्टयोर्ध्वं पूर्णोक्तेस्ततः पुरा॥

"चित्रिणीरुपदधाति' 'वज्रिणीरुपदधाति' 'भूतेष्टका उपदधाति' इति विहितं चित्रिण्यादिकं मध्यमायां चितौ लोकंपृणाभिधाया इष्टकाया ऊर्ध्वमुपधेयम्। कुतः। बादरायणेन तथा दृष्टत्वात्। 'अन्ते तु बादरायणः' [मी० ५-२-१९] इति सूत्रेण बादरायणस्य मतमुपन्यस्तम्। स ह्यागन्तूनामन्ते निवेशमाह। लोकंपृणा च प्रकरणपठितानामन्तिमेष्टका। ततस्तस्या ऊर्ध्वं चित्रिण्यादिकामिति प्राप्ते ब्रूमः—लोकं पृण छिद्रं पृणेत्यनेन मन्त्रेणोपधीयमानेष्टका लोकंपृणा। तस्याः कर्मण्यूनत्वादिदोषपरिहारेण संपूर्तिहेतुत्वं मन्त्रलिङ्गादवगम्यते। ब्राह्मणेऽप्येवमाम्नातम्—'यदेवास्योनं यच्छिद्रं तदेतया परिपूरयति लोकं पृण छिद्रं पृण' इति। यद्येतस्या इष्टकाया ऊर्ध्वं

१ क. 'मन्यून'।

(होमविशेषाणां राष्ट्रभृदिष्टकानां चाभिधानम्)

चित्रिण्यादय उपधीयेरंस्तदानीं चित्रिण्यादिगते ऊनत्वाच्छिद्रत्वे न पूर्येयाताम् । तस्माल्लोकंपृणातः पूर्वं चित्रिण्याद्युपधानम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः) ।

चित्तिं जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाऽऽहुतिर्वैश्वकर्मणी नैनं चिक्याने भ्रातृव्यो दभ्नोत्यथो देवता एवाव रुन्धेऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्याऽऽहुत्या यज्ञमुखमा रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाव रुन्धेऽग्निर्देवेभ्योऽपाक्रामद्भागधेयम् (१) इच्छमानस्तस्मा एतद्भागधेयं प्रायच्छन्नेतद्वा अग्नेरग्निहोत्रमेतर्हि खलु वा एष जातो यर्हि सर्वश्चितो जातायैवास्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान्भवति ब्रह्मवादिनो वदन्ति यदेष गार्हपत्यश्चीयतेऽथ क्वास्याऽऽहवनीय इत्यसावादित्य इति ब्रूयादेतस्मिन्हि सर्वाभ्यो देवताभ्यो जुह्वति (२) य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोत्यग्ने यशस्विन्यशसेममर्पयेन्द्रावतीमपचितीमिहाऽऽवह । अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु ।

(होमविशेषाणां राष्ट्रभृदिष्टकानां चाभिधानम्)

भद्रं पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः । ततः क्षत्रं बलमोजश्च जातं तद्स्मै देवा अभि सं नमन्तु । धाता विधाता परमा (३) उत संदृक्प्रजापतिः परमेष्ठी विराजा । स्तोमाश्छन्दाꣳसि निविदो म आहुरेतस्मै राष्ट्रमभि सं नमाम । अभ्यावर्तध्वमुप मेत साकमयꣳ शास्ताऽधिपतिर्वो अस्तु । अस्य विज्ञानमनु सꣳ रभध्वमिमं पश्चादनु जीवाथ सर्वे । राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चितीं राष्ट्रभृत्तयैवास्मिन्राष्ट्रं दधाति राष्ट्रमेव भवति नास्माद्राष्ट्रं भ्रꣳशते (४) ।

(भागधेयं जुहोति परमा राष्ट्रं दधाति सप्त च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः) ।

चित्तिण्यश्च वसोर्धारास्तृतीये समुदीरिताः ॥

अथ चतुर्थे होमविशेषा राष्ट्रभृदाख्या इष्टकाश्चाभिधीयन्ते ।

यदुक्तं सूत्रकारेण—" चित्तिं जुहोम्यग्ने यमद्याधमिति द्वे आहुती हुत्वा " इति, तत्र प्रथमाहुतेर्विधिं मन्त्रव्याख्यानेनोन्नयति—

चित्तिं जुहोमीति । अयं मन्त्रः पूर्वमापो वरुणस्य पत्नय इत्यनुवाके समाम्नातो व्याख्यातश्च । तमिमं होमसाधनत्वेन पठेत् । अस्या आहुतेरदाभ्येति नाम, रक्षोभिः कैरपि विनाशयितुमशक्यत्वात् । सा च विश्वकर्मदेवताका, तस्मिन्मन्त्रे विश्वकर्मण इत्याम्नानात् । अस्यामाहुतौ हुतायां चितवन्तमेनं यजमानं सा-

(होमविशेषाणां राष्ट्रभृदिष्टकानां चाभिधानम्)

मृत्यो न हिनस्ति। तस्मादेतां जुहुयात्। अपि चैतां जुह्वत्पुरुषो देवताः प्राप्नोत्येव। अथ द्वितीयामाहुतिं विधत्ते—

अग्ने तमद्येतीति। अयं मन्त्रश्चतुर्थकाण्डेऽग्निर्मूर्धेत्यनुवाके पठितो व्याख्यातश्च। पङ्क्तिच्छन्दसा हूयमाना येयमाहुतिस्तया यज्ञमारम्भं प्राप्नोति।

प्राचीमनु प्रदिशमित्यस्मिन्ब्राह्मणानुवाके पूर्णया जुहोतीति यद्विहितं तदेवानूद्य प्रशंसति—

सप्त ते अग्न इति। अयं च मन्त्रश्चतुर्थकाण्डे प्राचीमित्यनुवाके समाम्नातो व्याख्यातश्च। तस्मिन्मन्त्रे सप्त होत्रा इत्यभिधानादनयाऽऽहुत्या होत्रकान्प्रशास्त्रादीनधीनान्करोति। किं च—देवेभ्यो योऽयमग्नेर्भागस्तद्रूपत्वादियमाहुतिरस्य चीयमानस्याग्नेरग्निहोत्रमित्युच्यते। यस्मिन्काले साकल्येनायमग्निश्चितस्तदैवायमुत्पन्नो भवति। उत्पन्नाय च तस्मै तदाहुतिरूपमन्नं संपादितं भवति। तेन च तृप्तोऽग्निर्यजमानं प्रीणयति। स च यजमानो यज्ञपतिर्भवति। एवमुक्तं सर्वं प्राचीमित्यनुवाक एव द्रष्टव्यम्। अथात्र चीयमानमग्निं प्रश्नोत्तराभ्यामादित्यत्वेन प्रशंसति—

ब्रह्मवादिनो वदन्तीति। अग्ने गृहपतिरित्यादिषु मन्त्रेष्वग्नेर्गृहपतित्वमुक्तम्। गृहपतिस्वामिकः कश्चित्प्रदेशो गार्हपत्यः। एवं सति पूर्वस्मिन्वाक्य एतद्वा अग्नेरग्निहोत्रमिति चितेऽग्नौ हूयमानायाः पूर्णाहुतेरग्निस्वामिकत्वाभिधानात्सर्वोऽप्ययं चीयमानो गार्हपत्यः संपन्नः। तस्मादाहवनीयो न लभ्यते। आ समन्तात्सर्वे देवा यत्र हूयन्ते सोऽयमाहवनीयः। सर्वस्यापि चितप्रदेशस्याग्न्यर्थहोमाधारत्वेन गार्हपत्यत्वे सति देवान्तरहोमार्थं आहवनीयोऽस्य यजमानस्य कुत्र संभवेदित्येवं ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञः कश्चिदुत्तरमेवं ब्रूयात्—असावादित्य एव यजमानस्याऽऽहवनीय इति। आदित्ये हि सर्वदेवार्थो होमः क्रियते।

“ अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ” इति स्मृतेः।

एवं सति यो यजमानश्चीयमानस्याग्नेरादित्यरूपत्वं ज्ञात्वा चयनं करोति सोऽयं साक्षादेवाव्यवधानेन देवतास्तोषयति।

यदुक्तं सूत्रकारेण—“ अग्ने यशस्विन्निति चतस्रो राष्ट्रभृतः पुरस्तादुपधाय ” इति, तदेतद्विधातुमुत्पादनीयेषु मन्त्रेषु प्रथमामृचमाह—

(होमविशेषाणां राष्ट्रभृदिष्टकानां चाभिधानम्)

अग्ने यशस्विन्निति । प्रभूतं यशो यस्यास्ति स यशस्वी । तादृश हेऽग्न इमं यजमानं यशसाऽपि संयोजय । इन्द्रावतीमिन्द्रस्य योग्यामपचितीं पूजामिह कर्मण्यावह संपादय । अयं यजमानस्त्वत्प्रसादात्समानानां यजमानानां मध्ये मूर्धा शिरःस्थानीयः, परमेष्ठ्युत्तमस्थाननिवासी, सुवर्चाः शोभनकान्तिः, उत्तमश्लोकः सत्कीर्तियुक्तश्चास्तु । अथ द्वितीयामाह--

भद्रं पश्यन्त इति । अग्रे पूर्वस्मिन्काल ऋषयः केचिन्महात्मानो भद्रं कल्याणं कर्मफलं पश्यन्तः शास्त्रदृष्ट्या निश्चिन्वानाः सुवर्विदः स्वर्गं लब्धुकामास्तपः कर्माङ्गभूतमनशनादिकं दीक्षां मौण्ड्यादिनियमविशेषं चोपसेदुरनुष्ठितवन्तः । ततोऽनुष्ठानात्तेषां क्षत्रं क्षताद्निष्टात्त्राणं रक्षणं बलं शरीरसामर्थ्यमोजो धातुपुष्टिश्चेत्येतत्सर्वं जातं संपन्नम् । तत्फलं सर्वमस्मै यजमानाय देवा अभिसंनमन्तु सर्वतः संपादयन्तु । अथ तृतीयामाह---

धाता विधातेति । परमा परम उत्तमो धाता पोषको यो देवो यश्च विधाता स्रष्टा, उतापि च संदृक्सम्यगभिज्ञः प्रजापतिः प्रजानां पालकः परम उत्कृष्टे सत्यलोकादौ तिष्ठतीति परमेष्ठी विराजा ब्रह्माण्डरूपया विराण्मूर्त्या सहितः । तादृशो यो देवो ये च स्तोमास्त्रिवृदादयः, यानि च च्छन्दांसि गायत्र्यादीनि, याश्च निविदो देवेद्धो मन्विद्ध इत्यादीनि निवित्पदानि[१] ते सर्वे मे मदर्थमाहुर्ब्रुवन्तु । तैर्वक्तव्यं प्रदर्श्यते—एतस्मै यजमानाय राष्ट्रमभिसंनमाम देशाधिपत्यं सर्वतः संपादयाम । तदिदं तैर्वक्तव्यम् । अथ चतुर्थीमाह—

अभ्यावर्तध्वमिति । हे मनुष्याः सर्वे यूयमभ्यावर्तध्वं सर्वत आगच्छत । साकं परस्परं मिलित्वा मां मदीयं यजमानमुप समीपमेताऽऽगच्छत । अयं यजमानो वो युष्माकं शास्ताऽनुशासकोऽधिपतिरधिकं पालयिता चास्तु । अस्य यजमानस्य विज्ञानं चित्तवृत्तिमनुसृत्य संरभध्वं सम्यक्प्रवर्तध्वम् । इमं यजमानमनुसृत्य पश्चाज्जीवाथ, एनं यजमानं संविज्ञा [या] नेन दत्तं जीवितं गृह्णीतेत्यर्थः ।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते--

राष्ट्रभृत एता इति । राष्ट्रशब्दोपेतान्मन्त्रान्बिभ्रति तैरुपधीयन्त इति राष्ट्रभृतः । एतदुपधानेन निष्पन्ना या चितिः सैषाऽग्नेः संबन्धिनी राष्ट्रभृदित्युच्यते । तयैवास्मिन्यजमाने राष्ट्रं स्थापयति । तच्च राष्ट्रमस्याधीनमेव भवति । अस्माद्य-

१ ख. °वेद्ध मन्विद्ध इ° । २ ख. च. °नि स° ।

(पुनःपरीन्धनाद्यभिधानम्)

जपानात्तद्राष्ट्रं कदाचिदपि न भ्रष्टं भवति । एतच्च नक्षत्रेष्टकाब्राह्मणादूर्ध्वं द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः) ।

यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याग्निरुख्य उद्वायति यन्निर्मन्थ्यं कुर्याद्वि च्छिन्द्याद्भ्रातृव्यमस्मै जनयेत्स एव पुनः परीध्यः स्वादेवैनं योनेर्जनयति नास्मै भ्रातृव्यं जनयति तमो वा एतं गृह्णाति यस्याग्निरुख्य उद्वायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसा (१) एव तमो मृत्युमप हते हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव तमोऽप हतेऽथो तेजो वै हिरण्यं तेज एवाऽऽत्मन्धत्ते सुवर्न घर्मः स्वाहा सुवर्नार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा सुवर्न सूर्यः स्वाहाऽर्को वा एष यदग्निरसावादित्यः (२) अश्वमेधो यदेता आहुतीर्जुहोत्यर्काश्वमेधयोरेव ज्योतींषि सं दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत आपो वा इदमग्रे सलिलमासीत्स एतां प्रजापतिः प्रथमां चितिमपश्यत्तामुपाधत्त तदियमभवत्तं विश्वकर्माऽब्रवीदुप त्वाऽऽयानी-

ति नेह लोकोऽस्तीति (३) अब्रवीत्स एतां द्वितीयां चितिमपश्यत्तामुपाधत्त तदन्तरिक्षमभवत्स यज्ञः प्रजापतिमब्रवीदुप त्वाऽयानीति नेह लोकोऽस्तीत्यब्रवीत्स विश्वकर्माणमब्रवीदुप त्वाऽयानीति केन नोपैष्यतीति दिश्याभिरित्यब्रवीत्तं दिश्याभिरुपैत्ता उपाधत्त ता दिशः (४) अभवन्त्स परमेष्ठी प्रजापतिमब्रवीदुप त्वाऽयानीति नेह लोकोऽस्तीत्यब्रवीत्स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामाऽयानीति नेह लोकोऽस्तीत्यब्रूता५ँ स एतां तृतीयां चितिमपश्यत्तामुपाधत्त तदसावभवत्स आदित्यः प्रजापतिमब्रवीदुप त्वा (५) आऽयानीति नेह लोकोऽस्तीत्यब्रवीत्स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामाऽयानीति नेह लोकोऽस्तीत्यब्रूता५ँ स परमेष्ठिनमब्रवीदुप त्वाऽयानीति केन मोपैष्यसीति लोकंपृणयेत्यब्रवीत्तं लोकंपृणयोपैत्तस्मादयातयाम्नी लोकंपृणाऽयातयामा ह्यसौ (६) आदित्यस्तानृषयोऽब्रुवन्नुप व आऽयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन्तान्द्वाभ्यां चितीभ्यामुपायन्त्स पञ्चचितीकः समपद्यत य एवं विद्वानग्निं चिनुते भूयानेव भवत्यभीमाँल्लोकाञ्जयति विदुरेनं देवा अथो एतासामेव देवतानां५ँ सायुज्यं गच्छति ॥ (७) ॥

(पुनःपरीन्धनाद्यभिधानम्)

(तमसाऽऽदित्योऽस्तीति दिशं आदित्यः प्रजापतिमब्रवीदुप त्वाऽसौ पञ्चचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः) ।

तिस्र आहुतयो राष्ट्रभृतस्तुर्ये समीरिताः ।

अथ पञ्चमे पुनःपरीन्धनादयो विधीयन्ते ॥

यदुक्तं सूत्रकारेण—' यस्याग्निरुद्धृत उद्वायेद्गार्हपत्यादन्यं प्रणयेन्न एव पुनः परीध्यः ' इति, तदिदं विधत्ते—–

यथा वै पुत्रो जात इति । यस्य यजमानस्योख्याग्निः शाम्यति तस्य पुत्रमरणवदाग्निनाशनिमित्तं दुःखं जायते । तस्य निर्मन्थेनाग्न्यन्तरोत्पादने सति पूर्वोऽ(वम)ग्निं विच्छिन्द्यात् । स च विच्छिन्नोऽस्य यजमानस्य वैरिणं जनयेत् । अतस्तत्परिहाराय गार्हपत्यनिष्ठः सोऽग्निरेव पुनरभ्यानीय परितः काष्ठप्रक्षेपेणेन्धनीयः । तथा सति स्वकारणादेवोत्पन्नत्वाद्वैरिणं न जनयति ।

अत्रैव प्रायश्चित्तरूपां दक्षिणां विधत्ते—

तमो वा एतमिति । यस्य यजमानस्योख्याग्निर्नश्येदेतं यजमानं तमो गृह्णाति, तच्च मृत्युरूपम् । अतस्तत्परिहाराय कृष्णवर्णमेकं वस्त्रं कृष्णवर्णा च धेनुर्दक्षिणाऽनेन दातव्या । एवं सति तमोरूपत्वाद्दक्षिणायास्तया मृत्युरूपं तमो विनाशयति । अथ तत्रैव दानान्तरं विधत्ते—

हिरण्यं ददातीति । हिरण्यरूपेण ज्योतिषा मृत्युरूपस्य तमसो विनाशनं युक्तम् । अपि च हिरण्यस्य तेजस्त्वादात्मनि तेजः संपादयति । तदेतद्ब्राह्मणं सर्वान्ते द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—" सुवर्न घर्मः स्वाहेति पञ्चार्काहुतीर्हुत्वा " इति, तदिदं विधातुं मन्त्रानुत्पादयति—–

सुवर्न घर्म इति । सुवर्न स्वर्ग इव, यथा स्वर्गेऽवस्थिता देवा दीप्यमाना एवं घर्मो दीप्यमानो योऽग्निस्तस्मै स्वाहा हुतमस्तु । एवमुत्तरत्रापि योज्यम् । अर्कोऽर्चनीयः । शुक्रोऽतिनिर्मलः । ज्योतिः प्रकाशरूपः । सूर्यः सूर्यवर्ण आदित्यरूपः । एतैर्मन्त्रैर्होमं विधत्ते—

---

१ ख. च. °णा तेन ।

(पुनःपरीन्धनाद्यभिधानम्)

अर्को वा एष इति । योऽयं चीयमानोऽग्निः क्रतुसाधनभूत एषोऽर्चनीयत्वा-दर्क इत्युच्यते । योऽयमादित्यः स एष क्रतुफलरूपत्वादश्वमेध इत्युच्यते । सुवर्न इत्येतन्मन्त्रहोमेनार्काश्वमेधयोरग्न्यादित्ययोर्यानि ज्योतींषि तानि संपादयति । यस्य यजमानस्याऽग्निचयने तदेतदाहुतिपञ्चकं क्रियते स एष एव यजमानोऽर्का-श्वमेधी क्रतुसाधनतत्फलाभ्यामुपेतः । एतच्च ब्राह्मणमग्निर्देवेभ्य इत्यनुवाकान्ते द्रष्टव्यम् । अथ चितीनां पञ्चानां प्रशंसा । तत्र प्रथमां चितिं प्रशंसति—

आपो वा इदमिति । यदिदं भूम्यन्तरिक्षादिरूपं जगत्तदिदं सृष्टेः प्रागनेन रूपेण विभूतं नाऽऽसीत्, किं त्वाप एवाऽऽसीत् । तास्वप्सु भूतान्तरं न मिलितं, किं तु नैरन्तर्येण सलिलमेवाऽऽसीत् । तदानीं प्रजापतिरवस्थातुमाधारः को वा भविष्यतीति विचार्यैतां प्रथमां चितिं दृष्ट्वोपाधत्त । तदानीं सा चितिरियं भूमि-रूपाऽभवत् । तत्रायं प्रजापतिरवस्थितः । अथ द्वितीयां चितिं प्रशंसति—

तं विश्वकर्मेति । विश्वकर्माख्यः कश्चिदन्योऽवस्थातुमाधारमलभमानस्तं भूमा-ववस्थितं प्रजापतिमिदमब्रवीत्—अहमपि त्वामुपागच्छानि त्वत्समीप उपविशा-नीति । स च प्रजापतिरिह भूमौ तवावकाशो नास्तीत्यब्रवीत् । ततः स विश्व-कर्मा स्वस्याऽऽधारः को भविष्यतीति विचार्यैतां द्वितीयां चितिं दृष्ट्वा तामु-पाधत्त । तदानीं सा द्वितीया चितिरन्तरिक्षमभवत् । तत्रायं विश्वकर्माऽवस्थितः।

अथ दिश्याख्या इष्टकाः प्रशंसति—

स यज्ञः प्रजापतिमिति । यज्ञाख्येन पुरुषेण स्थाने पृष्टे सति प्रजापतिः परिजहार । विश्वकर्मा तु केनोत्क्रोचरूपेण साधनेन सह मां प्रत्यागमिष्यसीति पप्रच्छ । स च यज्ञो दिश्याभिरिष्टकाभिः सहाऽऽगमिष्यामीत्युक्त्वा तथैव गतवान् । राज्ञ्यसि प्राची दिगित्यादिभिर्मन्त्रैर्दिक्षूपधेया दिश्याः । ताश्चो-पहिताः सत्यो दिग्रूपा अभवन् । ततो यज्ञस्यावकाशोऽभूत् । अथ तृतीयां चितिं प्रशंसति—

स परमेष्ठीति । प्रजापतिर्विश्वकर्मा परमेष्ठीत्येते त्रयोऽप्येत(क) स्यैव मूर्ति-भेदाः । तत्र परमेष्ठिना प्रार्थितः प्रजापतिर्भूमाववकाशमदत्त्वा परिजहार । विश्वकर्मा यज्ञश्चेत्येतावप्यन्तरिक्षे दिक्षु चावकाशमदत्त्वा परिजहतुः । ततः परमेष्ठी विचार्य तृतीयां चितिं दृष्ट्वोपाधत्त । साऽपि चितिर्द्यौरभवत् । तत्रायं परमेष्ठी स्वयमवस्थितः ॥

अथ लोकंपृणेष्टकां प्रशंसति—

(व्रतचरणाद्यभिधानम्)

स आदित्यः प्रजापतिमिति । स आदित्यो लोकंपृणामानीतवान् । तस्या उपहितायामादित्यस्यावकाशोऽभूत् । यस्मादियमादित्येनाऽऽनीता तस्मादुगतसारा लोकंपृणा । आदित्योऽप्युगतसारः, पुनः पुनरावर्तमानोऽपि तस्मिञ्जगदुपकारकस्य प्रकाशरूपस्य सारस्याक्षीयमाणत्वात् । आदित्यवल्लोकंपृणा पुनः पुनः प्रयुज्यमानाऽप्यक्षीयमाणसारा । यत्र यत्र चितौ छिद्रमस्ति तत्र तत्र लोकंपृणा प्रयुज्यते । अथ चतुर्थपर्यायमचितीं प्रशंसति—

तानृषयोऽब्रुवन्निति । तान्प्रजापतिविश्वकर्मपरमेष्ठ्यादित्यानन्ये केचिदृषयः स्थानं प्रार्थितवन्तः । ततः प्रजापत्यादिभिरुत्कोचे याचिते सति उत्कोचबाहुल्यं प्रतिज्ञाय चितिद्वयमानीतवन्तः । अतस्तेषामवकाशोऽभूत् । तदेवं प्रशस्ताभिश्चितिभिरयमग्निः पञ्चचितीकोऽभूत् । एतद्वेदनपूर्वकमनुष्ठानं प्रशंसति—

य एवं विद्वानिति । विद्यादिगुणसमृद्धिर्भूयस्त्वं, लोकत्रयस्य स्वाधीनत्वं जयः, देवैर्वेदनं नामैतदीया कीर्तिः । अपि चैतासां देवतानां सहभावं प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः) ।

वयो वा अग्निर्यदग्निचित्पक्षिणोऽश्नीयात्तमेवाग्निमद्यादार्तिमार्छेत्संवत्सरं व्रतं चरेत्संवत्सर॑ हि व्रतं नाति पशुर्वा एष यदग्निर्हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात्प्रत्यञ्चमुपचरति तस्मात्पश्चात्प्राङुपचर्य आत्मनोऽहि॑ साये तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ (१) पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याहैताभिर्वा

१स घ. ङ. च. °त्र कुत्र ।

इमे लोका विधृता यदेता उपदधात्येषां लोकानां विधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उप दधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यं यत्स्वयमातृण्णा उपधाय (२ हिरण्येष्टका उपदधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्र भान्ति यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः । ताभिः सर्वाभी रुचे जनाय नस्कृधि । या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते । रुचं नो धेहि (३) ब्राह्मणेषु रुचꣳ राजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् । द्वेधा वा अग्निं चिक्यानस्य यश इन्द्रियं गच्छत्यग्निं वा चितमीजानं वा यदेता आहुतीर्जुहोत्यात्मन्नेव यश इन्द्रियं धत्त ईश्वरो वा एष आर्तिमार्तोर्योऽग्निं चिन्वन्नधिक्रामति तत्त्वा यामि ब्रह्मणा वन्दमान इति वारुण्यर्चा (४) जुहुयाच्छान्तिरेवैषाऽग्नेर्गुप्तिरात्मनो हविष्कृतो वा एष योऽग्निं चिनुते यथा वै हविः स्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति मैत्रावरुण्याऽऽमिक्षया यजेत मैत्रावरुणतामिवोपैत्यात्मनोऽस्कन्दाय यो वा अग्निमृतुस्थां वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति संवत्सरो वा अग्निः (५)

(व्रतचरणाद्यभिधानम्)

ऋतुस्थास्तस्यं वसन्तः शिरों ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्तरः पक्षो हेमन्तो मध्यं पूर्वपक्षाश्चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका एष वा अग्निर्ऋतुस्था य एवं वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति प्रजापतिर्वा एतं ज्यैष्ठ्यंकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छद्य एवं विद्वानग्निं चिनुते ज्यैष्ठ्यमेव गच्छति (६) ॥

(पृथिवीं यच्छ यत्स्वयमातृण्णा उपधाय ध्रेत्यृचाऽग्निश्चिनुते त्रीणि च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः) ।

पुमःशरीन्धनाद्यत्र पञ्चमे समुदीरितम् ।

अथ षष्ठे व्रतचरणादिकमभिधीयते ।

यदुक्तं सूत्रकारेण—‘ संवत्सरं न कंचन[1] प्रत्यवरोहेन्न च रामामुपेयान्न पक्षिणोऽश्नीयात् ’ इत्यादि, तत्र पक्ष्यशननिषेधरूपं संवत्सरव्रतं विधत्ते—

वयो वा अग्निरिति । योऽयं चीयमानोऽग्निः स पक्षिस्वरूप एव । ‘ वयसां वा एष प्रतिमया चीयते ’ इति पूर्वमुक्तम् । एवं सत्ययमग्निचिद्यदि पक्षिणो भक्षयेत्तदाऽग्निमेव भक्षितवान्भवति । ततो म्रियेत । अतस्तत्परिहाराय संवत्सरमात्रं पक्षिभक्षणवर्जनरूपं व्रतं चरेत् । त(य) स्मात्संवत्सरमतीत्य व्रतचरणं न क्वापि दृष्टं तस्मात्तद्व्रत (तं) पर्याप्तम् । एतद्ब्राह्मणं पूर्वोक्तं च चितिप्रशंसारूपं ब्राह्मणं सर्वान्ते द्रष्टव्यम् । अथ चित्यारोहणस्य पश्चिमदिङ्नियमं विधत्ते—

पशुर्वा एष इति । अग्नेः पशुरूपत्वात्पुरस्तादारोहणे यथा पशुः

---

[1] ख. घ. ङ. च. किंचन ।

शुक्राभ्यां हिनस्ति तद्द्वयमपि हिंस्यात्। तस्मात्पश्चिमायां दिशि प्राङ्मुखेनो-पचर्य आरोहणीयः। तच्चाऽऽत्मन आरोढुरहिंसार्थं भवति। एतच्चाग्ने तव श्रवो वय इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूत्रकारेण 'तेजोऽसि तेजो मे यच्छेति हिरण्येष्टकाम्' इति, 'ज्योतिरसि ज्योतिर्मे यच्छेति हिरण्येष्टकाम्' इति च, 'सुवरसि सुवर्मे यच्छेति हिरण्येष्टकाम्' इति च, तदेतद्विधातुं मन्त्रानुत्पादयति—

तेजोऽसि तेजो म इति। प्रथमचितावुपधातव्ये हे हिरण्येष्टके त्वं तेजो-रूपाऽसि, मे मदर्थं तेजो देहि। तथा पृथिवीं देहि। यद्वा मदुपकारित्वेन नियमय। तस्याः पृथिव्याः सकाशान्मां पाहि। यथा पृथिवी नोपद्रवं करोति तथा कुरु। एवं तृतीयपञ्चमचितिविषययोरुत्तरयोर्मन्त्रयोर्योज्यम्। सुवः स्वर्ग-सुखम्। दिवं द्युलोकम्॥ एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

इत्याहैताभिरिति। इत्युक्तान्मन्त्रानुपधानकाले पठेत्। एताभिर्हिरण्येष्टका-भिरिमे त्रयो लोका विधृताः। अत एतदुपधानं लोकधृत्यै भवति॥

अस्योपधानस्य तत्तच्चितिगतस्वयमातृण्णाभ्य ऊर्ध्वं कालं विधत्ते—

स्वयमातृण्णा इति। एतच्च स्वयमातृण्णामित्यनुवाके द्रष्टव्यम्॥

यदुक्तं सूत्रकारेण—"यास्ते अग्ने सूर्ये रुच इति तिस्रो रुचः" इति, रुगा-ख्या आहुतीर्जुहुयादित्यर्थः। तत्र प्रथमामाह—

यास्ते अग्ने सूर्य इति। हेऽग्ने सूर्ये सूर्यमण्डले स्थितस्य ते तवोद्यत उद्यं गच्छतो या रुचो दीप्तयो दिवं द्युलोकमातन्वन्ति सर्वतो व्याप्नुवन्ति ताभिः सर्वाभी रश्मिभिर्नो जनायास्मदीयजनार्थं रुचे रुधि रुचं दीप्तं (प्तिं) कुरु॥ अथ द्वितीयामाह—

या वो देवा इति। हे देवा वो युष्माकं संबन्धिन्यः सूर्यमण्डले या रुचो दीप्तयो वर्तन्ते, तथा गोष्वश्वेषु च या रुचो वर्तन्ते, हे इन्द्राग्नी ताभिः सर्वाभि-र्दीप्तिभिर्नोऽस्मदर्थं रुचं धत्त दीप्तं (प्तिं) कुरुत॥ अथ तृतीयामाह—

रुचं नो धेहीति। हेऽग्ने नोऽस्मदीयेषु ब्राह्मणेषु रुचं धेहि प्रकाशं कुरु। नोऽस्मदीयेषु राजसु रुचं कृधि प्रकाशं कुरु। तथा विश्येषु वैश्येषु शूद्रेषु च रुचं प्रकाशं कुरु। तथा रुचा त्वदीयया दीप्त्या मयि रुचं धेहि प्रकाशं कुरु॥

१ ख. ङ. च. ऊर्ध्वका°। २ क. °ययजमाना°

(व्रतचरणाद्यभिधानम्)

एतैर्मन्त्रैः साध्यं होमं विधत्ते—

द्वेधा वा अग्निमिति । यो यजमानोऽग्निं चितवांस्तस्य यशः कीर्तिरिन्द्रियं सामर्थ्यं चाऽन्यत्र गच्छति । कुत्रेति चेच्छ्रूयताम्, योऽयमिदानीं चितोऽग्निस्तं वा प्राप्नोति । यस्त्वीजानः पूर्वं चितेऽग्नौ यागं कृतवांस्तं वा प्राप्नोति । सर्वथाऽप्येतस्माद्यजमानादपगच्छति । एतैर्मन्त्रैर्होमे तु तद्यश इन्द्रियं च स्वात्मन्येव धारयति । एतस्मात्त्रिर्देवेभ्य इत्यनुवाकादूर्ध्वं द्रष्टव्यम् ॥

यदुक्तं सूत्रकारेण "तत्त्वा यामि ब्रह्मणा वन्दमान इति शालामुखीये हुत्वा" इति, तदिदं विधत्ते—

ईश्वरो वा एष इति । यो यजमानश्चयनकालेऽग्निमचित्वा यद्वैनाऽऽक्रामति एष यजमानो विनाशं प्राप्तुं समर्थः । तत्परिहाराय तत्त्वा यामीत्यृचा जुहुयात् । सेयमृगिन्द्रं वो विश्वतस्परीन्द्रं नर इत्यनुवाके व्याख्याता । एषाऽऽहुतिरग्नेः शमनहेतुरात्मनो यजमानस्य च रक्षणहेतुः । तच्चाग्ने तव श्रवो वय इत्यनुवाके द्रष्टव्यम् ॥

यथाऽग्निचयनादूर्ध्वं तदङ्गत्वेन सौत्रामणी पूर्वं विहितैवमत्र मैत्रावरुणीं विधत्ते—

हविष्कृतो वा एष इति । यो यजमानोऽग्निं चिनुत एष हविःस्वरूपं प्राप्तः । तथा सति स्वस्याग्निगमन (ने)स्य स्वरूपनाशो हविर्नाशसमानः । अतस्तत्परिहारार्थं यजेत । तेन यागेन स्वयं मित्रावरुणसंबन्धित्वं प्राप्य यागादूर्ध्वं हविष उपयुक्तत्वाद्धविःस्थानीयस्य स्वस्य गमनेऽपि नास्ति नाशः । अथाग्निं संवत्सररूपकल्पनया प्रशंसति—

यो वा अग्निमिति । ऋतुषु तिष्ठतीत्यृतुस्थाः संवत्सरस्तद्रूपमाग्निं यो वेद मनसा भावयेत्, अस्मै यजमानाय स स ऋतुः स्वस्वोचितभोगप्रदानसमर्थः सन्नेनं प्राप्नोति । तद्योगेन चायं प्रतितिष्ठति । संवत्सरो वा अग्निरित्यादि भावनाप्रकारः । य एवं वेदेत्यादि पूर्वोक्तफलोपसंहारः ॥ अथ फलान्तरेण प्रशंसति—

प्रजापतिर्वा इति । न्यग्न स्थितवानित्यर्थः । ज्यैष्ठ्यं वयोगुणाभ्यामाधिक्यम् । एतच्च सर्वमन्ते द्रष्टव्यम् ॥

---

१ ख. च. °त्यस्मय° ।

(आकूतिमन्त्राभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-
र्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः)।

यदाकूतात्समसुस्रोद्धृदो वा मनसो वा संभृतं
चक्षुषो वा । तमनु प्रेहि सुकृतस्य लोकं यत्र-
र्षयः प्रथमजा ये पुराणाः । एतꣳ सधस्थ परि
ते ददामि यमावहाच्छेवधिं जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वो अत्र तꣳ स्म जानीत
परमे व्योमन् । जानीतादेनं परमे व्योमन्देवाः
सधस्था विद रूपमस्य । यदागच्छात् (१)
पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै । सं
प्र च्यवध्वमनु सं प्र यातानग्ने पथो देवयाना-
न्कृणुध्वम् । अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे
देवा यजमानश्च सीदत । प्रस्तरेण परिधिना
स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो वह
सुवर्देवेषु गन्तवे । यदिष्टं यत्परादानं यद्दत्तं
या च दक्षिणा । तत् (२) अग्निर्वैश्वकर्मणः
सुवर्देवेषु नो दधत् । येना सहस्रं वहसि येनाग्ने
सर्ववेदसम् । तेनेमं यज्ञं नो वह सुवर्देवेषु
गन्तवे । येनाग्ने दक्षिणा युक्ता यज्ञं वहन्त्यृ
त्विजः । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ।
येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः ।
तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे । यत्र

(आकूतिमन्त्राभिधानम्)

धारा अनपेता मधोर्घृतस्य च याः । तद॒ग्नि-
र्वैश्वकर्मणः सुवर्देवेषु नो दधत् (३) ॥

(आगच्छात्तद्द्यानसुस्तेनेमं यज्ञं नो वह
सुवर्देवेषु गन्तवे चतुर्दश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तम-
प्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः) ।

व्रतेष्टकाप्रशंसा हि सर्वाः षष्ठे समीरिताः ॥

अथ सप्तम आकूतिमन्त्रा उच्यन्ते ।

यदुक्तं सूत्रकारेण—" यदाकूतादिति दशाऽऽकूर्ताहुत्यः " इति, तत्र प्रथमा-
माह—

यदाकूतादिति । आकूतादिभिः संभृतं संपादितं यत्फलं पूर्वो यजमानस्त्व:
समसुस्रोत्सम्यक्प्राप्तवान्, हे यजमान त्वं सुकृतस्य लोके त्वदीयस्य कर्मणः
फलभूतं तं भोगमनुप्रेहि अनुक्रमेण प्राप्नुहि । आकूतं संकल्पोऽक्षयं सुखं प्रा-
प्नोमीत्येवंरूपः । हृदयं चित्तं श्रुतिस्मृत्युदितसाधनोपायचिन्तनम् । मनोऽन्तः-
करणं तदनुकूलप्रतिकूलप्रवृत्तिनिवृत्त्यात्मकम् । चक्षुःशब्देन दशेन्द्रियाणि लक्ष्य-
न्ते । यानि सम्यगनुष्ठानेनाभिमतं फलं साधयन्ति । एतैः सर्वैः संपादितं प्रा-
प्नुहीत्यन्वयः । यत्र यस्मिन्सुकृतस्य लोके प्रथमजाः स्वयंभूप्रभृतय ऋषयः
सर्वज्ञा आसते । ये च पुराणाः पूर्वे यजमानाः सन्ति तेऽपि यत्राऽऽसते तमनु-
प्रेहि । अथ द्वितीयामाह—

एतꣳ सधस्थेति । हे सधस्थ ऋत्विग्यजमानैरस्माभिः सहास्यां यज्ञभूमा-
ववस्थित हेऽग्ने ते तुभ्यमेतं यजमानं परिददामि रक्षार्थं त्वद्धस्ते ददामीत्यर्थः ।
जातवेदा उत्पन्नानां प्राणिनां योगक्षेमाभिज्ञस्त्वं शेवधिं निधिवद्रक्षणीयं यं
यजमानमावहाद्वावहासि मदीयोऽयमिति स्वीकरोषि, तं यजमानं परिददामीति
पूर्वत्रान्वयः । हे देवा यज्ञपतिरयं यजमानो वो युष्मानन्वागन्ता युष्माकं प्रभु

१ क. ख. ङ. च. °यभुप्र° ।

आगमिष्यति । अत्रास्मिन्परमे व्योमन्युत्कृष्टविशिष्टरक्षणयोग्ये स्थाने भवदीये लोके तं यजमानं जानीत स्म सर्वथा रक्षणीयोऽयमिति स्मरत । अथ तृतीयामाह—

जानीतादेनमिति । हे देवाः परमे स्थाने भवदीये लोक एनं जानीताद्यजमानमविस्मृत्य सर्वदा रक्षार्थं स्मरत । हे सधस्था यजमानेन सह तस्मिन्पुण्यलोके स्थिता देवा अस्य यजमानस्य रूपमग्निचयनाद्यनुष्ठानयुक्तं स्वरूपं विद जानीत तस्मिँल्लोके पुनः पुनः स्मरत । देवयानैर्भवदीयगमनयोग्यैः पथिभिर्मार्गैर्यदागच्छाद्यो यजमान आगच्छति अस्मा एतद्यजमानार्थमिष्टापूर्ते श्रौतस्मार्तकर्मफले आविष्कृणुतात्प्रकटी कुरुत, हे यजमान तवेदं श्रौतकर्मफलमिदं च स्मार्तकर्मफलमित्येवं सावधाना अनुगृह्णीतेत्यर्थः अथ चतुर्थीमाह—

सं प्र च्यवध्वमिति । हेऽग्ने त्वं विश्वे देवाः सर्वेऽपि देवा यजमानश्चेत्येते यूयं सर्वेऽपि संप्रच्यवध्वमस्माद्भूलोकस्थानात्सम्यक्प्रच[लत, च]लित्वा चानुसंप्रयातानन्तरं यजमानेन संगता एव गच्छत । गमनकाले च देवयानाम्पथः कृणुध्वं, न तु नरकलोकमनुष्यलोकमार्गः कर्तव्यः । सधस्थे यजमानेन सहावस्थानयोग्येऽस्मिन्यज्ञभूमिरूपे । भूलोकेऽप्युत्तरस्मिन्फलभोगस्थाने स्वर्गलोके च सीदत यजमानो यूयं च सह तिष्ठत । अथ पञ्चमीमाह—

प्रस्तरेण परिधिनेति । हेऽग्ने प्रस्तारादिभिः सर्वैर्यज्ञसाधनैः सहितं नोऽस्मदीयमिमं यज्ञं सुवः स्वर्गलोके वह प्रापय । किमर्थम्, देवेषु गन्तवे देवानां मध्ये गन्तुं, तेषां प्रदर्शनार्थमित्यर्थः । अथ षष्ठीमाह—

यदिष्टं यत्परादानमिति । दर्शपूर्णमासादिरूपं यत्कर्मेष्टमनुष्ठितं, यच्च परादानं दीनान्धकृपणादिभ्यः स्वल्पदानं, यदपि दत्तं बहिर्वेदि पात्रभूतेभ्योऽनूचानेभ्यो बहु द्रव्यं समर्पितं, या चान्या दक्षिणा यज्ञमध्ये गवादिरूपा दत्ता, नोऽस्मदीयं तत्सर्वं वैश्वकर्मणः कृत्स्नकर्मस्वामिभूतोऽयमग्निः सुवर्देवेषु स्वर्गलोकनिवासिषु देवेषु मध्ये दधत्स्थापयतु ।

अथ सप्तमीमाह—

येना सहस्रमिति । हेऽग्ने त्वं येन मार्गेण सहस्रं वहसि सहस्रदक्षिणाकं यज्ञं नयसि, येन च सर्ववेदसं सर्वस्वदक्षिणाकं यज्ञं नयसि, तेन मार्गेण नोऽस्मदीयमिमं यज्ञं वह नय । सुवरित्यादि पूर्ववत् । अथाष्टमीमाह—

(स्वयंचित्याद्यभिधानम्)

येनाग्ने दक्षिणा इति। हेऽग्न ऋत्विजः सर्वे युक्ता योग्याः शास्त्रीयां दक्षिणां यज्ञं चेमं येन शास्त्रीयेण मार्गेण वहन्ति निर्वहन्त्यनुतिष्ठन्तीत्यर्थः। तेनैव शास्त्रीयेण मार्गेणेमं यज्ञमित्यादि पूर्ववत्। अथ नवमीमाह—

येनाग्ने सुकृत इति। हेऽग्ने सुकृतः पूर्वे पुण्यकृतो यजमाना येन [पथा] मार्गेण गत्वा मधोर्मधुरस्य पीयूषस्य धारा व्यानशुर्व्याप्तवन्तस्तेनेत्यादि पूर्ववत्। अथ दशमीमाह—

यत्र धारा इति। यत्र यस्मिंल्लोके मधोर्माक्षिकस्य घृतस्य च [या] धारा अनपेता अविच्छिन्ना[स्ता] स्तत्र लोकेऽग्निरित्यादि पूर्ववत्। एते च दश मन्त्राः पूर्वस्मिन्मन्त्रकाण्डे समाप्ता इत्यनुवाकादूर्ध्वं द्रष्टव्याः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ पञ्चमाष्टके सप्तमप्रपाठकेऽष्टमोऽनुवाकः)।

यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः। ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्। उत्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वा अध्वर्युरग्नेश्चिन्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि (१) धामेत्याहैषा वा अग्नेः स्वयंचितिरग्निरेव तदग्निं चिनोति नाध्वर्युरात्मनोऽन्तरेति चतस्र आशाः प्र चरन्त्वग्नय इमं नो यज्ञं नयतु प्रजानन्। घृतं पिन्वन्नजरं सुवीरं ब्रह्म समिद्भवत्याहुतीनाम्। सुवर्गाय वा एष लोकायोप धीयते यत्कूर्मश्चतस्र आशाः प्र चर-

(स्वयंचित्याद्यभिधानम्)

न्त्वग्नय इत्याह (२) दिश एवैतेन प्र जा-
नातीमं नो यज्ञं नयत्वित्याह प्रजानान्नित्याह सुवर्गस्य
लोकस्याभिनीत्यै ब्रह्म समिद्भवत्याहुतीना-
मित्याह ब्रह्मणा वै देवाः सुवर्गं लोकमाय-
न्यद्ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्यजमानः
सुवर्गं लोकमेति प्रजापतिर्वा एष यदग्निस्तस्य
प्रजाः पशवश्छन्दाꣳसि रूपꣳ सर्वान्वर्णानिष्ट-
कानां कुर्याद्रूपेणैव प्रजां पशूञ्छन्दाꣳस्यव
रुन्धेऽथो प्रजाभ्य एवैनं पशुभ्यश्छन्दोभ्योऽ-
वरुध्य चिनुते (३)॥

(एति यास्ते अग्ने समिधो यान्यग्नय इत्याहे-
ष्टकानाꣳ षोडश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
सप्तमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठकेऽष्टमोऽनुवाकः)।

आकूत्याहुतिमन्त्रा ये ते सप्तम उदीरिताः।

अथाष्टमे स्वयंचित्यादिकमभिधीयते।

यदुक्तं सूत्रकारेण—'यास्ते अग्ने समिध इति स्वयंचित्याऽभिमृशति' इति, तदेतद्विधातुं मन्त्रमुत्पादयति——

यास्ते अग्न इति। हे जातवेदोऽग्ने ते त्वदीयाः समिधः समिन्धनक्रिया याः सन्ति, यानि च धाम त्वदीयानि स्थानानि गार्हपत्यादीनि, या च जिह्वा त्वदीया काली करालीत्यादिका, योऽप्यर्चिः प्रकाशनसामर्थ्यं, हेऽग्ने ते त्वदीया ये मेडयः शब्दविशेषा ये चेन्दव इन्दुसदृशा विस्फुलिङ्गास्तैभिस्तैः सर्वैः प्रजानंश्चयनप्रकाराभिज्ञस्त्वमात्मानं चिनुहि स्वकीयस्वरूपमुपचितं कुरु।

अनेन मन्त्रेण साध्यस्य क्षेत्राभिमर्शनस्य विधिमुन्नयति——

(स्वयंचित्याद्यभिधानम्)

उत्सन्नयज्ञो वा एष इति। योऽयं चीयमानोऽग्निः सोऽयमुत्सन्नयज्ञः। बहुष्वङ्गेषु यस्य कस्यचिद्विस्मृतिसंभवेन विनष्टयज्ञत्वम्। अतोऽस्य यज्ञस्य किमङ्गमनुष्ठितं किं वा नेति ज्ञातुमशक्यम्। एवं च सति चिन्वानोऽयमध्वर्युरग्नेः संबन्धि यदङ्गमन्तरितं करोति तदात्मन एवाङ्गमन्तरितं कुर्यात्। अतस्तत्परिहाराय क्षेत्राभिमर्शनकाले यास्ते अग्न इत्येतामृचं ब्रूयात्। येयं यास्ते अग्न इत्यृक्सैषा स्वयंचितिरित्यभिधीयते। आत्मानं चिनुहीत्येवं स्वेन स्वस्यैव चीयमानत्वाभिधानात्। तत्तेन मन्त्रपाठेनाग्निरेव स्वयमग्निं स्वात्मानं चिनोति। ततोऽध्वर्युः स्वसंबन्धि किंचिदप्यङ्गं नान्तरेति। एतदप्यग्ने तव श्रवो वय इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूत्रकारेण—'मधु वाता ऋतायत इति तिसृभिर्दध्ना मधुमिश्रेण कूर्ममभ्यज्य मही द्यौः पृथिवी च न इति पुरस्तात्स्वयमातृण्णायाः प्रत्यञ्चं जीवन्तं प्राङ्मुखं उपदधाति चतस्र आशाः प्रचरन्त्वग्नय इति वोपधाय' इति, तत्र कूर्मोपधाने विकल्पितं मन्त्रमुत्पादयति—

चतस्र आशा इति। येऽग्नय आहवनीयादयः सन्ति ते चतस्रश्चतुःसंख्याका दिशः पूर्वाद्याः प्रचरन्तु, कूर्मस्य स्वर्गमार्गाभिज्ञानाय सर्वासु दिक्षु प्रकाशं कुर्वन्तु। अयं च कूर्मः प्रजानन्नस्मदीयं कर्म प्रकर्षेणावगच्छन्नोऽस्मदीयमिमं यज्ञं नयतु स्वर्गं प्रापयतु। किं कुर्वन्, अजरं विनाशरहितं सुवीरं शोभनवीर्यप्रदं घृतं मधुमिश्रमाज्यं पिन्वन्पिबन्। आहुतिप्रदानां यजमानानां ब्रह्म सामिद्भवति मन्त्र एव स्वर्गमार्गप्रकाशको भवति।

अनेन मन्त्रेण साध्यं कूर्मोपधानं पूर्वमेव विहितं "यज्जीवन्तं कूर्ममुपदधाति" इति। अत्र तु मन्त्रमेतं विनियोक्तुमादौ तदर्थः प्रकाश्यते तत्र प्रथमपादस्य तात्पर्यं दर्शयति—

सुवर्गाय वा इति। स्वर्गलोके नेतुमयं कूर्म उपधीयते। अतो मार्गाभिज्ञानायैतेन पादेन दिक्प्रकाशनं प्रार्थ्यते। द्वितीयपादस्य तात्पर्यं दर्शयति—

इमं नो यज्ञमिति। नयत्विति सामान्येनोक्तेऽपि स्वर्गं प्रत्येव गमनमत्र विवक्षितम्। चतुर्थपादस्य तात्पर्यं दर्शयति—

ब्रह्म सामिदिति। आहुतिप्रदाः पूर्वे देवा मन्त्रसामर्थ्येनैव स्वर्गं प्राप्ताः। अतो मन्त्र एव प्रकाशसाधनम्। व्याख्यातमेतं मन्त्रं विनियुङ्क्ते—

---

१ क. नोऽभय°। २ ख. च. °न्तं कूर्मं प्रा°। ३ ख. च. °रुमुप°। ४ क. ख. घ. ङ. च. धातीति।

(अग्निग्रहणार्थमभिधानम्)

यद्ब्रह्मण्वत्येति । ब्रह्मशब्दो यस्यामृच्यस्ति सेयं ब्रह्मण्वती । तदिदं ब्राह्मणं स्वयमातृण्णामुपदधातीत्यनुवाके द्रष्टव्यम् ।

यदुक्तं सूत्रकारेण—“ सर्वान्वर्णानिष्टकानां कुर्यांल्लेखाधिकारो भवतीति विज्ञायते च या दक्षिणावृतस्ता दक्षिणत उपदध्यात्सव्यावृत उत्तरत ऋजुलेखाः पश्चात्पुरस्ताच्च व्यालिखिता मध्ये ” इति, तदेतत्सर्वं विधत्ते—

प्रजापतिर्वा एष इति । चीयमानोऽग्निः प्रजापतिजन्यत्वात्प्रजापतिरेव । तस्य च प्रजापतेः प्रजापशुच्छन्दांसि परस्परविलक्षणानि स्वरूपम् । अतस्तद्रूपमत्यभिज्ञानायेष्टकानां सर्वान्वर्णान्बहुविधरेखाविशेषान्कुर्यात् । एवं सति प्रजापतिरूपेणैव +प्रजापतिं प्राप्नोति ।

*अथो प्रजाभ्य इति । अपि च प्रजादिभिरेवैनमग्निं स्वाधीनं कृत्वा चितवान्भवति । एतदपि स्वयमातृण्णामुपदधातीत्यनुवाके द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके नवमोऽनुवाकः) ।

मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः । यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्याꣳ आविवेश । तमात्मन्परि गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परा गात् । यदध्वर्युरात्मन्नग्निमगृहीत्वाऽग्निं चिनुयाद्योऽस्य स्वोऽग्निस्तमपि (१) यजमानाय चिनुयादग्निं खलु वै पशवोऽनूप तिष्ठन्तेऽपक्रामुका अस्मात्पशवः

+ अत्र प्रजादीन् इति भवितुं युक्तम् । * अस्यावतरणिका त्रुटितेति प्रतिभाति ।

१ क. घ. ङ. °वति ।

(अग्निग्रहणाद्यभिधानम्)

स्युर्मयि गृह्णाम्यग्रे अग्निमित्याहाऽऽत्मन्नेव स्व-
माग्निं दाधार नास्मात्पशवोऽप क्रामन्ति ब्रह्म-
वादिनो वदन्ति यन्मृच्चाऽऽपश्चाग्नेरनाद्यमथ
कस्मान्मृदा चाद्भिश्चाग्निश्चीयत इति यदद्भिः
संयौति (२) आपो वै सर्वा देवता देवता-
भिरेवैन॰ सं सृजति यन्मृदा चिनोतीयं वा
अग्निर्वैश्वानरोऽग्निनैव तदग्निं चिनोति ब्रह्मवा-
दिनो वदन्ति यन्मृदा चाद्भिश्चाग्निश्चीयतेऽथ
कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो
वै छन्दा॰सि तस्मादग्निरुच्यतेऽथो इयं वा
अग्निर्वैश्वानरो यत् (३) मृदा चिनोति
तस्मादग्निरुच्यते हिरण्येष्टका उप दधाति
ज्योतिर्वै हिरण्यं ज्योतिरेवास्मिन्दधात्यथो
तेजो वै हिरण्यं तेज एवाऽऽत्मन्धत्ते यो वा
अग्नि॰ सर्वतोमुखं चिनुते सर्वासु प्रजास्वन्न-
मत्ति सर्वा दिशोऽभि जयति गायत्रीं पुरस्ता-
दुप दधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चाद-
नुष्टुभमुत्तरतः पङ्क्तिं मध्य एष वा अग्निः सर्व-
तोमुखस्तं य एवं विद्वा॰श्चिनुते सर्वासु प्रजा-
स्वन्नमत्ति सर्वा दिशोऽभि जयत्यथो दिश्येव
दिशं प्र वयति तस्माद्दिशि दिक्प्रोता (४) ॥

(अग्निं संयौति वैश्वानरो यदेव वै पञ्चविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तम-
प्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः) ।
स्वयंचितिश्च कूर्मादिरष्टमे समुदीरितः ॥

अथ नवमेऽग्निग्रहणादिकमभिधीयते ।

यदुक्तं सूत्रकारेण—" मयि गृह्णाम्यग्रे अग्निं यो नो अग्निः पितर इति द्वाभ्यामात्मन्नग्निं गृहीत्वा " इति, तत्र प्रथमामाह—

मयि गृह्णाम्यग्र इति । अग्रे परकीयस्याग्नेश्चयनात्पूर्वमाग्निं स्वकीयं पूर्वसिद्धं वह्निं मयि गृह्णामि स्वात्मन्येव यथा स्थिरो भवति तथा स्वीकरोमि । किमर्थं, धनपुष्टिशोभनापत्यशोभनभृत्या (वीर्या) र्थमस्य गृहीतस्याग्नेः प्रसादात्प्रजामुत्पत्स्यमानां पुत्रादिकां मयि स्थापयामि । वर्चः शारीरं बलं च मयि स्थापयामि । सुवीराः शोभनपुत्रभृत्योपेता वयं तनुवा मदीयेन शरीरेण सहारिष्टा हिंसारहिताः स्याम । अथ द्वितीयामाह—

यो नो अग्निरिति । हे पितरः पालका अस्मच्छरीरगता भूतेन्द्रियविशेषा अमर्त्यो मरणरहितो योऽग्निर्हृत्स्वन्तर्हृदयाद्यवयवेषु मध्ये मर्त्यान्मरणयोग्यानस्मानाविवेश सर्वतः प्रविष्टस्तमाग्निं वयमात्मन्परिगृह्णीमहे स्वशरीर एव स्थिरं धारयामः । सोऽग्निरस्मानवहाय परित्यज्य मा परागादन्यत्र मा गच्छतु । एतन्मन्त्रद्वयसाध्यमग्निग्रहणं विधत्ते—

यदध्वर्युरात्मन्निति । यद्ययमध्वर्युर्मयि गृह्णामीतिमन्त्राभ्यां स्वकीयमाग्निं स्वस्मिन्नगृहीत्वा परार्थमाग्निं चिनुयात्तदानीमस्याध्वर्योर्यः स्वकीयः पूर्वचितोऽग्निस्तमपि यजनार्थमेव चितवान्भवति । पशवश्च सर्वेऽप्यग्निमनुसेवन्ते । अतोऽपक्रामन्तमाग्निमनु पशवोऽप्यस्मादध्वर्योरपक्रामन्ति । अतस्तत्परिहर्तुमग्निग्रहणाय मयि गृह्णामीति मन्त्रद्वयं ब्रूयात् । तेन स्वकीयमाग्निं स्वस्मिन्नेव धारयति । पशवोऽप्यस्मान्नापक्रामन्ति । एतदपि पूर्वब्राह्मणेन सह द्रष्टव्यम् । अथ प्रश्नोत्तराभ्यां चयनं प्रशंसति—

ब्रह्मवादिन इति । मृत्तिका चाऽऽपश्चेति यदस्ति तदुभयमग्नेर्भक्ष्यं न भवति । अतो भक्ष्यमाज्यपुरोडाशादिकं विहाय कस्मादेताभ्यां मृज्जलाभ्यामिष्टकारूपाभ्यामग्निश्चीयत इति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञा एवमुत्तरमाहुः— यद्यप्यापो न भक्ष्यास्तथाऽप्यद्भिर्मृत्तिकां मिश्रयतीति यत्तेन देवताभिरेवाग्निं संयोजयति । अपां सर्वदेवतात्मकत्वात् । वृत्रवधादाविन्द्रस्य सहकारित्वेनापां

१ क. घ. ङ. च. °र्वमेव चि° ।

(अग्निग्रहणाभिधानम्)

सर्वदेवोपकारित्वात्सर्वदेवतात्मकत्वम्। अतः सर्वदेवतासंयोजनायाग्निचयनं यु-
क्तम्। तथा मृदा चयनं यदस्ति तदपि युक्तम्। भुवो वैश्वानराग्निरूपत्वात्तद्रूपत्वं च
“ तस्मादियं यथाऽग्निर्न नकं नाप्यायते ” इत्यत्रोपपादितम्। अतो मृन्मयेनाग्निनैव तमग्निं चिनुत इत्येतदुपपन्नम्।

इदानीं मुण्डलाभ्यां चयनमङ्गीकृत्य तस्याभितेराभ्रिस्यं पश्चात्तदाभ्यां प्रति-
पादयति–

ब्रह्मवादिन इति। इयमन्यास्या चितिर्मुण्डलाभ्यामेव निरवाच्यते न तु
ऋत्विग्भिर्वाऽऽन्याभिर्वा। तथा सति कस्मात्कारणादग्निनाम संपन्नमिति ब्रह्मवादिनां
प्रश्नः। तथाभिज्ञा उत्तरमाहुः–न केवलं मुण्डलाभ्यामेव चयनं किंतु छन्दोभि-
र्युक्तैर्मन्त्रैरपि। छन्दांसि चाग्निरूपाणि, “ अग्निं त्वा देव सवितः ” इत्या-
दिभिर्मन्त्रगतैश्छन्दोभिर्मध्यमहेतुभिरग्नेरूपयायत्वात्। अतश्छन्दोद्वारा चितेरग्नि-
त्वम्। अपि च भुवो वैश्वानरत्वादिदानीमेवोपपादितम्। अतो मृत्कार्येष्टकाग्निर्न
युक्तम्। एवं ब्राह्मणमन्त्रे दृष्टव्यम्।

यदुक्तं सूत्रकारेण–“ हिरण्येष्टकाभिः सर्वतोमुखमुपदधाति गायत्री त्रिष्टुब्-
जगत्यादिभिरित्युक्तम् ” इति तदिदं विधत्ते–

हिरण्येष्टका इति। ज्योतिष्ट्वमितरप्रकाशकत्वम्। तेजः शरीरं। कार्यं तु
प्रपाठकादावाग्नेय्या गायत्र्येत्यादिना नाचिकेतचयनप्रकरणाम्नाता गायत्र्या-
द्य उदाहृतास्तास्त्र मन्त्रास्तत्र हिरण्येष्टकोपधाने विनियुक्ताः।

यो वा इति। या हिरण्येष्टका तदेवाग्नेर्मुखं, ताश्चेष्टकाः सर्वा दिक्ष्वभिमुखा
अर्पिताः सर्वासु दिक्षु विद्यन्त इत्ययमग्निः सर्वतोमुखः। एतस्य वेदने फलं अन्न-
गृहमन्तिमप्रकाशिव सर्वदिग्वर्तिप्रजासु स्निग्धो भूत्वाऽन्नमत्ति। अत एव सर्वा
दिशोऽनेन जिता भवन्ति। पुनरप्यन्ते फलाभिधानमुपसंहारार्थम्। अपि च सर्वासु
दिक्षु प(मा)षाणे(ष्वे)नैकस्यां दिश्यन्यां दिशं प्रयाति तूष्णीं यज्ञाग्निर्दिशां
करोति। अत एव लोकेऽप्येकस्यां दिश्यन्या दिक्प्रोता वर्तते। आग्नेय्यादिषु विदि-
क्षु द्वयोर्दिशोर्नयोः संश्लेषात्। इदं च ब्राह्मणं तत्तदिष्टकाभ्य ऊर्ध्वं द्रष्टव्यम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके
नवमोऽनुवाकः॥ ९॥

१ ख °ता, मन्त्राद्°। २ क. °गन्त° य°।

(पशुशीर्षाभिधानम्)

(अथ पञ्चमाष्टके सप्तमप्रपाठके दशमोऽनुवाकः) ।

प्रजापतिरग्निमसृजत सोऽस्मात्सृष्टः प्राङ्प्राद्रवत्तस्मा अश्वं प्रत्यास्यत्स दक्षिणाऽवर्तत तस्मै वृष्णिं प्रत्यास्यत्स प्रत्यङ्ङाऽवर्तत तस्मा ऋषभं प्रत्यास्यत्स उदङ्ङाऽवर्तत तस्मै बस्तं प्रत्यास्यत्स ऊर्ध्वोऽद्रवत्तस्मै पुरुषं प्रत्यास्यद्यत्पशुशीर्षाण्युपदधाति सर्वत एवैनम् (१) अवरुध्य चिनुत एता वै प्राणभृतश्चक्षुष्मतीरिष्टका यत्पशुशीर्षाणि यत्पशुशीर्षाण्युपदधाति ताभिरेव यजमानोऽमुष्मिँल्लोके प्राणित्यथो ताभिरेवास्मा इमे लोकाः प्र भान्ति मृदाऽभिलिप्योप दधाति मेध्यत्वाय पशुर्वा एष यदग्निरन्नं पशव एष खलु वा अग्निर्यत्पशुशीर्षाणि यं कामयेत कनीयोऽस्यान्नम् (२) स्यादिति संतरां तस्य पशुशीर्षाण्युप दध्यात्कनीय एवास्यान्नं भवति यं कामयेत समावदस्यान्नँ स्यादिति मध्यतस्तस्योप दध्यात्समावदेवास्यान्नं भवति यं कामयेत भूयोऽस्यान्नँ स्यादित्यन्तेषु तस्य व्युदूह्योप दध्यादन्तत एवास्मा अन्नमव रुन्धे भूयोऽस्यान्नं भवति (३) ॥

(एनमस्यान्नं भूयोऽस्यान्नं भवति) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अश्वमेधाङ्गमन्त्राभिधानम्)

(अथ पञ्चमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः)।

अग्निग्रहः सर्वमुखं सपीतं नवमे श्रुतम् (?)।

अथ दशमे पशुशीर्षाण्युच्यन्ते।

यत्पूर्वं द्वितीयप्रपाठके विहितं पशुशीर्षाण्युपदधातीति तदत्रानूद्य प्रशंसति—

प्रजापतिरग्निमिति। प्रजापतिना सृष्टोऽग्निर्यदा पूर्वस्यां दिशि पलायते तदा तन्निवारणार्थं तत्प्रातिकूल्येन स्थापितवान्। एवं दिगन्तरेष्वपि योज्यम्। अतः पशुशीर्षाणामुपधाने सत्यग्नेः पूर्वतः पलायनं निवार्य तमग्निं चिनोति।

प्रकारान्तरेण पशुशीर्षाणि प्रशंसति—**एता वा इति**।

पशुशीर्षाणां प्राणभृत्त्वं चक्षुष्मत्त्वं च भूतपूर्वगत्या द्रष्टव्यम्। तदुपधानेन यजमानः स्वर्गे प्राणिति चिरं जीवति। अपि च यजमानार्थमिमे सर्वे लोकाः पशुशीर्षेष्टकाभिः प्रकर्षेण भासन्ते। तदुपधाने कंचिद्विशेषं विधत्ते—

मृदाऽभिलिप्योपेति। मृतानां पशुशीर्षाणां मृल्लेपेन मृन्मयत्वे सति यज्ञयोग्यं (ग्यत्वं) भवति। अथान्वयव्यतिरेकाभ्यामपरं विशेषं विधत्ते—

पशुर्वा एष यदग्निरन्नमिति। अयमग्निः पशुसाधनत्वात्पशुरूपः। पशवश्चान्नसाधनत्वादन्नरूपाः। पशुशीर्षाणि चाग्निनिष्पादकत्वादग्निरूपाणि। एवं सत्यन्नाल्पत्वकामनायां संतरां संनिकृष्टतराणि यथा भवन्ति तथोपदध्यात्। ततोऽन्नमल्पमेव भवति। अथ नात्यल्पं नापि बहुलं किंतु समावत्समं जीवनमात्रपर्याप्तमन्नं स्यादिति कामनायां मध्यत उपदध्यात्। नात्यन्तं संनिकर्षो नाप्यतिविप्रकर्षः। तथा सति जीवनमात्रपर्याप्तमेवान्नं भवति। अथान्नभूयस्त्वकामनायां चितरन्तेषु परस्परं व्युदूह्य [व्युदूहनं] यथा भवति तथा पशुशीर्षाण्यपसार्योपदध्यात्। तथा सति सर्वस्मादपि दिगन्ततोऽस्यान्नमधीनं भवति। ततोऽतिबहुलं संपद्यते। एतच्च सर्वमेषां वा एतल्लोकानामित्यनुवाके द्रष्टव्यम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः)।

स्तेगान्दꣳष्ट्राभ्यां मण्डूकान्जम्भ्येभिरादकां खादेनोर्जꣳ सꣳसूदेनारण्यं जाम्बीलेन मृदं

(अश्वमेधाङ्गमन्त्राभिधानम्)

बर्स्वेभिः शर्कराभिरवकामवकाभिः शर्करामु-त्सादेन जिह्वामवक्रन्देन तालु सरस्वतीं जिह्वाग्रेण (१) ॥

(स्तेगान्द्वाविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठक एकादशोऽनुवाकः) ।

विशेषः पशुशीर्षेषु दशमे समुदीरितः ।

समाप्तं देवतावताऽभिधानम् । अथाश्वमेधाङ्गमन्त्राः केचिदुच्यन्ते । यदुक्तं सूत्रकारेण—' हविषा प्रचर्याऽऽज्यमवदानं कृत्वा स्तेगान्दंष्ट्राभ्यां मण्डूकाञ्जम्भ्येभिरित्येतैश्चतुर्दशभिरनुवाकैः प्रतिमन्त्रं शारीरहोमाञ्जुहोति ' इति, तत्र प्रथमानुवाकगतान्मन्त्रानाह—

स्तेगान्दंष्ट्राभ्यामिति । अत्र द्वितीयान्तनिर्दिष्टा देवताः । तृतीयान्तनिर्दिष्टान्यश्वस्याङ्गानि । इमां देवतामनेनाङ्गेन प्रीणयामीति होमकाल उभयं स्मर्तव्यमिति मन्त्राभिप्रायः । स्तेगाः क्षुद्रजन्तुविशेषा गोकर्णगा इति लोके प्रसिद्धाः । तदभिमानिनी काचिद्देवतेह लक्ष्यते । दंष्ट्रे उच्यते (तौ) [दन्तौ] । स्तेगाभिमानिनीं देवतां दंष्ट्राभ्यां यजामि । स एको मन्त्रः । एवमुत्तरत्रापि द्रष्टव्यम् । मण्डूकाः प्रसिद्धाः । दन्तमूलं जम्भस्तत्र भवा जम्भ्याः पार्श्वदन्ताः । आदका भक्षयित्री प्राणाभिमानिनी देवता । खादो भक्षणहेतुर्दन्तविशेषः । ऊर्क्रसाभिमानिनी देवता । संसूदं (दः) संवत्सक्षरणो नासिकादिः । अरण्यं प्रसिद्धम् । जाम्बीलमामाशयः, यत्र भक्षितं तृणं निधीयते तत् । मृत्प्रसिद्धा । बर्स्वा दन्तमूलमांसादीनि । शर्करास्तत्सदृशानि कठिनास्थीनि । अवकाः शैवालसदृशानि मांसानि । शर्करा प्रसिद्धा । उत्साद उच्चप्रदेशः । जिह्वा प्रसिद्धा । अवक्रन्द आन्तरं काखि (दि) कशब्दाभिव्यक्तिस्थानम् । तालु जिह्वामूलम् । सरस्वती जिह्वाग्रं चेत्युभयं प्रसिद्धम् ।

(पूर्वोक्तद्वितीयानुवाकगतमन्त्राभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः) ।

वाज॑ँ हनू॑भ्यामप आ॒स्यै॑नाऽऽदि॒त्याञ्छ्म॒श्रुभि॑रुप॒याम॑मध॒रेणो॒ष्ठेन॒ सदु॑त्त॒रेणा॒न्त॑रेणानूका॒शं प्र॑का॒शेन॒ बाह्य॑ँ स्तनयि॒त्नुं नि॑र्बा॒धेन॑ सूर्या॒ग्नी चक्षु॑र्भ्यां वि॒द्युतौ॑ क॒नीन॑काभ्याम॒शनिं॑ म॒स्तिष्के॑ण॒ बलं॑ म॒ज्जभिः॑ (१) ॥

(वाजं॑ पञ्चविꣳशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ।

विहितेषु चतुर्दशसु द्वितीयानुवाकगतान्मन्त्रानाह—

वाज॑ँ हनू॑भ्यामप इति । वाजोऽन्नम् । हन्वादीनां पञ्चानां पदानामर्थाः प्रसिद्धाः । उपयामः पृथिवी, इयं वा उपयाम इति श्रुत्यन्तरात् । अधरोष्ठः प्रसिद्धः । सच्छब्देन द्यौरुच्यते । सीदन्त्यस्यां पुण्यकृत इति व्युत्पत्तेः । उत्तरेणेत्यत्रौष्ठेनेत्यनुवर्तते । अन्तरमोष्ठयोर्मध्यम् । अनूकाशो द्यावापृथिव्योर्मध्यम् । अनुक्रमेण काशन्ते भासन्ते ज्योतींष्यस्मिन्निति व्युत्पत्तेः । प्रकाशोऽभ्यन्तरं प्रकाशस्थानम् । बाह्यं ब्रह्माण्डाद्बहिःस्थानम् । स्तनयित्नुः प्रसिद्धः । निर्बाधो गमनकालीनः शब्दः । सूर्याग्नी चक्षुषी चेत्युभयं प्रसिद्धम् । विद्युतौ वृष्टिकालीनेतरकालीने । कनीनके अक्षिस्थे कृष्णमण्डले । अशनिः प्रसिद्धः । मस्तिष्कः शिरोमांसम् । बलं मज्जेत्युभयं प्रसिद्धम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(पूर्वोक्तचतुर्थानुवाकगतमन्त्राभिधानम्)

(अथ पञ्चमाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः) ।

कूर्मां॑ञ्छफैर॒च्छलाभिः॑ कपि॒ञ्जला॒न्त्साम॑ कुष्ठि॑काभि॒र्जवं॒ जङ्घा॑भिरग॒दं जानु॑भ्यां वी॒र्यं॑ कु॒हाभ्यां॑ भ॒यं प्र॑चा॒लाभ्यां॒ गुहो॑पप॒क्षाभ्या॑- म॒श्विना॒वꣳसा॑भ्या॒मदि॑ति॒ꣳ शी॒र्ष्णा निर्ऋ॑तिं॒ निर्जा॑ल्मकेन शी॒र्ष्णा (१) ॥

(कूर्मान्त्रयोविꣳशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः ।)

अथ तृतीयानुवाकगतान्मन्त्रानाह--

कूर्मांञ्छफैरिति । कूर्माः शफाश्च प्रसिद्धाः । अच्छलाः शफलग्नमांसानि । कपिञ्जलाः प्रसिद्धाः। साम गीतिः। कुष्ठिका जङ्घाभ्यामधः प्रदेशः। जवो वेगः। जङ्घाः संधिभ्योऽधः प्रदेशः। अगद आरोग्यम् । जानुनी प्रसिद्धे । वीर्यं बलम् । कुहा (हौ) हस्तयोर्मध्यसंधी भयं प्रसिद्धम् । प्रचालौ पादयोरुपरिप्रदेशौ । गुहा गुहनी । उपपक्षौ पार्श्वे । अश्व्यंसशब्दौ प्रसिद्धौ । अदितिर्भूमिः । शीर्ष्णा शिरसा । निर्ऋतिः प्रसिद्धा । निर्जाल्मकेन केशरहितेन शीर्ष्णा शिरसा ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ।)

योक्त्रं॒ गृध्रा॑भिर्यु॒गमा॑नतेन चि॒त्तं मन्या॑भिः संक्रो॒शान्प्रा॒णैः प्र॑का॒शेन॒ त्वचं॑ पराका॒शेना॑- न्त॒रां म॒शका॒न्केशै॒रिन्द्र॒ꣳ स्वप॑सा वहे॑न बृह॒-

(पूर्वोक्तपञ्चमानुवाकगतमन्त्राभिधानम्)

स्पतिꣳ शकुनिसादेन रथमुष्णिहाभिः (१)॥

(योक्त्रमेकविꣳशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः)।

अथ चतुर्थानुवाकगतान्मन्त्रानाह—

योक्त्रं गृध्राभिरिति। योक्त्रं दर्भमयं बन्धनसाधनम्। गृध्राः कक्षाः। युगं कृतत्रेतादि। आननं ग्रीवाप्रदेशः। चित्तं प्रसिद्धम्। मन्या ग्रीवारेखाः। संक्रोशा घोषाः। प्राणाश्चक्षुरादयः। प्रकाशो बाह्यं रूपम्। त्वक्त्वगिन्द्रियाभिमानिनी। पराकाशोऽभ्यन्तरं रूपम्। अन्तराऽभ्यन्तरप्रदेशाभिमानिनी। मशककेशेन्द्रशब्दाः प्रसिद्धाः। स्वपसा वहेन शोभनव्यापारेणाङ्गबलेन। बृहस्पतिः प्रसिद्धः। शकुनिसादः पृष्ठं, यत्र शकुनयः शक्ता वीराः सीदन्ति। रथः प्रसिद्धः। उष्णिहा रथवाहनदेशः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः)।

मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी शिखण्डाभ्यामिन्द्राबृहस्पती ऊरुभ्यामिन्द्राविष्णू अष्ठीवद्भ्याꣳ सवितारं पुच्छेन गन्धर्वाञ्छेपेनाप्सरसो मुष्काभ्यां पवमानं पायुना पवित्रं पोत्राभ्यामाक्रमणꣳ स्थूराभ्यां प्रतिक्रमणं कुष्ठाभ्याम् (१)॥

(मित्रावरुणौ द्वाविꣳशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(पूर्वोक्तषष्ठानुवाकगतमन्त्राभिधानम्)

(अथ पञ्चमकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः) ।

अथ पञ्चमानुवाकगतान्मन्त्रानाह—

मित्रावरुणा इति । श्रोणी जघनगते मांसे । शिखण्डे ततोऽप्यधस्तने । ऊरू ततोऽप्यधस्तने । अष्ठीवती जङ्घयोः पृष्ठभागगते मांसे । पोशा (स) स्थूरकुष्ठशब्दैः पायुसमीपवर्तिन एव मांसविशेषा उच्यन्ते । देवतानामानि तु स्पष्टानि ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके षोडशोऽनुवाकः) ।

इन्द्र॑स्य क्रो॒डोऽदि॑त्यै पाज॒स्यं॑ दि॒शां ज॒त्रवो॒ जी॒मूता॑न्हृदयौप॒शाभ्या॑म॒न्तरि॑क्षं पु॒रि॒तता॒ नभ॑ उ॒द॒र्ये॑णेन्द्रा॒णीं प्ली॒हा व॒ल्मीका॑न्क्लो॒म्ना गि॒री॒न्प्ला॒शिभिः॑ समु॒द्रमु॒दरे॑ण वैश्वान॒रं भस्म॑ना (१) ॥

(इन्द्र॑स्य द्वावि॑ꣳश॒तिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके षोडशोऽनुवाकः) ।

अथ षष्ठानुवाकगतान्मन्त्रानाह—

इन्द्रस्य क्रोडोऽदित्या इति । क्रोडो गलभागः । पाजस्यं पादतलम् । जत्रवोऽसतसमीपवर्तीन्यस्थीनि । हृदयं हृदयमध्यमष्टदलं मांसपद्मम् । औपशं तद्वेष्टनं मांसम् । पुरितदन्त्राणि । उदर्यमुदरगतं मांसम् । प्लीहक्लोमशब्दाभ्यामुदरपार्श्ववर्तिनी मांसखण्डे उच्येते । तत्समीपवर्तीनि मांसानि प्लाशीनि । उदरं प्रसिद्धम् । भस्म जीर्णतृणादि । यथा पूर्वानुवाके द्वितीयया देवतानिर्देश एवमिन्द्रस्येत्यादौ षष्ठीचतुर्थीभ्यामपि देवतानिर्देशो द्रष्टव्यः ।

(पूर्वोक्ताष्टमानुवाकोक्तमन्त्राभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके

षोडशोऽनुवाकः ॥ १६ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके सप्तदशोऽनुवाकः)।

पूष्णो वनिष्ठुरन्धाहे स्थूरगुदा सर्पान्गुदाभिर्ऋतून्पृष्टीभिर्दिवं पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणां द्वितीयाऽऽदित्यानां तृतीयाऽङ्गिरसां चतुर्थी साध्यानां पञ्चमी विश्वेषां देवानां षष्ठी (१) ॥

(पूष्णश्चतुर्विंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके सप्तदशोऽनुवाकः)।

अथ सप्तमानुवाकगतान्मन्त्रानाह—

पूष्णो वनिष्ठुरिति। वनिष्ठुः प्रौढमन्त्रम्। स्थूरगुदा गुदकाण्डे स्थूलो भागः। गुदा गुदकाण्डस्य सूक्ष्मभागः। पृष्ट्यो गुदसमीपवर्तिन्यः शिराः। पृष्ठमुपरिभागः। तत्समीपवर्तिनोऽस्थिविशेषाः कीकसाः। ताश्च षट्संख्याकाः क्रमेण वस्वादीनां भागाः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके

सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठकेऽष्टादशोऽनुवाकः)।

ओजो ग्रीवाभिर्निर्ऋतिमस्थभिरिन्द्रँ स्वपसा वहेन रुद्रस्य विचलः स्कन्धोऽहोरात्रयोः

(पूर्वोक्तनवमानुवाकगतमन्त्राभिधानम्)

द्वितीयोऽर्धमासानां तृतीयो मासां चतुर्थ ऋतू-
नां पञ्चम संवत्सरस्य षष्ठः (१)॥

(ओजो विंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
सप्तमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठकेऽष्टादशोऽनुवाकः)।

अथाष्टमानुवाकगतान्मन्त्रानाह—

ओजो ग्रीवाभिरिति। ग्रीवास्तदवयवाः। अस्थीनि तत्रत्यानि। योऽयं वहो वहनयोग्यः प्रदेशः स्वपाः शोभनकर्मा वहनेऽत्यन्तस्वपाः सोऽयमिन्द्रस्य भागः। स्कन्धोऽवयवभेदेन षोढा भिन्नस्तत्रात्यन्तचञ्चलोऽवयवो रुद्रस्य। तत्तदनन्तरभाविनोऽहोरात्रादीनाम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठक एकोनविंशोऽनुवाकः)।

आनन्दं नन्दथुना कामं प्रत्यासाभ्यां भयꣳ
शितीमभ्यां प्रशिषं प्रशासाभ्याꣳ सूर्याच-
न्द्रमसौ वृक्याभ्याꣳ श्यामशबलौ मतस्नाभ्यां
व्युष्टिꣳ रूपेण निम्रुक्तिमरूपेण (१)॥

(आनन्दꣳ षोडश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके
सप्तमप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठक एकोनविंशोऽनुवाकः)।

अथ नवमानुवाकगतान्मन्त्रानाह—

आनन्दं नन्दथुनेति। नन्दथुरिन्द्रियम्। प्रत्यासशितीमप्रशासशब्दैर्गु-

(पूर्वोक्तदशमानुवाकगतमन्त्राभिधानम्)

प्ससमीपवर्तीन्यवयवयुगलान्यभिधीयन्ते। वृक्यौ पार्श्वद्वयवर्तिन्यौ मांसग्रन्थी। तत्समीपवर्तिनी मतस्ने। रूपं समीचीन आकारस्तद्विपरीतमरूपम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठक एकोनविंशोऽनुवाकः॥ १९॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके विंशोऽनुवाकः)।

अहर्मा॒ꣳसेन॒ रात्रिं॒ पीव॑सा॒ऽपो यू॒षेण॑ घृ॒तꣳ रसे॑न॒ श्यां वस॑या दूषीका॑भिर्ह्रा॒दुनि॑मश्रु॑भिः पृष्वां॒ दिवꣳ॑ रू॒पेण॒ नक्ष॑त्राणि॒ प्रति॑रूपेण पृथि॒वीं चर्म॑णा छ॒वीं छ॒व्योपाकृ॑ताय॒ स्वाहाऽऽल॑ब्धाय॒ स्वाहा॑ हु॒ताय॒ स्वाहा॑ (१)॥

(अह॒रष्टावि॑ꣳशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके विंशोऽनुवाकः॥ २०॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके विंशोऽनुवाकः)।

अथ दशमानुवाकगतान्मन्त्रानाह—

अहर्मा॒ꣳसेनेति। पीवोयूषरसवसाशब्दास्तत्रत्यद्रवाणां विशेषाः। दूषीका नेत्रयोर्मलम्। अश्रूणि नेत्रजलानि। रूपं नेत्रगोलकम्। प्रतिरूपं तत्रत्यं प्रतिबिम्बम्। चर्म पक्ष्मपटलम्। छवी नेत्रगता कान्तिः। योऽयमुपाकृतमश्वमभिमन्यमानो देवस्तस्मा इदं स्वाहा हुतमस्तु। तथैवाऽऽलब्धमभिमन्यमानाय हुतमभिमन्यमानाय च देवाय तत्तदवस्थापन्नमिदं हुतमस्तु॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके विंशोऽनुवाकः॥ २०॥

(पूर्वोक्तद्वादशानुवाकगतमन्त्राभिधानम्)

(अथ पञ्चमाष्टके सप्तमप्रपाठक एकविंशोऽनुवाकः) ।

अग्नेः पक्षतिः सरस्वत्यै निपक्षतिः सोमस्य तृतीयाऽपां चतुर्थ्योषधीनां पञ्चमी संवत्सरस्य षष्ठी मरुता सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटूरः (१) ॥

(अग्नेरेकान्नात्रिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठक एकविंशोऽनुवाकः) ।

अथैकादशानुवाकगतान्मन्त्रानाह--

अग्नेः पक्षतिरिति । दक्षिणस्य पार्श्वस्य मूले वर्तमाना येयं वङ्क्रिः सा पक्षतिः । तदनन्तरभाविनी वङ्क्रिर्निपक्षतिः । एवं तत्तदनन्तरभाविन्यो वङ्क्रयो द्वितीयादिशब्दैरुच्यन्ते । एता वङ्क्रयो यस्मिन्पृष्ठभागगतेऽस्थिपार्श्वविशेषे संबध्यन्ते सोऽयं पाटूरः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके द्वाविंशोऽनुवाकः) ।

वायोः पक्षतिः सरस्वतो निपक्षतिश्चन्द्रमसस्तृतीया नक्षत्राणां चतुर्थी सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पाणां सप्तम्यर्यम्णोऽष्टमी त्वष्टुर्नवमी धातुर्दशमीन्द्राण्या एकादश्यदित्यै द्वादशी द्यावापृथिव्योः पार्श्वं यम्यै पाटूरः (१) ॥

(वायोरष्टाविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(पूर्वोक्तत्रयोदशानुवाकगतमन्त्राभिधानम्)

(अथ पञ्चमकाण्डे सप्तमप्रपाठके द्वाविंशोऽनुवाकः) ।

अथ द्वादशानुवाकगतान्मन्त्रानाह—

वायोः पक्षतिरिति । पूर्वोक्तदक्षिणपार्श्ववदुत्तरपार्श्वपरत्वेनेदं सर्वं व्याख्येयम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके त्रयोविंशोऽनुवाकः) ।

पन्थामनूवृग्भ्याꣳ संततिꣳ स्नावन्याभ्याꣳ शुकान्पित्तेन हरिमाणं यक्ना हलीक्ष्णान्पापवातेन कूश्मान्छकभिः शवर्तानूवध्येन शुनो विशसनेन सर्पाँल्लोहितगन्धेन वयाꣳसि पक्वगन्धेन पिपीलिकाः प्रशादेन (१) ।

(पन्थां द्वाविꣳशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ पञ्चमकाण्डे सप्तमपाठके त्रयोविंशोऽनुवाकः) ।

अथ त्रयोदशानुवाकगतान्मन्त्रानाह—

पन्थामनूवृग्भ्यामिति । अनूवृक्शब्देन पूर्वोक्तयोर्वृक्कयोः समीपवर्तिनी मांसखण्डे उच्येते । स्नावन्यशब्देन सूक्ष्माणां स्नायुविशेषाणां मूले, ते पार्श्वद्वयवर्तिन्यौ द्वे शिरे उच्येते । पित्तं प्रसिद्धम् । यक्ना यकृच्छब्देन पित्तगतो वर्णविशेषः । पापवातोऽपानवायुः । शकानि शकृत्पिण्डान् । ऊवध्यमपक्वं शकृत् । विशसनं छिन्नस्थानम् । लोहितगन्धपक्वगन्धौ प्रसिद्धौ । प्रशादो विशसनकालपतितो मांसलेशविशेषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अश्वमेधब्राह्मणोक्तद्यौस्त इतिमन्त्राभिधानम्)

(अथ पञ्चमाष्टके सप्तमप्रपाठके चतुर्विंशोऽनुवाकः)।

क्रमैरत्यक्रमीद्वाजी विश्वैर्देवैर्यज्ञियैः संवि-दानः। स नो नय सुकृतस्य लोकं तस्य ते वय्ँ स्वधया मदेम (१)॥

(क्रमैरष्टादश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तम-प्रपाठके चतुर्विंशोऽनुवाकः॥ २४॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके चतुर्विंशोऽनुवाकः)।

अथ चतुर्दशानुवाकोक्तं मन्त्रमाह—

क्रमैरत्यक्रमीदिति। अयं वाजी पूर्वोक्तावयवसंपन्नोऽश्वो यज्ञियैर्यज्ञार्हैर्विश्वैर्देवैः पूर्वोक्तैः स्तेगादिभिः पिपीलिकान्तैः सर्वैर्देवैरेकैमत्यं गतः क्रमैः पाद-विन्यासैरत्यक्रमीद्भूलोकमतिक्रम्य स्वर्गं गतवान्। हे वाजिन्स त्वं नोऽस्मान्सुकृतस्य फलभूतं लोकं नय प्रापय। तस्य ते तृप्त्यर्थं वयं स्वधाशब्दोपलक्षितेनाऽऽज्येन हविषा हर्षं जनयाम।

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्विंशोऽनुवाकः॥ २४॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके पञ्चविंशोऽनुवाकः)।

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरि-क्षꣳ समुद्रो योनिः सूर्यस्ते चक्षुर्वातः प्राणश्च-न्द्रमाः श्रोत्रं मासाश्चार्धमासाश्च पर्वाण्यृतवोऽ-ङ्गानि संवत्सरो महिमा (१)॥

(द्यौस्ते पञ्चविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तम-प्रपाठके पञ्चविंशोऽनुवाकः॥ २५॥

(अश्वमेधब्राह्मणोक्ताग्निः पशुरितिमन्त्राभिधानम्)

(अथ पञ्चमकाण्डे सप्तमप्रपाठके षड्विंशोऽनुवाकः) ।

एवमाज्याहुतिसाधनभूताश्चतुर्दशानुवाकगता मन्त्रा उक्ताः ।

अथ यद्विहितमश्वमेधब्राह्मणे—" द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वमनुमन्त्रयते " इति, तं मन्त्रमस्मिन्पञ्चविंशानुवाके पठति—

द्यौस्ते पृष्ठमिति । हेऽश्व येयं द्यौः सा ते तव पृष्ठमुपरिभागः । या च पृथिवी सा यजमानादिभिः सह तवावस्थानहेतुः । यच्चान्तरिक्षं तत्तवाऽऽत्मोदरभागः । योऽयं समुद्रः स त्वदीययोनिः ' अप्सुयोनिर्वा अश्वः ' इति श्रुत्यन्तरात् । यः सूर्यः स विराड्रूपस्य तव चक्षुः । यो वातः स तव प्राणः । यश्चन्द्रमाः स तव श्रोत्रम् । मासाः पक्षाश्च तव पर्वाणि । वसन्ताद्यृतवस्तव हस्तपादाद्यङ्गानि । संवत्सरस्तव युद्धजयादिरूपो महिमा ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके पञ्चविंशोऽनुवाकः ॥ २५ ॥

(अथ पञ्चमाष्टके सप्तमप्रपाठके षड्विंशोऽनुवाकः) ।

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथावजिघ्र वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्वायुः स ते लोकस्तस्मात्त्वाऽन्तरेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नादित्यः स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि (१)॥

(यस्मिन्नष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके सप्तमप्रपाठके षड्विंशोऽनुवाकः ॥ २६ ॥

(अश्वमेधब्राह्मणोक्ताग्निः पशुरितिमन्त्राभिधानम्)

यो वा अर्यथादेवतं त्वामग्न इन्द्रस्य चित्तिं यथा वै वयो वै यद्वाकूताद्यास्ते अग्ने मयि गृह्णामि प्रजापतिः स्तेगान्वाजं कूर्मान्योक्त्रं मित्रावरुणाविन्द्रस्य पूष्ण ओजं आनन्दमह्नरग्नेर्वायोः पन्थां क्रमैर्यौस्तेऽग्निं पशुः षड्विंशतिः ॥ २६ ॥

यो वा एवाऽऽहुतिमभवन्पथिभिरवरुध्याऽऽनन्दमष्टा

पञ्चाशत् ॥ ५८ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टके

सप्तमः प्रपाठकः ॥ ७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां पञ्चमाष्टकः ॥ ५ ॥

(अथ पञ्चमकाण्डे सप्तमप्रपाठके षड्विंशोऽनुवाकः) ।

अथ यदुक्तमश्वमेधब्राह्मणे—" अग्निः पशुरासीदित्यवघ्रापयेत् " इति, तमिमं मन्त्रमस्मिन्षड्विंशानुवाके पठति—

अग्निः पशुरासीदिति । हेऽश्वायमग्निर्देवः पुरा कस्मिंश्चिज्जन्मनि त्वमिवाश्वमेधयागहेतुरश्वाख्यः पशुरासीत् । तेनाग्निरूपेण पशुना केचिद्यजमाना अयजन्त । स च पशुरग्निर्देवो भूत्वा लोकमेतमजयत् । यस्मिँल्लोके सोऽग्निरिदानीं तिष्ठति स एव तवापि लोको भविष्यति । त्वं च तं लोकं जेष्यसि । अथैवं सति त्वमुत्सुकः सन्निदमुदकमवजिघ्र । एवं वाय्वादित्यवाक्ययोरपि योज्यम् । वायुवाक्ये तु व्यतिरेकोपन्यासः । यद्युदकं नावजिघ्रासि तर्हि तस्माद्वायुलोकात्त्वामन्तरेष्यामि त्वमन्तरितस्तस्माल्लोकाद्भ्रष्टो यथा भवसि तथा करिष्यामि । आदित्यवाक्ये त्वग्निवाक्यवदन्वयः । यद्युदकमवजिघ्रासि तर्हि तमादित्यलोकं जेष्यसि ।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः—

गायत्र्यादिभिराग्नेयमन्त्रैः पञ्च चितीः स्पृशत् ।
अग्ने देवानिहेत्याद्या नाचिकेतचितीरिताः ॥ १ ॥
आयं गौः पञ्च मन्त्रा इहाऽऽनेया यथाक्रमम् ।
सौरी चित्रवती चित्रं देवानामित्यसौ भवेत् ॥ २ ॥

(अश्वमेधब्राह्मणोक्ताग्निः पशुरितिमन्त्राभिधानम्)

त्वामग्ने वृषभं दध्यात्प्रत्येकं चितिपञ्चके ।
संवत्सरस्येति दध्यात्प्राजापत्यामिहेष्टकाम् ॥ ३ ॥
येन देवा उख्यमिन्धे दध्यादज्यानिसंज्ञिकाः ।
शतायुधायेति पञ्चमन्त्रैः पञ्चेष्टका इमाः ॥ ४ ॥
इन्द्रस्य वज्रिणीर्दध्यादग्नाविष्णू घृताहुतिः ।
चित्तिं जुहोमि चाग्ने तं सप्त ते अग्निर्जुहोति हि ॥ ५ ॥
अग्ने पशोत्युपादध्याद्राष्ट्रभृत्संज्ञकेष्टकाः ।
सुवर्णपञ्चाभिर्हुत्वा तेजास्तिस्रो दधाति हि ॥ ६ ॥
यास्ते तिस्रो जुहोत्येवं तत्त्वा यामीति होमकः ।
यदाकूतादिति प्रोक्तैर्मन्त्रैराकूतिहोमकः ॥ ७ ॥
यास्ते स्पर्शश्चतस्रेति मन्त्रात्कूर्मं दधाति हि ।
पथीत्याग्निग्रहा गायत्र्याद्याः पूर्वमुदीरिताः ॥ ८ ॥
अग्निः पञ्चेष्टका दध्यादाग्निकाण्डमितीरितम् ।
इवेगानित्यश्वमेधाङ्गमन्त्राः षोडशसु श्रुताः ॥
अनुवाकेषु काण्डं यत्पञ्चमं य (त) द्धि सुस्थितम् ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-
र्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके
षड्विंशोऽनुवाकः ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य
श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन सायणाचार्येण विरचिते
माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
पञ्चमकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥

(अश्वमेधब्राह्मणोक्ताग्नेः पशुरितिमन्त्राभिधानम्)

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये पञ्चमः काण्डः ॥ ५ ॥

मूलक्रमेण पञ्चमाष्टके–प्र० ७ अ० १२०

भाष्यक्रमेण पञ्चमकाण्डे—प्र० ७ अ० १२०

मूलक्रमेणाऽऽदितः समष्टयङ्काः–अष्ट० ५ प्र० ३३ अ० ४६८

भाष्यक्रमेणाऽऽदितः समष्ट्यङ्काः—का० ५ प्र० ३३ अ० ४६३

समाप्तोऽयं श्रीमत्सायणाचार्यविरचितभाष्यसमेतायाः कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः पञ्चमः काण्डः ॥ ५ ॥

*